*Jala pippalī* is *hṛdya* (cardiac tonic), *cakṣuṣya* (promoter of eyesight), *śukrala* (spermatopoetic), *laghu* (light) *saṁgrāhiṇī* (constipative), *hima* (cooling) and *rukṣa* (ununctuous). It cures *raktapitta* (a disease characterised by bleeding from different parts of the body) and *jvara* (fever).

66
'लघूष्णं पाचन हिंगु दीपनं कफवातनुत् ।
67
स्निग्धं तीक्ष्ण कटूष्णं शूलाजीर्णविबन्धनुत्'' ॥१०७॥
[सुश्रुत: सूत्र ८६ : २२८]

68
'कृमिगुल्मोदरानाहशूलाजीर्णविबन्धनुत्' ।

'लघूष्णं[69] कटुकं पाके रुच्यं पित्ताग्निदीपनम्[70] ॥ १०८ ॥

*Hiṅgu* **(Ferula foetida Regel.)**

*Hiṅgu* is light, hot, carminative and digestive stimulant. It alleviates *kapha* and *vāta.* It is unctuous, sharp and pungent in taste. It cures colic pain, indigestion, constipation, *kṛmi* (parasitic infection), *gulma* (phantom tumour), *udara* (obstinate abdominal diseases including ascitis) and *ānāha* (obstruction to the movement of wind in abdomen). It is pungent in *vipāka* and appetiser. It aggravates *pitta.*

कटु श्लेष्मानिलहरं गन्धाढ्यं **जीरकद्वयम्** ॥ १०९ ॥

[सुश्रुत: सूत्र ४६ : २२९]

"ग्राहि रूक्षं मेध्यं वृष्यं चक्षुष्य छर्दिगुल्मनुत् ।
आध्मानहृत्पाचन च [71]गर्भाशयविशुद्धिकृत्" ॥ ११० ॥

*Jīraka* **(Cuminum cyminum Linn.)**

Both the types of *jīrā* are pungent. They alleviate *kapha* and *vāyu.* They are full of aroma. They are constipative, ununctuous, promoter of memory, aphrodisiac and promoter of eyesight. They cure *chardi* (vomiting), *gulma* (phantom tumour) and *ādhmāna* (tymphanitis). They are carminative and they help in the cleansing of the uterus.

**कारवी** श्लेष्मवातघ्नी तद्वज्ज्ञेयोपकुंचिका ।

*Kāravī* **and** *Upakuñcikā* **(Carum carvi Linn. and Nigella sativum Linn.)**

*Kāravī* alleviates *kapha* and *vāta.* *Upakuñcikā* has similar properties.

**वाष्पिका** कटुतीक्ष्णोष्णा कृमिश्लेष्महृत् सरा ॥१११॥

*Vāṣpikā* **(Carum bulbocastanum Koch)**

*Vāṣpikā* is pungent, sharp and hot. It cures *kṛmi* **para**-sitic infection) and aggravated *kapha.* It is laxative.

तद्वच्च **राजिका** रुच्या दीपनी कोष्ठशूलनुत् ।

*Rājikā* **(Brassica nigra Koch).**

Similarly *rājikā* is appetiser and digestive stimulant. It cures colic pain in the abdomen.

[72]
यवानी पित्तला कुष्ठ-कृमि-वातकफापहा ॥ ११२ ॥

*Yavānī* **(Trachyspermum ammi Sprague)**

*Yavānī* aggravates *pitta.* It cures *kuṣṭha* (obstinate skin diseases including leprosy), *kṛmi* (parasitic infection) and aggravated *vāyu* as well as *kapha.*

[73]
“छिछिका शीतली कुष्ठ-कृमि-वातकफापहा” ।

*Chichikā*

*Chichikā* is cooling. It cures *kuṣṭha* (obstinate skin diseases including leprosy), *kṛmi* (parasitic infection) and aggravated *vāta* as well as *kapha.*

[74]
पुंस्त्वघ्नः कटुतीक्ष्णोष्णो भुस्तृणो वक्त्रशोधनः ॥ ११३ ॥

*Bhūstṛṇa* **(Cymbopogon martini Wats.)**

*Bhūstṛṇa* causes impotency. It is pungent, sharp and hot. It cleanses the mouth.

[75]
खराह्वा कफवातघ्नी वस्तिरोगरुजापहा ।”

*Kharāhvā* **(Apium graveolens Linn.)**

*Kharāhvā* alleviates *kapha* and *vāyu.* It alleviates diseases of the bladder and pain.

कषायं तिक्तमधुरं हृद्यं दीपनरोचनम् ॥ ११४ ॥

धान्यकं कासतृट्छर्दि. शमनं चक्षुषोर्हितम् ।

*Dhānyaka* **(Coriandrum sativum Linn.)**

*Dhānyaka* is astringent, bitter and sweet in taste, cardiac tonic, digestive stimulant and carminative. It cures *kāsa* (coughing), *tṛṭ* (morbid thirst) and *chardi* (vomiting). It is useful for eyes.

[76] "भव्यभोजनभोज्येषु विविधेष्ववचारिता ॥ ११५ ॥

आर्द्रा कुस्तुंबरी कुर्यात्स्वादुसौगन्ध्यहृद्यताम् ।

Green *kustumbarī (dhānyaka)*, when used in different ways, imparts good taste, fragrance and cardiac tonic property to various excellent types of eatables.

सा शुष्का मधुरा पाके स्निग्धा तृट्दाहनाशिनी ॥११६॥

दोषघ्नी कटुका किञ्चित् तिक्ता स्रोतोविशोधनी [77] ।"

The dried *kustumbarī* is sweet in *vipāka* and unctuous. It cures *tṛṭ* (morbid thirst), *dāha* (burning syndrome) and aggravated *doṣas*. It is slightly pungent and bitter. It cleanses the channels of circulation.

**जम्बीरः** पाचनस्तीक्ष्णः कृमिवातकफापहः ॥ ११७ ॥

[सुश्रुतः सूत्र ४६ : २३०-२३२]

*Jambīra* **(Citrus limon Burm. f)**

*Jambīra* is carminative and sharp. It cures *kṛmi* (parasitic infection) and aggravated *vāta* and *kapha*.

'**भंगा** कफहरा तिक्ता ग्राहिणी दीपनी लघुः [78] ।

तीक्ष्णोष्णा पित्तला मोहमदकृद्वाग्विवर्धिनी [79]' ॥११८॥

[धन्वन्तरिनिघण्टुः गुडूच्यादि प्रथमवर्ग १३१]

*Bhaṅgā* **(Cannabis sativa Linn.)**

*Bhaṅgā* alleviates *kapha*. It is bitter, constipative, digestive stimulant, light, sharp and hot. It aggravates *pitta*. It causes unconsciousness, intoxication and talkativeness.

**सुरभिर्दीपनो** रुच्यो [80] मुखवैशद्यकारकः ।

[सुश्रुतः सूत्र ४६ : २३३]

पार्श्वशूलारुचिश्वासकासहिक्कानिलापहः ॥ ११९ ॥

*Surabhi*

*Surabhi* is digestive stimulant and appetiser. It causes non-sliminess (freshness) in mouth. It cures *pārśva sūla* (pain in the sides of chest), *aruci* (anorexia), *śvāsa* (asthma), *kāsa* (coughing) and aggravated *vāyu.*

**तुम्बरुः** पित्तकृद्वातकृमिदौर्गन्ध्यनाशनः ।

*Tumburu* **(Zanthoxylum alatum Roxb)**

*Tumburu* aggravates *pitta.* It alleviates aggravated *vāyu.* It cures *kṛmi* (parasitic infection) and *daurgandhya* (foul smell coming out of the body).

'**वर्वरी** त्रितयं रूक्षं सरं कटुविदाहि च ॥ १२० ॥
81
पित्तलं कफवातास्रदद्रुकृमिविषापहम् ।'

*Varvarī*

Three varieties of *varvarī* are ununctuous, laxative, pungent, *vidāhi* (causing burning sensation). They aggravate *pitta* and alleviate *kapha*, *vāta* as well as vitiated blood. They cure *dadrū* (ring worm), *kṛmi* (parasitic infection) and *viṣa* (poisoning).

शोथविद्रधिगंडघ्नी **कृष्णगन्धा** कफापहा ॥ १२१ ॥

*Kṛṣṇagandhā* **(a variety of** ***Śigru*****)**

*Kṛṣṇagandhā* cures *śotha*, (oedema), *vidradhi* (abscess) and *gaṇḍa* (goitre). It alleviates *kapha.*

82
'**शिग्रुस्तीक्ष्णा** लघुर्ग्राही वह्निकृत्कफवातजित् ।

*Śigru* **(Moringa pterigosperma Gaertn.)**

*Śigru* is sharp, light, constipative and digestive stimulant. It alleviates *kapha* and *vāta.*

**मधुशिग्रुः** सरस्तिक्तः शोथघ्नो दीपनः कटुः ॥ १२२ ॥

*Madhu śigru* **(a variety of** ***Śigru*****)**

*Madhu śigru* is laxative and bitter (?). It alleviates *sotha* (oedema) and stimulates digestion. It is pungent.

उष्णोऽश्मरिहरो भेदी **वरुणो**ऽनिलशूलहृत् ।

*Varuṇa* **(Crataeva nurvula Buch. Ham.)**

*Varuṇa* is hot. It cures *aśmari* (stone in urinary tract), It is purgative. It alleviates aggravated *vāyu* and *śūla* (colic pain).

**पारिभद्रो**ऽनिलश्लेष्मशोथमेहकृमीन् जयेत् ।। १२३ ।।

*Pāribhadra* **(Erythrina variegata Linn.)**

*Pāribhadra* cures aggravated *vāyu* and *kapha*, *śotha* (oedema), *meha* (obstinate urinary diseases including diabetes) and *kṛmi* (parasitic infection).

**बिल्वमूलं** मरुत्श्लेष्मछर्दिघ्नं न च पित्तकृत् ।

*Bilva* **(Aegle marmelos Corr.)**

The root of *bilva* alleviates *vāyu* and *kapha*. It cures *chardi* (vomiting) and it does not aggravate *pitta*.

83

**पाटला** कफवातघ्नी कट्वंशा ग्राहि दीपनीम् ।।१२४।।

*Pāṭalā* **(Stereospermum suaveolens DC.)**

*Pāṭalā* alleviates *kapha* and *vāta*. It is slightly pungent. It is constipative and digestive stimulant.

कषाया मधुरा तिक्ता **काश्मरी** च कफापहा ।

*Kāśmarī* **(Gmelina arborea Linn.)**

*Kāśmarī* is astringent, sweet and bitter. It alleviates *kapha*.

**शोथनुद्वह्निमन्थाश्च** हितो वातविकारिणाम् ।।१२५।।

*Vahnimantha* **(Clerodendrum phlomidis Linn. f.)**

*Vahnimantha* alleviates *śotha* (oedema) and it is useful for patients suffering from diseases caused by *vāyu*.

**एरण्डमूलं** शूलघ्नं वृष्यं वातहरं परम् ।

*Eraṇḍa* **(Ricinus communis Linn.)**

The root of *eraṇḍa* cures *śūla* (colic pain). It is aphrodisiac and is an excellent alleviator of *vāyu.*

वृष्यस्त्रिकण्टको बल्यो वातघ्नो मूत्रकृच्छ्रजित् ॥१२६॥

*Trikaṇṭaka* **(Tribulus terrestris Linn.)**

*Trikaṇṭaka* is aphrodisiac, strength promoter and alleviator of *vāyu.* It cures *mūtrakṛcchra* (dysuria).

उष्णा वातकफश्वासकासघ्नी कंटकारिका ।

*Kaṇṭakārikā* **(Solanum xanthocarpum Schrad & Wendle.)**

*Kaṇṭakārikā* is hot. It alleviates *vāyu* and *kapha.* It cures *śvāsa* (asthma) and *kāsa* (bronchitis).

पाचिनी ग्राहिणी सोष्णा वातघ्नी बृहती तथा ॥१२७॥

*Bṛhatī* **(Solanum indicum Linn,)**

*Bṛhatī* is carminative, constipative, hot, and alleviator of *vāyu.*

पृश्निपर्णी स्थिरा चैव पित्तश्लेष्मातिसारिणाम् ।

पानभोजनसंस्कारे शस्यते वातभूयसाम् ॥ १२८ ॥

*Pṛśniparṇī and Sthirā* **(Uraria picta Desv. & Desmodium gangeticum DC.)**

*Pṛśniparṇī* and *sthirā* are very useful for patients suffering from diarrhoea caused by *pitta* and *kapha* and for patients dominated by vitiated *vāta.* Their food and drinks should be boiled along with these two drugs.

84

जिंगिनी व्रणहृद्रोगवातातीसारजित्कटुः ।

*Jiṅginī* **(Lannea grandis Engl.)**

*Jiṅginī* cures *vraṇa* (ulcer), *hṛdroga* (heart disease), aggravated *vāyu* and *atisāra* (diarrhoea). It is pungent.

उष्णास्तस्यास्तु निर्यासो नस्याद्बाहुव्यथापहः ॥१२९॥

The gum resin extracted from this plant is hot. If this is

given for inhalation (*nasya*), then it cures pain in the arm.

वातपित्तापहं ग्राहि वृष्यं बल्यं **बलात्रयम्** ।

*Balā* **(Sida cordifolia Linn.)**

There are three varieties of *balā*. They alleviate *vāyu* and *pitta*. They are constipative and aphrodisiac.

85

स्निग्ध मधुरमायुष्य **महती** मूत्रकृच्छ्रनुत् ॥ १३० ॥

*Mahābalā* **(Sida rhombifolia Linn.)**

*Mahābalā* is unctuous, sweet and promoter of longevity. It cures *mūtrakṛcchra* (dysuria).

क्षतक्षीणहितायुष्या वृष्या **नागबलाधिकम्** ।

*Nāgabalā* **(Grewia populifolia Vahl.)**

*Nāgabalā* is specially useful for patients suffering from *kṣata kṣīṇa* (consumption). It promotes longevity and is aphrodisiac.

**बल्याश्वगन्धा** वातघ्नी कासश्वासक्षये हिता ॥१३१॥

*Aśvagandhā* **(Withania somnifera Dunal.)**

*Aśvagandhā* promotes strength, and alleviates *vāyu*. It is useful in *kāsa* (bronchitis), *śvāsa* (asthma) and *kṣaya* (phthisis).

**माषपर्णी** महावृष्या चक्षुष्या **मुद्गपर्णिका** ।

*Māṣaparṇī* & *Mudga parṇī* **(Teramnus labialis Spreng. & Phaseolus trilobus Ait.)**

*Māṣa parṇī* is exceedingly aphrodisiac. *Mudga parṇī* promotes eye sight.

**ऋद्धिर्बल्या** त्रिदोषघ्नी शुक्रला मधुरा गुरुः ॥ १३२ ॥

*Ṛddhi*

*Ṛddhi* promotes strength. It alleviates all the three *doṣas*. It is spermatopoetic (*śukrala*), sweet and heavy.

**वृद्धिर्गर्भप्रदा** शीता वृष्या कासक्षयापहा ।

*Vṛddhi*

*Vṛddhi* helps in conception (*garbhaprada*). It is cooling and aphrodisiac. It cures *kāsa* (bronchitis), and *kṣaya* (consumption).

काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु ॥ १३३ ॥
86
जयेत्समीरदाहास्रपित्त-शोष-विष-ज्वरान् ।

*Kākolī*

*Kākolī* has two varieties. Both of them are cooling, spermatopoetic (*śukrala*), sweet and heavy. They cure aggravated *vāyu*, *dāha* (burning syndrome), *asrapitta* (a disease characterised by bleeding from different parts of the body), *śoṣa* (consumption), *viṣa* (poisoning) and *jvara* (fever).

मेदायुग्मं गुरुस्वादुवृष्यं स्तन्यं कफापहम् ॥ १३४ ॥
बृंहणं शीतलं पित्तरक्तक्षयसमीरजित् ।

*Medā*

There are two varieties of *medā*. They are heavy, sweet, aphrodisiac and *stanya* (galactogogue). They alleviate *kapha*. They are *bṛṁhaṇa* (nourishing) and cooling. They alleviate *pitta*, blood, *kṣaya* (consumption) and *vāyu*.

जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ॥१३५॥
हरतः पित्तदाहास्रकार्श्यशोषक्षयापहौ ।

*Jīvaka & Ṛṣabhaka*

*Jīvaka* and *ṛṣabhaka* are strength promoting, cooling and spermatopoetic. They aggravate *kapha*. They cure aggravated *pitta*, *dāha* (burning syndrome), vitiated blood, *kārśya* (emaciation), *śoṣa* (consumption) and *ksaya* (phthisis).

87
अष्टवर्गोऽष्टभिर्द्रव्यैरेतैः शीतोऽतिशुक्रलः ॥ १३६ ॥
बृंहणः पित्तदाहास्र—शोषघ्न· स्तन्यगर्भकृत् ।

*Aṣṭavarga*

*Ṛddhi*, *bṛddhi*, *kākolī*, *kṣīra kākolī*, *medā*, *mahāmedā*,

*jīvaka* and *ṛṣabhaka*—these eight drugs, taken together, are known as *aṣṭavarga*. It is cooling, exceedingly spermatopoetic and nourishing. It alleviates aggravated *pitta*, *dāha* (burning syndrome), *asra* (vitiated blood) and *śoṣa* (consumption). It promotes lactation and conception.

विशाला कफवातघ्नी मेहकुष्ठहरी सरा ॥ १३७ ॥

*Viśālā* **(Trichosanthes bracteata Voigt)**

*Viśālā* alleviates *kapha* and *vāta*. It cures *meha* (obstinate urinary disorders including diabetes) and *kuṣṭha* (obstinate skin diseases including leprosy). It is laxative.

सारिवा वातपित्तास्रविषमज्वरनाशिनी ।

*Sārivā* **(Hemidesmus indicus R. Br.)**

*Sārivā* alleviates *vāta*, *pitta* and blood. It cures *viṣama jvara* (malarial fever).

88

गवादनी त्वक्शोषघ्नी शोफ-कुष्ठव्रणापहा ॥१३८॥

*Gavādanī*

*Gavādanī* cures *tvak śoṣa* (emaciation or dryness of skin), *śopha* (oedema), *kuṣṭha* (obstinate skin diseases including leprosy) and *vraṇa* (ulcer).

अनंता ग्राहिणी रक्तपित्तप्रशमनी हिमा ।

*Anantā* **(Cryptolepis buchanani Roem. and Schult.)**

*Anantā* is constipative. It cures *raktapitta* (a disease characterised by bleeding from different parts of the body). It is cooling.

चक्षुष्या मूत्रकृच्छ्रघ्नी गुन्द्रा पित्तास्रदाहनुत् ॥१३९॥

*Gundrā* **(Typha elephantina Roxb.)**

*Gundrā* promotes eyesight. It cures *mūtrakṛcchra* (dysuria), aggravated *pitta* and blood and *dāha* (burning syndrome).

लोध्रोऽसृक्कफपित्तघ्नश्चक्षुष्यः शोथजित्सरः ।

*Lodhra* **(Symplocos crataegoides Buch.—Ham.)**

*Lodhra* alleviates vitiated blood, *kapha* and *pitta.* It promotes eyesight and cures *śotha* (oedema). It is laxative.

तद्वत्सावररोध्रोऽपि चक्षुष्यो मृदुरेचनः ॥ १४० ॥

*Sāvara Lodhra* **(Symplocos racemosa Roxb.)**

*Sāvara lodhra* shares the properties of *lodhra.* Besides, it promotes eyesight and is a mild purgative.

89

**मधुकं** रक्तपित्तघ्नं व्रणशोधनरोपणम् ।

गुरुः स्वादुर्हिमं वृष्यं चक्षुष्यं स्वरवर्णकृत् ॥१४१॥

*Madhuka* **(Glycyrrhiza glabra Linn.)**

*Madhuka* cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It cleanses and heals the ulcer (*vraṇa*). It is heavy, sweet, cooling, aphrodisiac and promoter of eyesight, voice and complexion.

**प्रपौण्डरीकं** चक्षुष्यं शिशिरं व्रणरोपणम् ।

*Prapauṇḍarīka*

*Prapauṇḍrīka* promotes eye sight. It is cooling and it heals ulcer.

**मंजिष्ठा** कुष्ठवीसर्पशोथघ्नी वर्णदा परम् ॥१४२॥

*Mañjiṣṭhā* **(Rubia cordifolia Linn.)**

*Mañjiṣṭhā* cures *kuṣṭha* (obstinate skin diseases including leprosy), *visarpa* (erysipelas) and *śotha* (oedema). It is an excellent drug for the promotion of complexion.

**लाक्षा** भग्नविसर्पघ्नी वर्ण्या त्वग्दोषनाशिनी ।

*Lākṣā* **(Lac)**

*Lākṣā* helps in the healing of fracture. It cures *visarpa* (erysipelas). It promotes complexion and cures skin diseases.

90

**मुशली** मधुरा वृष्या वीर्योष्णा बृंहणी गुरुः ॥१४३॥

तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा ।

*Muśalī* **(Chlorophytum tuberosum Baker)**

*Muśalī* is sweet, aphrodisiac, hot in potency, *bṛṁhaṇī* (nourishing), heavy, bitter and rejuvenating. It cures *gudaja* (piles) and aggravated *vāyu*.

द्विधा शतावरी ज्ञेया कण्टकैरधरोत्तरैः ॥१४४॥

91

द्विविधा तु भवेद् ग्राह्या गुणैस्त्वेषां न संशयः ।

शीता कषाया मधुरा पथ्या वृष्या रसायनी ॥१४५॥

वातपित्तविबन्धघ्नी वर्णौजोबलवर्द्धिनी ।

*Śatāvarī* **(Asparagus racemosus Willd.)**

*Śatāvarī* is of two varieties. One variety has thorns below and the other has thorns above. Both of them are therapeutically useful and there should be no doubt about it. It is cooling, astringent, sweet, wholesome (*pathya*), aphrodisiac and rejuvenating. It cures aggravated *vāyu* and *pitta* as well as constipation. It promotes complexion, *ojas* (vital fluid?) and strength.

92

पार्थः पथ्यः क्षते भग्ने रक्तस्तम्भनवद्गुणैः ॥ १४६ ॥

*Pārtha* **(Terminalia arjuna W. & A.)**

*Pārtha* is useful in *kṣata* (phthisis), *bhagna* (fracture) and *raktastambhana* (coagulation of blood).

अस्थिभग्नेऽस्थिसंहारो हितो बल्योऽनिलापहः ।

*Asthi saṁhāra* **(Cissus quadrangularis Linn.)**

*Asthi saṁhāra* is useful in *asthi bhagna* (fracture of bone). It promotes strength and alleviates *vāyu*.

चक्षुष्यो मार्कवः केश्यः कफपाण्ड्वामयापहः ॥१४७॥

*Mṅrkava* **(Eclipta alba Hassk.)**

*Mārkava* promotes eye sight and hair growth. It cures vitiation of *kapha* and *pāṇḍu* (anemia).

कफामकामलाशोथक्रिमिघ्नी द्रोणपुष्पिका ।

*Droṇapuṣpīkā* **(Leucas cephalotes Spreng.)**

*Droṇapuṣpīkā* cures aggravated *kapha*, *āma*, *kāmalā* (jaundice), *śotha* (oedema) and *kṛmi* (parasitic infection).

शोषघ्नी विशदा कण्ठ्या विषघ्नी गिरिकर्णिका ॥१४८॥

*Girikarṇikā* **(Clitoria ternatea Linn.)**

*Girikarṇikā* cures *śoṣa* (consumption). It is *viśada* (non-slimy). It is useful for throat and it cures *viṣa* (poisoning).

कासजिद्वातशमनी वृश्चिकाली विषापहा ।

*Vṛścikālī* **(Pergularia extensa N. E. Br.)**

*Vṛścikālī* cures *kāsa* (bronchitis), aggravated *vāyu and viṣa* (poisoning).

दुग्धिकोष्णा गुरुर्वृष्या वातला गर्भकारिणी ॥१४९॥

93

स्वादुर्विष्टंभिनी चैव कफकुष्ठक्रमीन् जयेत् ।

*Dugdhikā* **(Euphorbia thymifolia Linn.)**

*Dugdhikā* is hot, heavy and aphrodisiac. It aggravates *vāyu* and promotes conception. It is sweet and constipative. It cures aggravated *kapha*, *kuṣṭha* (obstinate skin diseases including leprosy) and *kṛmi* (parasitic infection).

अहिंस्रा विषशोथघ्नी तद्गुणैव सुदर्शना ॥१५०॥

*Ahiṁsrā & Sudarśanā* **(Copparis sepiarin Linn. & Crinum) asiaticum Linn.)**

*Ahiṁsrā* cures *viṣa* (poisoning) and *śotha* (oedema). *Sudarśanā* has similar properties.

94

कासश्वासहरी भार्गी गुंजा कुष्ठव्रणापहा

*Bhārgī & Gujñā* **(Clerodendrum serratum Moon & Abrus precatorius Linn.)**

*Bhargī* cures *kāsa* (bronchitis) and *śvāsa* (asthma).

*Guñjā* cures *kuṣṭha* (obstinate skin diseases including

leprosy) and *vraṇa* (ulcer).

जयन्ती विषदोषघ्नी सैरीयः कफवातजित् ।।१५१।।

*Jayantī* & *Sairīya* (**Sesbania sesban Merr. & Barleria cristata Linn.**)

*Jayantī* cures *viṣadoṣa* (poisoning). *Sairīya* alleviates *kapha* and *vāta*.

वातरक्तहरी सोष्णा वृष्या बल्या प्रसारिणी ।

*Prasāriṇī* (**Paederia foetida Linn.**)

*Prasāriṇī* cures *vāta rakta* (gout). It is hot, aphrodisiac and strength promoting.

आमवातानिलास्रघ्नौ कोकिलाक्ष-कुलाहलौ ।।१५२।।

*Kokilākṣa* & *Kulāhala* (**Astercantha longifolia Nees & Blumea balsamifera DC.**)

*Kokilākṣa* and *Kulāhala* cure *āmavāta* (rheumatism) and *anilāsra* (gout).

धुत्तूरो मदवर्णाग्निवान्तिकृज्ज्वरकुष्ठनुत् ।

उष्णो गुरुर्व्रणश्लेष्मकं[95]डूकृमिविषापहः ।।१५३।।

*Dhuttūra* (**Datura stramonium Linn.**)

*Dhuttūra* produces *mada* (intoxication), *varṇa* (complexion), *agni* (digestive power) and *vānti* (vomiting). It cures *jvara* (fever) and *kuṣṭha* (obstinate skin diseases including leprosy). It is hot and heavy, It also cures *vraṇa* (ulcer), aggravated *kapha*, *kaṇḍū* (itching), *kṛmi* (parasitic infection) and *viṣa* (poisoning).

[96]हलिनी-करवीरौ च कुष्ठदुष्टव्रणापहौ ।

*Halinī and Karaivīra* (**Gloriosa superba Linn. & Nerium indicum Linn.**)

*Halinī* and *karavīra* cure *kuṣṭha* (obstinate skin diseases including leprosy) and *duṣṭa vraṇa* (obstinate type of ulcer).

ऊर्ध्वाधि·कफपित्तघ्नी कुष्ठमावर्त्तकी हरेत् ।।१५४।।

*Āvartakī* **(Helicteres isora Linn.)**

*Āvartakī* cures aggrevated *kapha* and *pitta* both from upper and lower parts of the body. It also cures *kuṣṭha* (obstinate skin diseases including leprosy).

कोशातकी कफार्शोघ्नी पक्वामाशयशोधिनी ।

*Kośātakī* **(Luffa acutangula Roxb.)**

*Kośātakī* cures aggravated *kapha* and *arśas* (piles). It cleanses both the *pakvāśaya* (colon) and *āmāśaya* (stomach including small intestine).

मेध्या ज्योतिष्मती तीक्ष्णा व्रणविस्फोटनाशिनी ॥१५५॥

*Jyotiṣmatī* **(Celastrus paniculatus Willd.)**

*Jyotiṣmatī* promotes intellect. It is sharp and it cures *vraṇa* (ulcer) and *visphoṭa* (pustular eruptions).

वयसः स्थापिनी ब्राह्मी मेधायुःस्मृतिवर्धिनी ।

*Brāhmī* **(Bacopa monnieri Pennell)**

*Brāhmī* prevents aging. It promotes intellect, longevity and memory.

कफवातास्रभूतघ्नी[97] वचायु[98] स्मृतिबुद्धिदा ॥१५६॥

*Vacā* **(Acorus calamus Linn.)**

*Vacā* cures aggravated *kapha, vāta* as well as blood and attacks by evil spirits (*bhūta*). It promotes longevity, memory and intellect.

[99]कुक्कुरुंद कटुस्तिक्तो ज्वररक्तकफापहः ।

*Kukkurunda*

*Kukkurunda* is pungent and bitter. It cures fever and vitiated blood and *kapha*.

शंखपुष्पी सरा तिक्ता मेध्या कृमिविषापहा ॥१५७॥

*Śaṅkhapuṣpī* **(Convolvulus pluricaulis Chois)**

*Śaṅkha puṣpī* is laxative and bitter. It promotes *medhā*

(intellect) and cures *kṛmi* (parasitic infection) and *viṣa* (poisoning).

'**हंसपादी** गुरु. शीता हन्ति रक्तगुरु( ? )व्रणान् ।

*Haṁsa pādī* **(Adiantum lunulatum Burm.)**

*Haṁsa pādī* is heavy and cooling. It alleviates vitiated blood and cures serious type (*guru*) of *vrana.*

**मुडी** तिक्ता कटुपाके वीर्योष्णा मधुरा लघु ॥१५८॥
100
मेध्या गण्डापचीकृच्छ्रक्रिमियोन्यर्तिपाण्डुनुत् ।'

*Muṇḍī* **(Sphaeranthus indicus Linn.)**

*Muṇḍī* is bitter in taste and pungent in *vipāka.* It is hot in potency, sweet and *laghu.* It promotes intellect (*medhā*) and cures *gaṇḍa* (goitre), *apacī* (cervical adenitis), *kṛcchra* (dysuria), *kṛmi* (parasitic infection), *yonyarti* (pain in female genital tract) as well as *pāṇḍu* (anemia).

**मालती** कफपित्तास्ररुग्व्रणक्रिमिकुष्ठनुत् ॥१५९॥

*Mālatī* **(Aganosma dichotoma K. Schum.)**

*Mālatī* cures aggravated *kapha, pitta* and blood, *ruk* (pain), *vraṇa* (ulcer), *kṛmi* (parasitic infection) and *kuṣṭha* (obstinate skin diseases including leprosy).

चक्षुष्या मुकुलं तस्यास्तत्पुष्पं कफपित्तनुत् ।

Its bud (*mukula*) promotes eyesight. Its flowers alleviate *kapha* and *pitta.*

**स्यान्नागदमनी** वर्ण्या लूतासर्पविषापहा ॥१६०॥

*Nāgadamanī* **(Artemisia vulgaris Linn.)**

*Nāgadamanī* promotes complexion and cures poisoning by *lutā* (venomous spider) and *sarpa* (snake).

**शिरीषो** विषवीसर्पस्वेदत्वग्दोषशोथजित् ।

*Śirīṣa* **(Albizzia lebbeck Benth.)**

*Śirīṣa* cures *viṣa* (poisoning), *vīsarpa* (erysipelas), *sveda*

(profuse sweating), *daurgandhya* (foul smell of body), *tvagdoṣa* (skin diseases) and *śotha* (oedema).

सिक्थकं व्रणवीसर्पकुष्ठवातास्रजित् परम् ॥१६१॥

*Sikthaka*

*Sikthaka* is an excellent cure for *vraṇa* (ulcer), *vīsarpa* (erysipelas), *kuṣṭha* (obstinate skin diseases including leprosy) and *vātāsra* (gout).

आफूकं शोषणं ग्राही श्लेष्मघ्नं वातपित्तलम् ।

*Āphūka* **(Papaver somniferum Linn.)**

*Āphūka* (opium) is *śoṣaṇa* (drying) and *grāhī* (constipative). It alleviates *kapha* and aggravates *vāta* as well as *pitta*.

वृष्यो बल्यः खसतिलः श्लेष्मलो व तजिद्गुरुः ॥१६२॥

*Khasa tila* (seeds inside the poppy pod) is aphrodisiac and strength promoting. It aggravates *kapha* and alleviates *vāyu*. It is heavy.

वल्कलस्तत्फलोद्भूतो रूक्षो ग्राही विशोषणः ।

The *valkala* (outer layer) of the poppy pod is ununctuous, *grāhī* (constipative) and *viśoṣaṇa* (excessively drying).

रक्तपित्तहरी **दूर्वा** कंडूत्वग्दोषनाशिनी ॥ १६३ ॥

*Dūrvā* **(Cynodon dactylon Pers.)**

*Dūrvā* cures *rakta pitta* (a disease characterised by bleeding from different parts of the body), *kaṇḍū* (itching) and *tvagdoṣa* (skin disease).

101

पाडूमेहापचीपिल्लत्वग्दोषकृमिजिन्निशा ।

कफपित्तहरी शोथकंडूकुष्ठव्रणापहा ॥१६४॥

*Niśā* **(Curcuma longa Linn.)**

*Niśā* cures *pāṇḍu* (anemia), *meha* (obstinate urinary disorders including diabetes), *apacī* (cervical adenitis), *pilla*

type of eye disease), *tvagdoṣa* (skin disease) and *kṛmi* (parasitic infection). It alleviates *kapha* and *pitta* and cures *śotha* (oedema), *kaṇḍū* (itching), *kuṣṭha* (obstinate skin diseases including leprosy) and *vraṇa* (ulcer).

तद्वद्दार्वी विशेषेण कफाभिष्यन्दनाशिनी ।

*Dārvī* **(Berberis aristata DC.)**

*Dārvī* shares the properties of *niśā*. It is specially useful for curing *abhiṣyanda* (conjunctivitis) caused by *kapha*.

त्वग्दोषमारुतश्लेष्मविषप्रशमनं स्मृतम् ॥१६५॥

अवल्गुजं फलं, तद्वत्प्रपुन्नाटस्य चोच्यते ।

'कुष्ठगुल्मोदरार्शोघ्न कटुपाके तथैव च ॥ १६६ ॥

*Avalguja* **(Psoralea corylifolia Linn.)**

The fruit of *avalguja* cures *tvagdoṣa* (skin disease), aggravated *vāyu* and *kapha* and *viṣa* (poisoning).

*Prapunnāḍa* **(Cassia tora Linn.)**

*Prapunnāḍa* shares the properties of *avalguja*. Moreover, it cures *kuṣṭha* (obstinate skin diseases including leprosy), *gulma* (phantom tumour), *udara* (obstinate abdominal diseases including ascitis) and *arśas* (piles). It is pungent in *vipāka*.

102

करंजकिंशुकारिष्टफलं जंतु प्रमेहजित् ।'

रूक्षोष्णं कटुकं पाके लघुवातकफापहम् ॥ १६७ ॥

*Karañja*, *kiṁśuka* & *Ariṣṭa* **(Pongamia pinnata Merr., Butea monosperma Kuntze and Sapindus trifoliatus Linn.)**

The fruits of *karañja*, *kiṁśuka* and *ariṣṭa* cure *jantu* (parasitic infection) and *prameha* (obstinate urinary disorders including diabetes). They are ununctuous, hot, pungent in *vipāka* and light. They alleviate *vāta* and *kapha*.

तिक्तमीषद्विषहितं विडङ्गं कृमिनाशनम् ।

*Viḍaṅga* **(Embelia ribes Burm. f.)**

*Viḍaṅga* is slightly bitter. It is useful in the treatment

of poisoning and it cures *kṛmi* (parasitic infection).

[103]आस्फोता विषकुष्ठघ्नी [104]तिनिशा दाहपित्तनुत् ॥१६८॥

*Āsphotā* & *Tiniśā* **(Vallaris solanacea O. Ktze. & Ougeinia dalbergioides Benth.)**

*Āsphotā* cures *viṣa* (poisoning) and *kuṣṭha* (obstinate skin diseases including leprosy).

*Tiniśā* cures *dāha* (burning syndrome) and aggravated *pitta.*

[105]असनः कफपित्तघ्न शिंशपा दाहशोथनुत् ।

*Asana and Śiṁśapā* **(Pterocarpus marsupium Roxb. & Dalbergia sissoo Roxb.)**

*Asana* alleviates *kapha* and *pitta. Śiṁśapā* cures *dāha* (burning syndrome) and *śotha* (oedema).

धातकी रक्तपित्तघ्नी कदरो दन्तदार्ढ्यकृत् ॥ १६९॥

*Dhātakī* & *Kadara* **(Woodfordia fruticosa Kurz. & Acacia suma Buch.—Ham.)**

*Dhātakī* cures *raktapitta* (a disease characterised by bleeding from different parts of the body).

*Kadara* makes teeth strongly embedded in the gums (*danta dārḍhya kṛt*).

अपामार्गोऽग्निकृत्तीक्ष्णः सिन्दुवारोऽनिलापहः ।

*Apāmārga and Sinduvāra* **(Achyranthes aspera Linn. & Vitex trifolia Linn.)**

*Apāmārga* stimulates digestion and it is sharp.

*Sinduvāra* alleviates *vāyu.*

लज्जालुः शीतला तिक्ता कषाया [106]श्लेष्मपित्तहृत् ॥१७०॥
रक्तपित्तमतीसारं [107]योनिदोषं विनाशयेत ।

*Lajjālu* **(Mimosa pudica Linn.)**

*Lajjālu* is cooling, bitter and astringent. It alleviates *kapha* and *pitta.* It cures *raktapitta* (a disease characterised by bleeding from different parts of the body), *atisāra* (diarrhoea) and *yonidoṣa* (diseases of the female genital tract).

वंशो[108] व्रणास्रसंहारो[109] भेदनः शोथनाशनः ॥ १७१ ॥

*Vaṁśa* **(Bambusa bambos Druce)**

*Vaṁśa* cures *vraṇa* (ulcer) and vitiated blood. It is purgative and it cures *śotha* (oedema).

**रोहीतको** यकृत्प्लीहगुल्मोदरहरः सरः ।

*Rohitaka* **(Tecomella undulata Seem.)**

*Rohitaka* cures diseases of *yakṛt* and *plīhan, gulma* (phantom tumour) and *udara* (obstinate diseases of the abdomen including ascitis). It is laxative.

शोथामकफवातघ्नो[110] **वृहद्दारो** रसायनः ॥ १७२ ॥

*Vṛhaddāra* **(Argyreia speciosa Sweet)**

*Vṛhaddāra* cures *śotha* (oedema), *āma* and aggravated *kapha* as well as *vāta.* It is ıejuvenating.

भूयो[111] व्रणकफास्रघ्नः **तगर.** कुष्ठवद्गुणैः ।

*Tagara* **(Valeriana wallichii DC.)**

*Tagara* shares the properties of *kuṣṭha.* It is specifically useful in curing *vraṇa* (ulcer) and vitiated *kapha* as well as blood.

कफवातहरी **कौन्ती** दीपनी न च पित्तकृत् ॥१७३॥

*Kauntī* **(Vitex agnus-costus Linn.)**

*Kauntī* alleviates *kapha* and *vāta.* It stimulates digestive power. It does not aggravate *pitta.*

**श्रीवासः सरलं बोलः कुन्दरुर्ग्रन्थिपर्णकम् ।**
**तुरुष्कं सिह्लकं[112] स्पृक्का[113] गुन्द्रा सर्जोमुरा नखम्** ॥ १७४॥

सर्वेऽमी पावनालक्ष्मीरक्षोघ्ना ज्वरनाशनाः ।

स्वादुतिक्तरसायुष्याः स्वेददौर्गन्ध्यनाशनाः ॥ १७५ ॥

*Śrīvāsa* **(Pinus roxburghii Sargent) etc.**

*Śrīvāsa, sarala, bola, kunduru, granthiparṇa, turuṣka, silhaka, spṛkkā, gundrā, sarja, murā* and *nakha*—all these drugs cure aggravated *vāyu, alakṣmī* (inauspiciousness), *rakṣa* (afflictions by *rakṣas*) and *jvara* (fever). They are sweet and bitter in taste. They promote longevity. They cure *svedadaurgandhya* (foul smell because of excessive sweating).

'राला हिमा गुरुस्तिक्ता कषाया ग्रहणीं जयेत् ।
114
ग्रहसंस्वेदवीसर्पज्वरव्रणविपादिकाः' ॥ १७६ ॥

*Rālā*

*Rālā* is cooling, heavy, bitter, and astringent. It cures *grahaṇī* (sprue syndrome), *graha* (affliction by unfavourably situated planets), *saṁsveda* (excessive sweating), *vīsarpa* (erysipelas), *jvara* (fever), *vraṇa* (ulcer) and *vipādikā* (cracking of the sole of the feet).

पित्तास्रविषतृड्दाहकृमिघ्नं गुरु रुक्षणम् ।
115
सर्वं सतिक्तमधुरं चन्दनं शिशिरं परम् ॥ १७७ ॥

*Candana* (*Śveta and Rakta*) **(Santalum album Linn. & Pterocarpus santalinus Linn. f.)**

Both the varieties of *candana* cure vitiated *pitta* and blood, *viṣa* (poisoning), *tṛṭ* (morbid thirst), *dāha* (burning syndrome) and *kṛmi* (parasitic infection). They are heavy, ununctuous, bitter, sweet and exceedingly cooling.

मनोज्ञं चंदनं श्वेतं रक्तपित्तविषापहम् ।

हृद्यं प्रह्लादनीयं च सतिक्तमतिशीतलम् ॥१७८॥

*Śveta candana* is *manojña* (pleasing to the mind) and it cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *viṣa* (poisoning). It is *hṛdya*

(cardiac tonic), *prahlādanīya* (which gives comfort), bitter and exceedingly cooling.

चक्षुष्यं रक्तपित्तघ्नं व्रण्यं लोहितचंदनम् ।

*Lohita candana* promotes eyesight. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is useful in the treatment of ulcers (*vraṇya*).

116 117 118
पतंगं तिक्तमधुरं व्रण्यं पित्तकफास्रजित् ॥ १७९ ॥

*Pataṅga* **(Caesalpinia sappan Linn.)**

*Pataṅga* is bitter and sweet. It is *vraṇya* (useful in the treatment of ulcer). It alleviates *pitta*, *kapha* and blood.

119
पद्मकं कुष्ठविस्फोटज्वरदाहव्रणापहम् ।

*Padmaka* **(Prunus cerasoides D. Don.)**

*Padmaka* cures *kuṣṭha* (obstinate skin diseases including leprosy), *visphoṭa* (pustular eruption), *jvara* (fever), *dāha* (burning syndrome) and *vraṇa* (ulcer).

सेव्यं पित्तास्रजित्स्वेददाहदौर्गन्ध्यनाशनम् ॥१८०॥

*Sevya* **(Vetiveria zizanioides Nash)**

*Sevya* alleviates *pitta* and blood. It cures *sveda* (excessive sweating), *dāha* (burning syndrome) and *daurgandhya* (foul smell of body).

120
वातघ्नं कुंकुमं सोष्णं बल्यं त्वग्दोषनाशनम् ।

*Kuṁkuma* **(Crocus sativus Linn.)**

*Kuṁkuma* alleviates *vāyu*. It is hot. It promotes strength and cures *tvagdoṣa* (skin disease).

कस्तूरी छर्दिदौर्गन्ध्यवातालक्ष्मीमलापहा ॥१८१॥

*Kastūrī* **(musk)**

*Kastūrī* cures *chardi* (vomiting), *daurgandhya* (foul smell of the body), aggravated *vāyu*, *alakṣmī* (inauspiciousness) and *mala* (excessive excretion of waste products).

कटुतिक्तोष्णमगुरु स्निग्धं वातकफापहम् ।

*Aguru* **(Aquilaria agallocha Roxb.)**

*Aguru* is pungent, bitter, hot and unctuous. It alleviates *vāyu* and *kapha.*

स्निग्धोष्णं कटुकं पाके सुरदार्वनिलापहम् ॥१८२॥

*Suradāru* **(Cedrus deodara Loud.)**

*Suradāru* is unctuous, hot and pungent in *vipāka.* It alleviates *vāyu.*

कत्तृणं तिक्तमधुरं वातश्लेष्मविषापहम् ।

*Kattṛṇa* **(Cymbopogon citratus Stapf.)**

*Kattṛṇa* is bitter and sweet. It alleviates *vāyu* and *kapha,* and cures *viṣa* (poisoning).

कुष्ठं सतिक्तमधुरं वातश्लेष्मविषापहम् ॥ १८३ ॥

*Kuṣṭha* **(Saussurea lappa C.B. Clarke.)**

*Kuṣṭha* is bitter and sweet. It alleviates *vāyu* and *kapha,* and cures *viṣa* (poisoning).

121

'शटी वातकफश्वासकासज्वरहरा मता' ।

*Śaṭī* **(Hedychium spicatum Ham. ex. Smith.)**

*Śaṭī* alleviates *vāyu* and *kapha.* It cures *śvāsa* (asthma), *kāsa* (bronchitis) and *jvara* (fever).

सुगन्धिः कटुको हृद्यः कंकोलः कफवातजित् ॥१८४॥

*Kaṅkola* **(Piper cubeba Linn. f.)**

*Kaṅkola* is fragrant, pungent and cardiac tonic. It alleviates *kapha* and *vāta.*

122

तद्वज्जातीफलं प्रोक्तं भ्रमपित्तकरं परं ।

*Jātīphala* **(Myrstica fragrans Houtt.)**

*Jātīphala* shares the properties of *kaṅkola.* In addition it causes *bhrama* (giddiness) and aggravates *pitta.*

[123]
जातीकोशो लघुस्तिक्तः क्लेददौर्गन्ध्यजिन्मतः ।१८५।

*Jātikośa*

*Jātikośa* is light and bitter. It cures *kleda* and *daurgandhya* (foul smell of the body).

सतिक्तः कटुकश्चैव बलासस्य विनाशनः ।

कर्पूरः शीतलः पाके चक्षुष्यः कफनाशनः ॥१८६॥

*Karpūra* **(Cinnamomum camphora Nees. & Eberm)**

*Karpūra* is bitter and pungent. It alleviates *kapha*. It is cooling in *vipāka* (?). It promotes eyesight and is an expectorant.

'पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्तरम् ।

तत्रापि स्याद्यदक्षुद्रं स्फटिकाभं तदुत्तमम् ॥१८७॥

*Apakva karpūra* is better than *pakva karpūra*. There, also, *karpūra* which is not in small pieces and which is like crystal is the best.

पक्वं च सदलं स्निग्धं हरितद्युति चोत्तमम् ।

भङ्गे मनागपि न चेन्निपतन्ति कणास्ततः ॥१८८॥

*Pakva karpūra* which is in pieces (*sadala*), which is unctuous and which has greenish tinge is the best provided granules (even in small quantity) do not fall out of it when broken into pieces.

[124]
तिक्तदाहास्यवैरस्य मेद-शोथ-विषापहः ।'

It cures *dāha* (burning syndrome), *āsya vairasya* (distaste in mouth), *medas* (adiposity), *śotha* (oedema) and *viṣa* (poisoning).

[125]
'राष्णा हिमा गुरुस्तिक्ता कषाया ग्राहि[णी] जयेत् ॥१८९॥

[126]
ग्रहास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ।'

*Rāsnā* **(Pluchea lanceolata Oliver & Hiern.)**

*Rāsnā* is cooling, heavy, bitter, astringent and constipative. It cures *graha* (afflictions by evil spirits), vitiated blood, *sveda* (excessive sweating), *vīsarpa* (erysipelas), *jvara* (fever), *vraṇa* (ulcer) and *vipādikā* (cracking of the soul of the feet.)

127

एला तृट्छर्दिहृल्लासकंडूपित्तकफापहा ॥१६०॥

*Elā* **(Amomum subulatum Roxb.)**

*Elā* cures *tṛṭ* (morbid thirst), *chardi* (vomiting), *hṛllāsa* (nausea), *kaṇḍū* (itches) and aggravated *pitta* as well as *kapha.*

सूक्ष्मैला मूत्रकृच्छ्रार्शःश्वासकासकफे हिता ।

*Sūkṣmailā* **(Elettaria cardamomum Maton.)**

*Sūkṣmailā* is useful in *mūtrakṛcchra* (dysuria), *arśas* (piles), *śvāsa* (asthma), *kāsa* (bronchitis) and aggravation of *kapha.*

विबन्धानाहशूलघ्नं लवङ्गं भुक्तपाचनम् ॥ १६१ ॥

*Lavaṅga* **(Syzygium aromaticum Merr. & L.M.)**

*Lavaṅga* cures *vibandha* (constipation), *ānāha* (flatulence) and *śūla* (colic pain). It helps in the digestion of food.

चक्षुष्या मुखरोगघ्नी लताकस्तूरिका हिमा ।

*Latā kastūrikā* **(Hibiscus abelmoschus Linn.)**

*Latā kastūrikā* promotes eye sight and cures diseases of mouth. It is cooling.

128

कट्फलं मुखरोगघ्नं कासश्वासक्षयापहम् ॥१६२॥

*Kaṭphala* **(Myrica nagi Thunb.)**

*Kaṭphala* cures diseases of mouth, *kāsa* (bronchitis), *śvāsa* (asthma) and *kṣaya* (consumption).

मदनो वामनः तिक्त वीर्योष्णो लेखनो लघुः ।

रूक्षः कुष्ठकफानाहशोफगुल्मव्रणापहः ॥ १६३ ॥

*Madana* **(Randia dumetorum Lam.)**

*Madana* is emetic, bitter, hot in potency, *lekhana* (scraping), light and ununctuous. It cures *kuṣṭha* (obstinate skin diseases including leprosy,) aggravated *kapha*, *ānāha* (flatulence), *śopha* (oedema), *gulma* (phantom tumour) and *vraṇa* (ulcer).

शताह्वानिलदाहास्रशूलतृट्छर्दिनाशिनी ।

मधुरा रोचनी वृष्या दाहासृक्पित्तनाशिनी ॥१९४॥

*Śatāhvā* **(Foeniculum vulgare Mill.)**

*Satāhvā* cures aggravated *vāyu*, *dāha* (burning syndrome), vitiated blood, *śūla* (colic pain), *tṛṭ* (morbid thirst) and *chardi* (vomiting). It is sweet, *rocana* (appetiser) and aphrodisiac. It alleviates *pitta*.

फलिनी गात्रदौर्गन्ध्यरक्तपित्तज्वरापहा ।

*Phalinī* **(Prunus mahaleb Linn.)**

*Phalinī* removes *gātra daurgandhya* (foul smell of the body) and cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *jvara* (fever).

129

शस्ता शोणितपित्तातियोगे गन्धप्रियंगुका ॥ १९५ ॥

*Gandha priyaṅgu* **(Callicarpa macrophylla Vahl)**

*Gandha priyaṅgu* is useful in the acute form of *śoṇita pitta* (a disease characterised by bleeding from different parts of the body).

हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः ।

130

पित्तोदरसमीरार्शो-ग्रहणी-गुल्म-शूलहृत् ॥१९६॥

*Hapuṣā* **(Juniper communis Linn.)**

*Hapuṣā* is digestive stimulant, bitter, pungent, hot, saline and heavy. It cures aggravated *pitta*, *udara* (obstinate abdominal diseases including ascitis), aggravated *vāyu*, *arśas* (piles), *grahaṇī* (sprue syndrome), *gulma* (phantom tumour) and *śūla* (colic pain).

131 132
'राष्णोष्णा वातशोथामवातवातामयान् जयेत् ।

*Rāsṇā* **(Alpinia gulanga Willd.)**

*Rāsṇā* is hot. It cures aggravated *vāyu*, *śotha* (oedema), *āmavāta* (rheumatism) and *vātāmaya* (diseases caused by the vitiation of *vāyu*).

पौष्करं पार्श्वरुक्श्वासकासहिक्काज्वरापहा ॥१९७॥

*Pauskara* **(Inula racemosa Hook. f.)**

*Pauṣkara* cures *pārśvaruk* (pain in the sides of chest), *śvāsa* (asthma), *kāsa* (bronchitis), *hikkā* (hiccup) and *jvara* (fever).

133
शृङ्गी कफानिलश्वासकासहिक्काज्वरापहा ।

*Śṛṅgī* **(Pistacia integerrmia Stew. ex Brandis)**

*Śṛṅgī* cures aggravated *kapha* as well as *vāyu*, *śvāsa* (asthma), *kāsa* (bronchitis), *hikkā* (hiccup) and fever (*jvara*).

134
वरांगं कफशुक्रामवातघ्नं मधुरं कटु ॥ १९८ ॥

विषतृट्छर्दिहृल्लासकफपित्तविसर्पनुत् ।

*Varāṅga* **(Cinnamomum zeylanicum Blume.)**

*Varāṅga* alleviates *kapha* and reduces semen. It cures *āmavāta* (rheumatism). It is sweet and pungent. It cures *viṣa* (poisoning), *tṛṭ* (morbid thirst), *chardi* (vomiting), *hṛllāsa* (nausea), aggravated *kapha* as well as *pitta* and *visarpa* (erysipelas).

135
त्वग्दोषस्वेददौर्गन्ध्यनाशनो नागकेसरः ॥ १९९ ॥

*Nāgakesara* **(Mesua ferrea Linn.)**

*Nāgakesara* cures *tvagdoṣa* (skin diseases), *sveda* (excessive sweating) and *daurgandhya* (foul smell of the body).

136
पत्रकं कफवाताशोंहृल्लासारोचकापहम् ।

*Patraka* **(Cinnamomum tamala Nees and Eberm.)**

*Patraka* alleviates *kapha* and *vāta* and cures *arśas* (piles), *hṛllāsa* (nausea) and *arocaka* (anoxeria).

**तालीसपत्रं** तीक्ष्णोष्ण [137] कफवातक्षयापहम् ।। २०० ।।

पित्तकृत्स्रंसनं स्वर्यं वह्निकृद्वक्त्रशोधनम् [।

*Tālisa patra* **(Abies webbiana Lindl.)**

*Tālisa patra* is sharp and hot. It alleviates *kapha* and *vāta*. It cures *kṣaya* (consumption). It aggravates *pitta*. It is laxative (*sraṁsana*). It promotes good voice and digestive power. It also cleanses mouth.

कषाया मधुरा रूक्षा कासघ्नी [138] **वंशरोचना** ।। २०१ ।।

*Vaṁśa rocanā* **(Bamboo manna.)**

*Vaṁśa rocanā* is astringent, sweet and ununctuous. It cures *kāsa* (bronchitis).

**तुंगाक्षीरी** क्षयश्वासकासघ्नी मधुरा हिमा ।

*Tugākṣīrī*

*Tugākṣīrī* cures *kṣaya* (consumption), *śvāsa* (asthma) and *kāsa* (bronchitis). It is sweet and cooling.

**बासकः** कासवैस्वर्यं रक्तपित्तकफापहः ।। २०२ ।।

'तृषाश्वास [139] ज्वरच्छर्दि [140] मेहकुष्ठक्षयापहः ।

*Vāsaka* **(Adhatoda vasica Nees)**

*Vāsaka* cures *kāsa* (bronchitis), *vaisvarya* (impairment of voice), *raktapitta* (a disease characterised by bleeding from different parts of the body), aggravated *kapha*, *tṛṣā* (morbid thirst), *śvāsa* (asthma), *jvara* (fever), *chardi* (vomiting), *meha* (obstinate urinary disorders including diabetes), *kuṣṭha* (obstinate skin diseases including leprosy) and *kṣaya* (consumption).

**कुमारी भेदनी** शीता यकृत्प्लीहकफज्वरान् ।।२०३।।

निहन्ति वह्निविस्फोटपित्तरक्तत्वगामयान् ।

*Kumārī* **(Aloe barbadensis Mill.)**

*Kumārī* is *bhedana* (purgative) and cooling. It cures *yakṛt* (diseases of liver), *plihan* (diseases of spleen), aggravated *kapha*, *jvara* (fever), *vahni visphoṭa* (carbuncle), aggravated *pitta* as well as *rakta* and *tvagāmaya* (diseases of skin).

बल्याऽमृता त्रिदोषघ्नी ग्राहिण्युष्णारसायनी ॥२०४॥
141
दीपनी तृट्ज्वरच्छर्दिकामलावातरक्तजित् ।
कटुतिक्ता स्वादुपाका लघ्वी दाहामकुष्ठनुत् ॥२०५॥

*Amṛtā* **(Tinospora cordifolia Miers)**

*Amṛtā* promotes strength. It alleviates all the three *doṣas*. It is *grāhī* (constipative), hot, rejuvenating and digestive stimulant. It cures *tṛt* (morbid thirst), *jvara* (fever), *chardi* (vomiting), *kāmalā* (jaundice) and *vāta rakta* (gout). It is pungent, bitter, sweet in *vipāka* and light. It also cures *dāha* (burning syndrome), *āma* and *kuṣṭha* (obstinate skin diseases including leprosy).

**शालिपर्णीपृश्निपर्णीबृहतीद्वयगोक्षुरम्** ।
वातपित्तहरं वृष्यं **कनीयः पञ्चमूलकम्** ॥२०६॥

*Daśamūla*

*Śāliparṇī*, *pṛśni parṇī*, *bṛhatī*, *kaṇṭakārī* and *gokṣura*—these five drugs taken together, are called *kanīyas pañcamūla*. It alleviates *vāyu* and *pitta* and it is aphrodisiac.

[**श्रीफलः सर्वतोभद्रा पाटला गणिकारिका** ।
142
**श्योनाकः** पञ्चभिश्चैतैः **पञ्चमूलं महन्मतम्** ॥२०७॥]

*Śrīphala*, *sarvato bhadrā*, *pāṭalā*, *gaṇikārikā* and *śyonāka*—these five drugs taken together are called *mahat pañcamūla*.

एताभ्यां पञ्चमूलाभ्यां **दशमूलमुदाहृतम्** ।
दोषत्रय-श्वासकासशिरःपीडापतन्त्रकान् ।
तन्द्रीशोथज्वरानाहारुचिपार्श्वरुजो जयेत् ॥२०८॥

All these ten drugs included both in *kanīyas pañcamūla* and *mahat pañcamūla* taken together are called *daśamūla.* It cures *doṣa traya* (aggravated *vāyu*, *pitta* and *kapha*), *śvāsa* (asthma), *kāsa* (bronchitis), *śiraḥ pīḍā* (headache), *apatantraka* (convulsion), *tandrī* (drowsiness), *śotha* (oedema), *jvara* (fever). *ānāha* (tymphanitis), *aruci* (anorexia) and *pārśva ruk* (pain in the sides of the chest).

मन्याहनुश्रवणलोचननासिकास्यभ्रूशंखदन्तगलतालुशिरोविकारान् ।

कुष्ठानि हन्ति दशमूलकषायपीतं क्वाथेन वा सहफलत्रितयोद्भवेन ॥२०९॥

Decoction of these ten drugs belonging to the group of *daśamūla* or the decoction of *harītakī, bibhītaka* and *āmalakī* (*triphalā*) along with these ten drugs belonging to *daśamūla* group cures diseases of *manyā* (sternomastoid region), *hanu* (mandibles), *śravaṇa* (ears), *locana* (eyes), *nāsikā* (nose), *āsya* (mouth), *bhrū* (eye brows), *śaṅkha* (temporal region), *danta* (teeth), *gala* (throat), *tālu* (palate) and *śiras* (head). It also cures *kuṣṭha* (obstinate skin diseases including leprosy).

143

**न्यग्रोधोदुम्बराश्वत्थपारिषप्लक्ष**पादपाः ।

पञ्चैते **क्षीरिणो वृक्षा**स्तेषां त्वक् **पञ्चवल्कलम्** ॥२१०॥

*Pañca kṣīri vṛkṣa* **and** *Pañca valkala*

*Nyagrodha, udumbara, aśvattha, pāriṣa* and *plakṣa*—these five are called *kṣīri vṛkṣas* (trees having milky latex). Barks of all these five trees taken together are called *pañca valkala.*

144

केचित्तु पारिषस्थाने **शिरीषं वेतसं** परम् ।

Some physicians use *śirīṣa* and some others use *vetasa* in the place of *pārışa* included ın this group of drugs.

**क्षीरिवृक्षाः** हिमाः वर्ण्याः योनिदोषव्रणापहाः ॥२११॥

रूक्षाः कषायाः मेदोघ्नाः वीसर्पामयनाशनाः ।

शोथपित्तकफास्रघ्नाः स्तन्यभग्नास्थियोगदाः ।

*Kṣīri vṛkṣas* are cooling. They promote complexion (*varṇya*) and cure *yoni doṣa* (ailments of the female genital tract) and *vraṇa* (ulcer). They are ununctuous, and astringent. They cure *medas* (adiposity), *visarpa* (erysipelas), *śotha* (oedema) and vitiated *pitta, kapha* as well as blood. They promote lactation and help in the union of fractured bones.

त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् ॥२१२॥

*Pañca valkala* is cooling and constipative. It cures *vraṇa* (ulcer), *śotha* (oedema) and *visarpa* (erysipelas).

**अथ धातूपधातु-रसोपरस-रत्नोपरत्न-विषोपविषगुणाः**

**तत्रधातुलक्षणम्**

'स्वर्ण तारं च ताम्रं च वंगं नागस्तु पञ्चमः ।
145
रीतिका च तथा कांस्यं लोहं चेत्यष्टधातवः ॥२१३॥

**Properties of** *Dhātu, Upadhātu, Rasa, Uparasa, Ratna, Uparatna, Viṣa* **and** *Upaviṣa.*

**Description of** *Dhātus*

*Svarṇa* (gold), *tāra* (silver), *tāmra* (copper) *vaṅga* (tin), *nāga* (lead), *rītikā* (bell metal), *kāṁsya* (brass), *loha* (iron) —these eight are called *dhātus*.

'वलीपलितखालित्यकार्श्याबल्यजरामयान् ।
146
निवार्यंनृणां दधति देहं तद्धातवो मताः ॥२१४॥

[भाव प्रकाशः पूर्वखण्डः धात्वादिवर्ग ८:२]

They are called *dhātus* because they sustain (*dadhati*) the body of human beings by curing *valī* (premature wrinkles), *palita* (premature graying of hair), *khālitya* (baldness), *kārśya* (emaciation), *abalya* (weakness), *jarā* (old age) and *āmaya* (diseases).

**सुवर्णोत्पत्तिलक्षणगुणाः —**

'पुरा निजाश्रमस्थाना सप्तर्षीणां जितात्मनाम् ।

पत्नीं विलोक्य लावण्यलक्ष्मीःसम्पन्नयौवनाः ॥२१५॥

कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः ।

पतित यद्धरापृष्ठे रेतस्तद्धेमतामगात्[147] । २१६ ॥

कृत्रिमञ्चापि भवति तद्रसेन्द्रस्य वेधतः ।

## Origin and description of Gold

**Mythology**

In the days of yore, *Jātavedas* (Agni or Fire god) became passionately excited when he saw the extremely beautiful, auspicious and youthful wives of the self controlled seven sages (*Saptarṣis*) in their hermitages. The semen he, thus, ejaculated fell upon the earth which became gold. Gold is also prepared artificially by the *vedhana* (a specific method of processing) of mercury.

दाहे रक्तं सित छेदे निकषे[148] कुङ्कुमप्रभम् ॥ २१७ ॥

तार शुल्वोत्थितं[149] स्निग्धं मृदु तद्गुरु शस्यते[150] ।

**Good quality**

The gold which becomes red when burnt, white when cut and like saffron when rubbed over *nikaṣa* (a specific type of stone used for testing the genuineness of gold), which is prepared out of silver or copper and which is unctuous, soft and heavy is the best.

श्वेताङ्गं[151] कठिनं रूक्ष विवर्णं समलं दलम्[152] ॥ २१८ ॥

दाहे छेदेऽसितं श्वेतं घर्षेऽस्फुट[153] लघु त्यजेत् ।

**Bad quality**

The gold which is partially white, hard, ununctuous and discoloured, which is associated with impurities, which has pieces like leaves, which becomes black in burning or cutting, which does not produce clear colour when rubbed over *nikaṣa* and which is light should not be used in medicine.

सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम्' ।। २१९ ।।

[भावप्रकाशः पूर्वखण्डः धातूपधातुवर्ग ८ : ३-५ ८-१०]

स्वादुपाकरसं तिक्तं हृद्यं तु वरलेखनम् ।
'पवित्रं बृंहणं नेत्र्य[154] मेधास्मृतिविशुद्धिदम् ।। २२० ।।
हृद्यमायुष्करं[155] कान्तिवाग्विशुद्धिस्थिरत्वकृत् ।
विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित ।। २२१ ।।

**Property**

Gold is cooling, aphrodisiac, strength promoting, heavy, rejuvenating, sweet in *vipāka* and taste, bitter, cardiac tonic exceedingly depleting (*vara lekhana), pavitra* (remover of sins), nourishing and promoter of eye sight. It purifies intellect and memory, and promotes longevity. It also purifies complexion and voice. It causes steadiness. It cures both the types of *viṣa* (poisoning), *kṣaya* (consumption), *unmāda* (insanity), vitiation of all the three *doṣas, jvara* (fever) and *śoṣa* (phthisis).

बलं सवीर्यं हरते नराणां रोगव्रजं[156] पोषयतीह काये ।
असौख्यकार्यं च सदैव हेमापक्वं सदोषं मरणं करोति ।। २२२ ।।

**Adverse effects**

When gold is used without proper processing, it takes away strength and energy, helps manifestation of several diseases, causes discomfort and because of its toxicity even causes death.

त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः ।
निरीक्षयामास शिवः क्रोधेन परिपूरितः ।। २२३ ।।
ततस्तूल्का[157] समापतत्तस्यैकस्माद्विलोचनात् ।
तस्माद्रुद्रः[158] समभवद्वैश्वानर इव ज्वलन् ।। २२४ ।।
द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तु वामकात् ।

159
तस्माद्रजतमुद्भूतमुक्तकर्मसु संस्थितम् ॥ २२५ ॥
[भावप्रकाशः पूर्वखण्डः धातूपधातुवर्ग ८ : ११-१२, १४-१६]

## Silver

### Mythology

When lord *Śiva*, full of anger, looked without twinkling of eyes for killing the demon *Tripura*, then from one of his eyes a meteor (*ulkā*) fell down which gave birth to *Rudra* who was dazzling like fire. From the left eye drops of tears fell down which gave birth to silver and this is used for all different purposes.

160
कृत्रिमं चापि तत्प्रोक्तं वंगादेः रसयोगतः ।

It is also prepared artificially by adding *vaṅga* (tin) etc., to processed mercury.

गुरुः स्निग्धं मृदु श्वेतं दाहच्छेदघनक्षमम् ॥२२६॥
161
वर्णाढ्यं चन्द्रवत्स्वच्छं तारे नवगुणाः स्मृताः ।

### Good quality

Heaviness, ununctuousness, softness, white colour, power to stand burning, cutting and pressure (*ghana*), good colour, pure appearance like moon—these are the nine qualities of good silver.

कठिनं कृत्रिमं रूक्षं रक्तं पीतदलं लघुः ॥२२७॥

दाहच्छेदघनैर्नष्टं रूप्ये दोषा दशस्मृताः ।

### Bad quality

Hardness, artificial preparation, ununctuousness, redness, yellowness, fragility (*dala*), lightness and getting destroyed by burning, cutting or pressure (*ghana*)—these are the ten defects in silver.

162
रूप्यं शीतं कषायाम्लं स्वादुपाकरसं सरम् ॥२२८॥

वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ।
प्रमेहादिकरोगांश्च नाशयत्यचिरं[163] ध्रुवम् ॥२२९॥

**Properties**

Silver is cooling, astringent and sour in taste, sweet both in *vipāka* and taste, and laxative. It prevents aging. It is unctuous and *lekhana* (depleting). It alleviates *vāta* and *pitta*. It certainly cures diseases like *prameha* (obstinate urinary disorders including diabetes).

तारं शरीरस्य करोति तापं विध्वसनं[164] यच्छति शुक्रनाशम् ।
सपाटवं[165] वीर्यबलं निहन्ति महान्गदान्पोपयतीत्यशुद्धम् ॥२३०॥

**Adverse effects**

*Aśuddha* (not propeıly processed) silver produces excessive heat (*tāpa*) in the body and causes its destruction. It destroys semen, efficiency, energy and strength. It gives rise to many serious diseases (*mahāgada*).

शुक्रं[166] यत्कार्तिकेयस्य पतितं धरणीतले ।
तस्मादेतत्समुद्भूतं ताम्रमाहुः पुराविदः ॥२३१॥

[भावप्रकाश पूर्वखण्डः धातूपधातुवर्ग ८:१७,१९-२२]

## *Tāmra* (Copper)

**Mythology**

According to scholars well versed in the *purāṇas*, the semen of *Kārtikeya* which fell on the earth gave rise to *tāmra* (copper).

कृष्णं[167] रूक्षमतिस्तब्धं श्वेत चापि घनासहम् ।
लौहनागयुत चेति शुल्वं[168] स्याद्दोषसप्तकम् ।

**Bad quality**

Black colour, ununctuousness, excessive compactness, white colour, inability to tolerate pressure (*ghana*), mixture of

iron and lead—these are the seven defects in copper of bad quality.

ताम्रं कषाय मधुरं सतिक्तं स्याद्रोपणं बृंहणमल्पमेव ।।२३२।।

[भावप्रकाश: पूर्वखण्ड: धातूपधातुवर्ग ८:२५-२६]

पित्तोदरार्शःकृमिकुष्ठपीनसश्लेष्मक्षयघ्नं ज्वरशूलनुद्धिमम् ।

**Properties**

Copper is astringent, sweet and bitter. It is *ropaṇa* (healer of ulcers) and slightly *bṛmhaṇa* (nourishing). It cures aggravated *pitta*, *udara* (obstinate abdominal diseases including ascitis), *arśas* (piles), *kṛmi* (parasitic infection), *kuṣṭha* (obstinate skin diseases including leprosy), *pīnasa* (chronic rhinitis), aggravated *kapha*, *kṣaya* (consumption), *jvara* (fever) and *śūla* (colic pain). It is cooling.

न विषं विषमित्याहुस्ताम्रं तु विषमुच्यते ।। २३३ ।।

एको दोषो विषे सम्यक् ताम्रे त्वष्टौ प्रकीर्तिता ।

भ्रमो मूर्च्छा विदाहश्च स्वेदोत्क्लेदनवान्तयः ।। २३४ ।।

अरुचिश्चित्तसंताप एते दोषा विषोपमाः ।

**Adverse effects**

It helps in the elimination of stool and urine. It vitiates all the three *doṣas* and causes burning sensation.

यत्सम्यग्घनता यातं व्यक्त स्वादुरसं भवेत् ।
[2]
अव्यक्ताम्लरस तत्तु स्वादुस्तज्ज्ञैरुदीरितम् ॥ ५ ॥

*Svādu*

When it gets properly condensed and there is the manifestation of a sweet taste it is called *svādu.* The sour taste in it is not manifested.

स्वादुः स्यादल्पाभिष्यन्दि वृष्यं मेदःकफापहम् ।

वातघ्न मधुरं पाके रक्तपित्तप्रसादनम्' ॥ ६ ॥

[भावप्रकाशः दधिवर्ग १५:१-६]
[3]
प्राभातिक तु मधुर वातपित्तनिबर्हणम् ।

*Svādu* is slightly *abhiṣyandi* (which obstructs the channels of circulation). It is aphrodisiac and it reduces *medas* (fat), *kapha* and *vāta.* It is sweet in *vipāka.* It produces more of blood and *pitta.* If this is taken during the early morning then it alleviates both *vāyu* and *pitta.*

'स्वाद्वम्ल साम्लमधुरं कषायानुरसं भवेत् ॥ ७ ॥

### *Svādvamla*

The *svādvamla* variety of *dadhi* is both sweet and sour in taste. It is astringent in *anurasa* (subsidiary taste).

4
स्वाद्वम्लस्य गुणा ज्ञेया सामान्यदधिवज्जनैः ।

In properties, it is like *dadhi* in general.

5
यत्तिरोहितमाधुर्यं [व्य]क्ताम्लं च तदम्लकम् ॥८॥

### *Amlaka*

When *dadhi* is deprived of its sweet taste, and its sour taste is well manifested, then it is called *amlaka.*

अम्लं तु दीपनं रक्तपित्तश्लेष्मविवर्धनम् ।

It stimulates digestion and aggravates blood, *pitta* and *kapha.*

6
तदत्यम्ल दन्तरोमहर्षकण्ठादिदाहकृत् ।

### *Atyamla*

When *dadhi* becomes exceedingly sour it is called *atyamla.* It causes a tingling sensation (*harṣa*) in the teeth and horripilation (*roma harṣa*). It produces burning sensation in the throat etc.

7
अत्यम्लं दीपनं रक्तपित्तदुष्टिकर परम् ॥ ९ ॥'

(भावप्रकाश: दधिवर्ग १५.७-९)

It stimulates digestion and exceedingly vitiates blood and *pitta.*

8
'गव्यं दध्युत्तमं बल्यं पाके स्वादुरुचिप्रदम् ।

'पवित्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहम् ॥ १० ॥

*Gavya dadhi* (**Curd of cow's milk**)

*Dadhi* prepared from Cow's milk is an excellent promoter of strength. In *vipāka*, it is sweet. It is an appetiser, sacred, a digestive stimulant, unctuous and nourishing. It alleviates *vāyu*.

उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम् ।

Among the several varieties of *dadhi*, the one prepared from cow's milk is known to be the best.

**माहिषं दधि** सुस्निग्धं श्लेष्मलं वातपित्तनुत् ।

स्वादुपाकमभिष्यन्दि वृष्यं गुर्वस्रदूषणम् ॥ ११ ॥

[भावप्रकाश: दधिवर्ग १०-११]

*Māhiṣa dadhi* (**Curd of buffalo's milk**)

*Dadhi* prepared from buffalo milk is exceedingly unctuous. It aggravates *kapha* and alleviates *vāyu* as well as *pitta*. It is sweet in *vipāka*, *abhiṣyandi* (which obstructs the channels of circulation), an aphrodisiac and heavy. It vitiates blood.

'**आजं** दध्युत्तमं ग्राहि लघु दोषत्रयापहम् ।

शस्यते श्वासकासार्शःक्षयकार्श्येषु दीपनम् ॥ १२ ॥

*Āja dadhi* (**Curd of goat's milk**)

*Dadhi* prepared from goat's milk is very useful. It is constipative and light. It alleviates all the three *doṣas*. It is useful in *śvāsa* (asthma), *kāsa* (bronchitis), *arśas* (piles), *kṣaya* (consumption) and *kārśya* (emaciation). It stimulates the digestive power.

10

पक्वदुग्धभवं रुच्यं **दधि स्निग्धं** गुणोत्तमम् ।

पित्तानिलापहं सर्वधात्वग्निबलवर्धनम् ॥ १३ ॥

### *Dadhi* of boiled milk

*Dadhi* prepared from boiled milk is an appetiser, unctuous and exceedingly useful. It alleviates *pitta* and *vāyu*, and promotes all the tissue elements (*dhātus*), digestive power and strength.

असारं दधि संग्राहि कषायं वातलं लघु ।
विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥ १४ ॥

### *Asāra dadhi*

*Dadhi* which is free from fat is constipative, astringent, aggravator of *vāyu* and light. It produces flatulence (*viṣṭambhi*). It is a digestive stimulant and appetiser. It cures *grahaṇī* (sprue syndrome).

गालितं दधि सुस्निग्धं वातघ्नं श्लेष्मलं गुरु ।
बलपुष्टिकरं रुच्यं मधुरं नातिपित्तलम् ॥ १५ ॥

### *Gālita dadhi*

If the watery portion of *dadhi* is removed by filteration, then it becomes exceedingly unctuous. It alleviates *vāyu* and aggravates *kapha*. It is heavy. It promotes strength and nourishment. It is an appetiser and sweet. It does not aggravate *pitta* in excess.

सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहनुत् ।
सगुडं वातनुद्वृष्यं बृंहणं तर्पणं गुरु ॥ १६ ॥

**Combination**

Combined with sugar, *dadhi* in very useful in curing *tṛṣṇā* (morbid thirst), vitiated *pitta* as well as blood and *dāha* (burning syndrome).

Along with *guḍa*, *dadhi* alleviates *vāyu*. It is aphrodisiac, nourishing, refreshing and heavy.

न नक्तं दधि भुञ्जीत न चाप्यघृतशर्करम् ।

न मुद्गसूपं नाक्षौद्र नोष्ण नामलकैर्विना ॥ १७ ॥'

[भावप्रकाश. दधिवर्ग १५ : १६-१७]

**Contra-indications**

*Dadhi* should not be taken at night, nor should it be taken without ghee, sugar, *mudga sūpa* or honey. It should not be taken when it is hot nor without *āmalaki*.

'शस्यते दधि नो रात्रौ शस्त चाम्वुघृतान्वितम् ।
रक्तपित्तकफोत्थेषु विकारेषु [12] हितं न तत्' ॥ १८ ॥

[भावप्रकाश दधिवर्ग १५ : प्रक्षिप्तपाठ]

At night, *dadhi* should not be taken. It is useful when mixed with water and ghee. It is not useful in diseases caused by blood, *pitta* and *kapha*.

'हेमन्ते शिशिरे [13] चैव वर्षासु दधि शस्यते ।
शरद्ग्रीष्मवसन्तेषु प्रायशस्तद्विगर्हितम् ॥ १९ ॥

In *hemanta* (first part of winter), *śiśira* (later part of winter) and in the rainy season intake of *dadhi* is beneficial. Generally, it is not useful in autumn, summer and spring . season.

ज्वरासृक्पित्तवीसर्पकुष्ठपाण्ड्वामयभ्रमान्
प्राप्नुयात्कामलां चोग्रां विधि हित्वा दधिप्रियः ॥२०॥

[भावप्रकाश. दधिवर्ग १५:१८-१९]

**Adverse effect**

A person who takes *dadhi* without following the prescribed procedure succumbs to acute form of *jvara* (fever), *asṛk pitta* (a disease characterised by bleeding from different parts of the body), *visarpa* (erysipelas), *kuṣṭha* (obstinate skin diseases including leprosy), *pāṇḍvāmaya* (anemia), *bhrama* (giddiness) and *kāmalā* (jaundice).

विपाके कटुसक्षारमम्लं भेद्यौष्ट्रकं दधि ।
[14]'वातमर्शांसि कुष्ठानि क्रमीन्हन्त्युदराणि च ।। २१ ।।

*Auṣṭrika dadhi* **(Curd of camel's milk)**

*Dadhi* prepared from camel's milk is pungent in *vipāka*, alkaline and sour. It cures aggravated *vāyu*, *arśas* (piles), *kuṣṭha* (obstinate skin diseases including leprosy), *kṛmi* (parasitic infection) and *udara* (obstinate abdominal diseases including ascitis).

कोपनं कफवातानां दुर्नाम्नां चाविकं दधि ।'

*Āvika dadhi* **(Curd of sheep milk)**

*Dadhi* prepared from the milk of the sheep aggravates *kapha*, *vāta* and *durnāman* (piles).

दीपनीयमचक्षुष्यं वातलं दधि वाडवम् ।। २२ ।।
रूक्षमुष्णं कषायं च कफमू[[15]त्रा]पहं च तत् ।

*Vāḍava dadhi* **(Curd of mare's milk)**

*Dadhi* prepared from mare's milk is a digestive stimulant and harmful for the eye. It aggravates *vāyu*. It is un-unctuous, hot and astringent. It reduces *kapha* and urine.

स्निग्धं विपाके मधुरं बल्यं सतर्पणं गुरु ।। २३ ।।
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्या गुणोत्तरम् ।

*Nārī dadhi* **(Curd of woman's milk)**

Dadhi prepared from woman's milk is unctuous, sweet in *vipāka*, promoter of strength, refreshing and heavy. It is an excellent promoter of eye sight. It alleviates *doṣas*. It is extremely useful.

लघुपाके बलासघ्नं वीर्योष्णं पक्तिनाशनम् ।। २४ ।।
कषायानुरसं नाग्या दधि वर्चोविवर्धनम् ।

### *Nāga dadhi* (Curd of elephant's milk)

*Dadhi* prepared from elephant's milk is light in *vipāka*. It alleviates *kapha*. It is hot in potency and it reduces the power of digestion. It is astringent in *anurasa* (subsidiary taste). It increases the quantity of stool.

दधीन्युक्तानि यान्येवं गव्यादीनि पृथक् पृथक् ॥ 25 ॥
विज्ञेयमेव सर्वेषु गव्यमेव गुणोत्तरम् ।

**General**

Properties of different types of *dadhi* are described above. Among them, the *dadhi* prepared from cow's milk is the best.

कपित्थमज्जकल्केन यद्वामलरसेन तु ॥ २६ ॥
16
'पिष्टैश्चित्रकमूलैर्वा पक्वाम्रस्य रसेन तु ।'
लिप्तभाण्डेऽथ कठिनं मधुरं दधि जायते ॥ २७ ॥

If the inside wall of the *bhāṇḍa* (jar in which curd is prepared) is smeared with the paste of the pulp of *kapittha*, juice of *āmalaka*, paste of the root of *citraka* or the juice of ripe mango, then the curd becomes hard (increased density) and sweet.

लवणं रूप्यं विडं वा दध्नो भवति जीवनम् ।

Salt, silver and *viḍa*—these are very essential (lit. life) for *dadhi*.

दध्नस्तूपरि यो भागो घनः स्नेहसमन्वितः ॥ २८ ॥
लोके सर इति ख्यातो दध्नो मंडस्तु मस्त्विति ।

### *Sara & Mastu*

The upper layer of the milk which is dense and unctuous is called *sara* (cream) and the watery portion of the curd is called *mastu*.

सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः ॥ २९ ॥

वस्तेर्विधमनश्चाम्लः पित्तश्लेष्मविवर्धनः ।

*Sara* is sweet, heavy and aphrodisiac. It reduces *vāyu* and the power of digestion. It stimulates (*vidhamana*) the bladder. When it becomes sour, it aggravates *pitta* and *kapha.*

मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषदम् ॥ ३० ॥

17

स्रोतोविशोधनं क्लेदि कफतृष्णानिलापहम् ।

अवृष्यं प्रीणनं शीघ्रं भिनत्ति मलसंग्रहम् ॥ ३१ ॥

*Mastu* cures mental fatigue (*klama*). It is a strength promoter and light. It promotes appetite for food. It cleanses the channels of circulation and produces *kleda* (sticky material). It alleviates *kapha, tṛṣṇā* (morbid thirst) and *vāyu.* It is not aphrodisiac. It is refreshing and works as an instant laxative.

॥ इति दधिवर्गः ॥

Thus ends the group dealing with various types of *dadhi.*

## NOTES AND REFERENCES

1. अतीसारे शुचौ इति आदर्शपुस्तिकासु पाठः ।
2. स्वादु विज्ञैरुदाहृतम् इति आकरे पाठः ।
3. वातपित्तकफाधिकं इति षष्ठपुस्तके पाठ ।
4. सामान्यस्य इति षष्ठपुस्तके पाठः ।
5. वात्ताम्लं इति द्वितीयपुस्तके पाठः ।
6. दध्यम्लं इति षष्ठपुस्तके पाठः ।
7. रक्तवातपित्तकरं इति आकरे पाठः ।

8. गव्यं दधि विशेषेण स्वाद्वम्लं च रुचिप्रदम् इति आकरे पाठः ।
9. "दध्यामशोषाणां" इति आदर्शपुस्तिकासु पाठः ।
10 श्रृतक्षीरमय द्रव्यं इति आदर्शपुस्तिकासु पाठः ।
11. रुच्यं...... ...बलपुष्टिकरं पाठोऽयं षष्ठपुस्तके नोपलभ्यते ।
12. तु नैव तत् इति आकरे पाठः ।
13. चापि इति आकरे पाठः ।
14. वातमर्शांसि.........दधि पाठोऽयं षष्ठपुस्तके नोपलभ्यते ।
15. कफमूत्रपह इति द्वितीयपुस्तके पाठः ।
16. पिष्टै...... ...तु पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
17. लघुतृष्णानिलापहम् इति षष्ठपुस्तके पाठः ।

# CHAPTER 8

तक्रं [1]लघुकषायोष्णं दीपनं कफवातजित् ।
[2]शोथोदरार्शो — ग्रहणीदोषमूत्रग्रहारुचीन् ॥ १ ॥
गुल्मप्लीहघृतव्यापत्हरं पांड्वामयान् जयेत् ।

*Takra* (**Butter milk**)

*Takra* is light, astringent, hot and digestive stimulant. It alleviates *kapha* and *vāta*. It cures *śotha* (oedema), *udara* (obstinate abdominal diseases including ascitis), *arśas* (piles), *grahaṇī* (sprue syndrome), *mūtra graha* (anuria), *aruci* (anorexia), *gulma* (phantom tumour), *plīhan* (splenic disorder), *ghṛta vyāpat* (complications because of wrong administration of ghee) and *pāṇḍvāmaya* (anemia).

समुद्धृतघृतं तक्रमर्द्धोद्धृतघृतं च [3]यत् ॥ २ ॥
अनुद्धृतघृतं चान्यदित्येतत्त्रिविधं [4]स्मृतम् ।

**Variety**

*Takra* is of three types depending upon the content of fat

which is either completely removed, half removed or not removed at all.

पूर्वं च लघु पथ्यं च [5] गुरुवृष्यतमं परम् ॥ ३ ॥

ततः परं वृष्यतमं यथाक्रममुदाहृतम् ।

The first variety from which fat is completely removed is light and wholesome. The second variety from which half of the fat is removed is exceedingly heavy and aphrodisiac. The third variety from which fat is not removed is exceedingly aphrodisiac.

यान्युक्तानि दधीन्यष्टौ तद्गुणं तक्रमादिशेत् ॥ ४ ॥

The properties of the different types of *dadhi* prepared from the milk of different animals are also shared by the *takra* prepared out of them.

तक्रं तु **घोलं** **मथितोदश्वित्तक्र**प्रभेदतः ।

सुश्रुताद्यैर्मुनिश्रेष्ठैश्चतुर्विधमुदीरितम् ॥ ५ ॥

[6] ससरं निर्जलं घोलं मथितं त्वसरोदकम् ।

तक्रं पादजलं प्रोक्तं उदश्विच्चार्द्धवारिकम् ।

[भावप्रकाश: तक्रवर्ग १६:१-२]

वातपित्तहरं [7] **घोलं मथितं** कफपित्तनुत् ॥ ६ ॥

[माधवद्रव्यगुण. तक्रवर्ग ७ : १०]

By the great sages like *Suśruta*, *takra* is described to be of four types viz., *ghola*, *mathita*, *udaśvit* and *takra*. The butter-milk which contains cream and to which water is not added is called *ghola*. When the cream is removed but no water is added then it is called *mathita*. When one fourth quantity of water is added then it is called *takra*. In *udaśvit* half the quantity of water is added.

**तक्रं** त्रिदोषशमनम् **उदश्वित्**कफदं भवेत् ।

उदश्वित्कफदं बल्यं श्रमघ्नं परमं मतम् ॥ ७ ॥

*Takra* alleviates all the three *doṣas*. *Udaśvit* aggravates *kapha*, promotes strength and alleviates fatigue par excellence.

**अथ मन्दादितक्रगुणा :**

8

मंदजातं भवेत्तक्रं रूक्षाभिष्यन्दिदुर्जरम् ।

**Property of different types**

Butter milk prepared of the *manda* variety of *dadhi* is un-unctuous, *abhiṣyandi* (which obstructs the channels of circulation), and difficult of digestion.

9

तक्रं तु मधुरं स्निग्धं श्लेष्मलं वातपित्तनुत् ॥ ८ ॥

Buttermilk prepared of the sweet variety of *dadhi* is unctuous. It aggravates *kapha* and alleviates *vāyu* and *pitta*.

अम्लं वातघ्नमत्यम्लं रक्तपित्तप्रकोपनम् ।

Buttermilk prepared of the sour variety of *dadhi* alleviates *vāyu*. Buttermilk prepared of *dadhi* which is extremely sour, aggravates *rakta* (blood) and *pitta*.

तत्तु सान्द्रं सान्द्रतरं गुरुविद्याद्यथोत्तरम् ॥ ९ ॥

The heaviness of *takra* progressively incicases depending upon the increase in density.

वातेऽम्लं सैन्धवोपेतं पित्ते स्वादुसशर्करम् ।

पिबेत्तक्रं कफे रूक्षं क्षारव्योषसमन्वितम् ।

'मूत्रकृच्छ्रे तु सगुडं पांडुरोगे सचित्रकम् ॥ १० ॥'

[भावप्रकाश तक्रवर्ग १६ : १३]

**Combination**

When there is aggravation of *vāyu*, sour variety of *takra* should be taken by adding rock salt. In *pitta*, sweet variety of

*takra* should be taken mixed with sugar. In *kapha* the un-unctuous variety of *takra* should be used by adding alkalies, *śuṇṭhi*, *pippalī* and *marica*. In *mūtrakṛcchra* (dysuria), *guḍa* should be added and in *pāṇḍu citraka* should be added to the *takra*.

‘हिंगुजीरयुतं घोलं [10] सैन्धवेनावचूर्णितम् ।
[11] भवेत्तदतिवातघ्नमर्शोतीसारहृत्परम् ॥ ११ ॥’

[भावप्रकाश: तक्रवर्ग १६ : १२]

सरुच्यं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।

If *hiṅgu* and *jīrā* are added and the powder of rock salt is sprinkled over takra, then it becomes an excellent alleviator of *vāyu*. It also becomes an excellent curative for *arśas* (piles) and *atisāra* (diarrhoea). It is an appetiser, nourishing and strength promoting. It also cures colic pain in the region of *vasti* (urinary bladder).

‘‘तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ॥ १२ ॥
पीनसश्वासकासादौ [12] पक्वमेव विशिष्यते ।

**Process of preparation**

Unboiled (*āma*) *takra* alleviates *kapha* in the *koṣṭha* (colon) but produces *kapha* in the throat. The boiled (*pakva*) *takra* is specifically useful in *pīnasa* (chronic cold), *śvāsa* (asthma) and *kāsa* (bronchitis).

शीतकालेऽग्निमान्द्ये च कफवातामयेषु च ॥ १३ ॥

अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम् ।

[13] तत्तु हन्ति कफच्छर्दिप्रसेकविषमज्वरान् ॥ १४ ॥

पाण्डुमेदो — ग्रहण्यर्शो — मूत्रग्रहभगन्दरान् ।

मेहगुल्ममतीसारं शूलप्लीहोदरारुचीः ॥ १५ ॥

14
श्वित्रकोठघृतव्यापत्कुष्ठशोफतृषाकृमीन् ।

**Properties in general**

*Takra* works like ambrosia in winter season, when there is suppression of the power of digestion, in the diseases caused by *kapha* and *vāyu*, in *aruci* (anorexia) and *srotorodha* (obstruction to the channels of circulation). It cures diseases caused by *kapha*, *chardi* (vomiting), *praseka* (salivation), *viṣama jvara* (irregular fever), *pāṇḍu* (anemia), *medas* (adiposity), *grahaṇī* (sprue syndrome), *arśas* (piles), *mūtragraha* (suppression of urination), *bhagandara* (fistula-in-ano), *meha* (obstinate urinary disorders including diabetes), *gulma* (phantom tumour), *atīsāra* (diarrhoea), *śūla* (colic pain), *plīhan* (splenic disorder), *udara* (obstinate abdominal disorders including ascitis), *arucī* (anorexia), *śvitra* (leucoderma), *koṭha* (urticaria), *ghṛta vyāpat* (complications arising out of improper use of ghee), *kuṣṭha* (obstinate skin diseases including leprosy), *śopha* (oedema), *tṛṣā* (morbid thirst) and *kṛmī* (parasitic infection),

नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
15 16
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ॥ १६ ॥"

[भावप्रकाश. तक्रवर्ग १६:१४-१८]

**Contra-indication**

*Takra* should not be used in *kṣata* (phthisis), during hot season, when a person is weak and in *mūrchā* (fainting), *bhrama* (giddiness), *dāha* (burning syndrome) and *raktapitta* (a disease characterised by bleeding from different parts of the body).

न तक्रसेवी व्यथते कदाचिन्न तक्रदग्धाः प्रभवन्ति रोगाः ।

यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः ।

[भावप्रकाश. तक्रवर्ग १६ : ७]

**Excellence**

A person who habitually takes *takra* never suffers and being impregnated with *takra*, diseases do not attack him. As

ambrosia gives happiness to the gods, so also *takra* produces happiness in human beings on this earth.

अम्लेन वातं मधुरेण पित्तं
कफं कषायेण निहन्ति तक्रम् ।

तस्मान्न तक्रं ज्वरितेषु देयं
न तक्रदग्धाः प्रभवन्ति रोगाः ।। १८ ।।

It cures *vāyu* because of its sour taste, *pitta* because of its sweet taste and *kapha* because of its astringent taste. Therefore (?) *takra* should not be given to a patient suffering from fever and being impregnated with *takra*, diseases do not attack him.

।। इति तक्रवर्गः ।।

Thus ends the group dealing with various types of *takra*.

## NOTES AND REFERENCES

1. लघु कषायाम्लं इति आकरे पाठः ।
2. शोफोदरार्शोग्रहणीदोषमूत्रग्रहारुचीः इति आकरे पाठः ।
3. तत् इति आकरे पाठः ।
4. मतम् इति आकरे पाठः ।
5. गुरु वृष्यमतः इति आकरे पाठः ।
6. सजल इति षष्ठपुस्तके पाठ. ।
7. घोलमुदश्विच्छ्लेष्मल भवेत् इति आकरे पाठः ।
8. रूक्षाभिष्यन्दि तद्गुण इति षष्ठपुस्तके पाठः ।
9. सर्वं इति द्वितीयपुस्तके पाठ :
10. सैन्धवे नावधूलितम् इति द्वितीयपुस्तके पाठ. ।

11. तद्भवे इति द्वितीयपुस्तके पाठः ।
12. सिद्धमेव तदिष्यते इति प्रथमपुस्तके पाठः ।
13. तक्रं इति षष्ठपुस्तके पाठः ।
14. ०शोथ०.......इति षष्ठपुस्तके पाठः ।
15. भ्रमतृष्णासु इति षष्ठपुस्तके पाठः ।
16. रक्तपित्तजे इति आकरे पाठः ।

# CHAPTER 9

नवनीतं हितं गव्य वृष्यं वर्णबलाग्निकृत् ।
1
संग्राहि वातपित्तासृक्क्षयार्शो[ऽ]र्दितकासजित् ॥ १ ॥

*Navanīta* (**Butter**)

Butter (*navanīta*) prepared from cow's milk is very useful. It is aphrodisiac, promoter of complexion, strength and the power of digestion and constipative. It cures aggravated *vāyu*, *pitta* and blood, *kṣaya* (consumption), *arśas* (piles), *ardita* (facial paralysis) and *kāsa* (bronchitis).

तद्धित बालके वृद्धे विशेषादमृतं शिशोः ।

It is useful both for young and old and it is like ambrosia for infants.

2
नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ॥ २ ॥

दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ।

*Māhiṣa Navanīta*

The butter collected from buffalo milk aggravates *vāyu*

and *kapha*. It is heavy. It cures *dāha* (burning syndrome), vitiated *pitta* and *śrama* (physical fatigue). It promotes *medas* (adiposity) and semen.

[3]
क्षीरोत्थ तदतिस्निग्धं चक्षुष्यं रक्तपित्तजित् ।। ३ ।।
[4]
वृष्यं बलकरं ग्राहि मधुरं शीतलं परम् ।

**Milk butter**

The butter collected from milk is extremely unctuous. It promotes eye sight and cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is aphrodisiac, promoter of strength, constipative, sweet and extremely cooling.

नवनीतं तु सद्यस्कं स्वादु ग्राहि हिमं लघु ।। ४ ।।
मेध्यं किञ्चित्कषायाम्लमीषत्तक्रांशसंक्रमात् ।

**Freshly collected butter**

Freshly collected butter is sweet, constipative, cooling, light and promoter of intellect. It is slightly astringent and sour because of its association with a small quantity of butter milk.

[5]
सक्षारकटुकाम्लत्वाच्छर्द्यर्शःकुष्ठकोपनम् ।
श्लेष्मलं गुरु मेदस्यं नवनीतं चिरन्तनम् ।। ५ ।।

[भावप्रकाशः नवनीतवर्ग १७ · १-६]

**Preserved butter**

Butter preserved for a long time is alkaline, pungent and sour because of which it aggravates *chardi* (vomiting), *arśas* (piles) and *kuṣṭha* (obstinate skin diseases including leprosy). It aggravates *kapha*. It is heavy and it produces more of fat.

।। इति नवनीतवर्गः ।।

Thus ends the group dealing with various types of butter.

स्मृति—बुद्धयग्निशुक्रौजः—कफमेदोविवर्धनम् ।
6
वातपित्तकफोन्मादशोषालक्ष्मीविषापहम् ॥ ६ ॥

[माधवद्रव्यगुणः घृतवर्ग ६ : १]

7
"चक्षुष्यं दीपनं बल्यं **गव्यं सर्पिर्गुणोत्तरम्** ।

**Ghee**

**Cow's milk ghee**

Ghee prepared from cow's milk increases memory, intellect, power of digestion, semen, *ojas*, *kapha* and *medas* (fat). It cures *unmāda* (insanity) caused by *vāyu*, *pitta* and *kapha*, *śoṣa* (consumption), *alakṣmī* (inauspiciousness) and *viṣa* (poisoning). It promotes eyesight, digestive power and strength. Cow's ghee is the best among the ghees.

**आजं** सर्पिर्दीपनीयं चक्षुष्य बलवर्द्धनम् ॥ ७ ॥
कासे श्वासे क्षये चापि पथ्य पाके च तल्लघु ।

**Goat's milk ghee**

Ghee prepared from goat's milk stimulates the digestive power and promotes eyesight and strength. It is useful in *kāsa* (bronchitis), *śvāsa* (asthma) and *kṣaya* (consumption). It is light for digestion.

मधुर रक्तपित्तघ्न गुरु पाके कफावहम् ॥ ८ ॥
8
वातपित्तप्रशमन सुशीत **माहिष घृतम्** ।

**Buffalo milk ghee**

The ghee prepared from buffalo-milk is sweet. It cures *raktapitta* (a disease characterised by bleeding from different parts of the body). It is heavy for digestion. It aggravates *kapha* and alleviates *vāyu* and *pitta*. It is cooling.

'**औष्ट्र**' कटु घृत पाके शोथकृमिविषापहम् ॥ ९ ॥
दीपन कफवातघ्न कुष्ठगुल्मोदरापहम् ।

**Camel's milk ghee**

Ghee prepared from camel's milk is pungent in *vipāka*. It cures *śotha* (oedema), *kṛmi* (parasitic infection) and *viṣa* (poisoning). It stimulates digestion and alleviates *kapha* and *vāyu*. It cures *kuṣṭha* (obstinate skin diseases including leprosy), *gulma* (phantom tumour) and *viṣa* (poisoning).

पाके लघ्वाविकं सर्पिर्न च पित्तप्रकोपणम् ।। १० ।।'

[भावप्रकाश: घृतवर्ग ६-१०]

कफेऽनिले योनिदोषे[9] शोथे कंपे च तद्धितम् ।''

[माधवद्रव्यगुण: घृतवर्ग ६ : ३-७]

**Sheep's milk ghee**

Ghee prepared from sheep's milk is light for digestion and it does not aggravate *pitta*. It is useful in aggravated *kapha* and *vāyu*, *yoni doṣa* (diseases of the female genital tract), *śotha* (oedema) and *kampa* (trembling).

'पाके लघूष्णवीर्यं[10] च कषायं कफनाशनम् ।। ११ ।।

दीपनं बद्धविण्मूत्रं विद्यादैकशफं घृतम्[11] ।

**Mare's milk ghee**

Ghee prepared from mare's milk is light for digestion, hot in potency, astringent, alleviator of *kapha* and stimulant of the digestive power. It obstructs proper elimination of stool and urine.

कषायं बद्धविण्मूत्रं तिक्तमग्निकरं लघु ।। १२ ।।

हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रमीन् ।

**Elephant's milk ghee**

The ghee prepared from elephant's milk is astringent. It obstructs proper elimination of stool and urine. It is bitter, stimulant of digestion and light. It cures aggravated *kapha*,

*kuṣṭha* (obstinate skin diseases including leprosy), *viṣa* (poisoning) and *kṛmi* (parasitic infection).

[12]चक्षुष्यमग्र्यं स्त्रीणां च सर्पिः स्यादमृतोपमम् ॥१३॥
वृद्धिं करोति [13]देहाग्न्योर्लघुपाके विषापहम् ।

**Ghee of woman's milk**

The ghee prepared from woman's milk is an excellent promoter of eyesight. It is like ambrosia. It promotes the physique and the power of digestion. It is light for digestion and it cures *viṣa* (poisoning).

तर्पणं नेत्ररोगघ्नं दाहनुत्पयसो घृतम् ॥ १४ ॥

**Ghee prepared of milk**

The ghee prepared of milk is refreshing. It cures eye diseases and *dāha* (burning syndrome).

सर्पिः पुराणं तिमिरं [14]पीनसश्वासकासजित् ।
मूर्च्छाकुष्ठविषोन्माददाहापस्मारनाशनम् ॥ १५ ॥
योनिकर्णाक्षिशिरसां [15]शूलं शोथगरज्वरान् ।
हन्ति दोषत्रयं भेदि व्रणशोधनरोपणम् ॥ १६ ॥

[माधवद्रव्यगुणः घृतवर्ग ६ : ८-१३]

**Preserved ghee**

The ghee which is kept preserved for a long time (*purāṇa*) cures *timira* (cataract), *pīnasa* (chronic cold), *śvāsa* (asthma), *kāsa* (bronchitis), *mūrchā* (fainting), *kuṣṭha* (obstinate skin diseases including leprosy), *viṣa* (poisoning), *unmāda* (insanity), *dāha* (burning syndrome), *apasmāra* (epilepsy), colic pain in *yoni* (female genital tract), ear, eye and head, *śotha* (oedema), *gara* (a type of poisoning) and fever. It alleviates all the three *doṣas*. It is purgative. It cleanses and heals ulcers.

**घृतमण्डो** घृतस्योर्ध्वभागः स्यात्सुश्रुतस्य यः ।

'तद्वच्च घृतमण्डोऽपि रूक्षस्तीक्ष्णस्तनुस्तु सः ॥ १७ ॥'

[माधवद्रव्यगुणः घृतवर्ग १८ : १३]

*Ghṛta maṇḍa*

The upper portion of the ghee is called *ghṛta maṇḍa* according to *Suśruta.* It is un-unctuous, sharp and thin.

16

यो गो दोहाद्भव सर्पिर्भवेद्धैयङ्गवीनकम् ।

हैयङ्गवीन चक्षुष्यं दीपन रोचन परम् ॥ १८ ॥'

[भावप्रकाशः घृतवर्ग १८. १५]

*Hayaṁgavīna*

The ghee that is taken out from the cream produced at the time of milking the cow is called *hayaṁgavīna.* It promotes eyesight and the power of digestion. It is digestive stimulant and appetiser par excellence.

बल्यं वृष्यं निगदितं विशेषाज्ज्वरनाशनम् ।

सर्पिः पुराणं विज्ञेयं दशवर्षस्थितं तु यत् ॥ १९ ॥

**Preservation**

The ghee which is preserved for ten years is strength promoting and aphrodisiac. It specifically cures fever.

दशसम्वत्सराद्दूर्ध्वमाज्यमुक्तं रसायनम् ।

The ghee which is preserved for more than ten years is called *ājya.* It is rejuvenating.

शतवर्षस्थितं यत्तु कुम्भसर्पिस्तदुच्यते ॥ २० ॥

रक्षोघ्नं कुम्भसर्पिः स्यात्तत्परस्तु महाघृतम् ।

पेयं महाघृतं भूतैः सर्वतोऽपि गुणाधिकम् ॥ २१ ॥

The ghee which is preserved for one hundred years is

called *kumbha sarpi*. It cures the afflictions by *rakṣas* (evil spirits). The ghee which is preserved for more than one hundred years is called *mahāghṛta*. It is the best among all the ghees.

यथा यथा जरा याति गुणवत्स्यात्तथा तथा ।

Depending upon the duration of preservation, the ghee becomes progressively more and more useful.

राजयक्ष्मणि बाले च वृद्धे श्लेष्माश्रये गदे ।। २२ ।।

रोगे सामे विसूच्यां च विबन्धे च मदात्यये ।

ज्वरे च शमिते वह्नौ न सर्पिर्बहुमन्यते ।। २३ ।।

**Contra-indication**

Ghee is not very useful in *rāja yakṣmā* (tuberculosis), young age, old age, in diseases caused by *kapha*, in the *āma* stage of diseases, *visūcikā* (cholera), constipation, *madātyaya* (alcoholism), fever and in the suppression of the power of digestion.

।। इति घृतवर्गः ।।

Thus ends the group dealing with various type of ghee.

## NOTES AND REFERENCES

1. क्षयार्शोऽर्दिकासहृत् इति आकरे पाठः ।
   क्षयार्शोर्दितकासजित् इति आदर्शपुस्तकेषु पाठः ।
2. वातश्लेष्महरं इति षष्ठपुस्तके पाठः ।
3. दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् इति आकरे पाठः ।
4. वृष्यं बल्यमतिस्निग्धं मधुरं ग्राहि शीतलम् इति आकरे पाठः ।
5. सक्षारकटुलाम्लत्वाच्छर्द्यर्शःकुष्ठकारकम् इति आकरे पाठः ।

6. लक्ष्मीज्वरापहम् इति आकरे पाठः ।
7. बृंहणं इति आकरे पाठः ।
8. सुश्रुतं इति आदर्शपुस्तिकासु पाठः ।
9. शोफे इति आकरे पाठः ।
10. तु इति आकरे पाठः ।
11. लघु इति षष्ठपुस्तके पाठः ।
12. चक्षुष्यमग्र्यं इति आदर्शपुस्तिकासु पाठः ।
13. देहास्य लघु पाकि इति षष्ठपुस्तके पाठः ।
14. तिमिरप्रतिश्याश्वासकासनुत् इति आकरे पाठः ।
15. शूलघ्नं शोकजित् परम् इति आकरे पाठः ।
16. ह्यो इति षष्ठपुस्तके पाठः ।

# CHAPTER 10

'कषायानुरसं स्वादु सूक्ष्ममुष्णं व्यवायि च ।
पित्तलं बद्धविण्मूत्रं न च श्लेष्मविवर्धनम् ॥ १ ॥'

[माधवद्रव्यगुणः तैलवर्ग १० : १]

'तैलं संयोगसंस्कारात्सर्वरोगहर[1] सरम् ।

## Oil

Oil is astringent in *anurasa* (subsidiary taste), sweet, subtle, hot and *vyavāyi* (which pervades all over the body before digestion). It aggravates *pitta*. It obstructs the proper elimination of stool and urine. It does not aggravate *kapha*. By combination and processing it cures all diseases. It is laxative.

छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते ॥ २ ॥
भग्नस्फुटितविद्धा[2]ग्निदग्धश्लिष्टविदारिते ।
[3]तथाभिहतनिर्भुग्नमृगव्यालादिभक्षिते ॥ ३ ॥
सेकाभ्यंगावगाहेषु तिलतैलं प्रशस्यते ।

तथा वस्तिषु[4] पानेषु नस्ये कर्णाक्षिपूरणे ॥ ४ ॥
अन्नपानविधौ चापि प्रयोज्यं वातशान्तये ।

### *Tila taila* (Gingili oil)

*Til* oil is useful in excised, incised, dislocated, macerated, lacerated, ulcerated, pressed, fractured, broken, perforated, burnt, separated and scraped wounds and injury and eating away by wild animals. It is used in the form of *seka* (sprinkling), *abhyaṅga* (massage), *avagāha* (bath), *vasti* (enema), *pāna* (drinking through mouth), *nasya* (inhalation), *karṇapūraṇa* (ear drop) and *akṣipūraṇa* (pouring over eyes). It is used in food and drinks for the alleviation of *vāyu.*

वातघ्नं मधुरं तेषु **क्षौमं तैलं** बलावहम् ॥ ५ ॥
कटुपाकमचक्षुष्यं स्निग्धोष्णं कटुपित्तलम् ।

### *Kṣauma taila* (Linseed oil)

The oil of *kṣauma* alleviates *vāyu.* It is sweet and a promoter of strength. It is pungent in *vipāka.* It is not useful for eyes. It is unctuous, hot and pungent. It aggravates *pitta.*

कृमिघ्नं **सार्षपं तैलं** कण्डूकुष्ठापहं लघु ॥ ६ ॥
कफमेदोऽनिलहरं लेखनं कटु दीपनम् ।

### *Sārsapa taila* (Mustard oil)

The oil of *sarṣapa* cures *kṛmi* (parasitic infection), *kaṇḍū* (itching) and *kuṣṭha* (obstinate skin diseases including leprosy). It is light and reduces *kapha, medas* (fat) and *vāyu.* It is *lekhana* (depleting), pungent and a digestive stimulant.

हृद्बस्तिपार्श्वजानू[5]रुकटिपृष्ठास्थिशूलिनाम् ॥ ७ ॥
आनाहाष्ठील[6]वातासृक्प्लीहोदावर्तशूलिनाम्[7] ।
हितं वातामयश्वासग्रन्थि[8]हिध्मविकारिणाम् ॥ ८ ॥

तैलमैरण्डजं बल्यं गुरूष्णं मधुरं सरम् ।

*Eraṇḍa taila* **(Castor oil)**

The oil of *eraṇḍa* is useful in the pain of the heart, bladder, sides of the chest, knee joint, thigh, waist, back and bone. It is also useful in *ānāha* (flatulence), *aṣṭhīlā* (hard tumour in the abdomen), *vātāsṛk* (gout), *plīhan* (splenic disorder) *udāvarta* (tymphanitis), *śūla* (colic pain), diseases caused by *vāyu*, *śvāsa* (asthma), *granthi* (adenitis) and *hidhmā* (hic cup). It is strength promoting, heavy, hot, sweet and laxative.

तीक्ष्णोष्णं[9] पित्तलं विस्रं रक्तैरण्डोद्भवं भृशम् ॥ ९ ॥

The oil of the red variety of *eraṇḍa* is exceedingly sharp and hot. It strongly aggravates *pitta* and is extremely putrid.

कुसुम्भतैलमुष्णं च विपाके कटुकं गुरु ।<br>
विदाही[10] तु विशेषेण[11] सर्वदोषप्रकोपणम् ॥ १० ॥

*Kusumbha taila*

The oil of *kusumbha* is hot, pungent in *vipāka*, heavy and *vidāhī* (producing burning sensation). It specifically aggravates all the *doṣas*.

सरं कोशाम्रजं तैलं कृमिकुष्ठव्रणापहम् ।

*Kośāmra taila*

The oil of *kośāmra* is laxative. It cures *kṛmi* (parasitic infection), *kuṣṭha* (obstinate skin diseases including leprosy) and *vraṇa* (ulcer).

दन्तीमूलकरक्षोघ्नकरञ्जारिष्टशिग्रुजम् ॥ ११ ॥<br>
सुवर्चले[12]ङ्गुदीपीलुशंखिनीनीपसंभवम् ।<br>
सरलागुरुदेवाह्वशिंशपासारजन्म च ॥ १२ ॥<br>
तुवरारुष्करोत्थं च तीक्ष्णं[13] कट्वम्लपित्तजित् ।

अर्शः कुष्ठकृमिश्लेष्मशुक्रमेदोऽनिलापहम् ॥ १३ ॥

*Taila* of *Danti* etc.,

The oils of *dantī, mūlaka, raksoghna, karañja, ariṣṭa, sigru, suvarcalā, iṅgudī, pīlu, śaṁkhinī, nīpa,* heart wood of *sarala, aguru, devāhva* and *śiṁśapā, tuvara* and *āruṣkara* are sharp, pungent and sour. They alleviate *pitta* and cure *arśas* (piles), *kuṣṭha* (obstinate skin diseases including leprosy) and *kṛmi* (parasitic infection). They reduce *kapha*, semen, fat and *vāyu*.

**करंजारिष्टजे** तिक्ते नात्युष्णे[14] तत्र निर्दिशेत् ।
कषायतिक्तकटुकं सरल[15] व्रणशोधनम् ॥ १४ ॥

Of these, the oils of *karañja* and *ariṣṭa* are bitter and they are not very hot. The oil of *sarala* is astringent, bitter and pungent and it cleanses ulcer.

[16]भृशोष्णतीक्ष्णकटुके तुवरारुष्करोद्भवे ।
विशेषात्कृमिकुष्ठघ्ने तथोर्ध्वाधोविरेचने' ॥ १५ ॥

[माधवद्रव्यगुणः तैलवर्ग १० : १-१६]

Oils of *tuvara* and *āruṣkara* are exceedingly hot, sharp and pungent. They specifically cure *kṛmi* (parasitic infection) and *kuṣṭha* (obstinate skin diseases including leprosy). They are emetic and purgative.

सर **ज्योतिष्मतीतैलं** वातश्लेष्मशिरोर्तिनुत् ।

*Jyotismatī taila*

The oil of *jyotismatī* is laxative. It alleviates *vāta, kapha* and headache.

**अक्षातिमुक्तकाक्षोटनालिकेलमधूकजम्**[17] ॥ १६ ॥

18

त्रपुसैर्वारु — कुष्माण्डश्लेष्मातकपियालजं ।
वातपित्तहरं केश्यं श्लेष्मलं गुरु शीतलम् ॥ १७ ॥

*Taila* of *Akṣa* etc.

The oil of *akṣa, atimukta, akṣoṭa, nālikela, madhūka, trapusa, ervāru, kuṣmāṇḍa, śleṣmātaka* and *piyāla* alleviates *vāyu* and *pitta*. It promotes good hair and aggravates *kapha*. It is heavy and cooling.

19

पित्तश्लेष्मप्रशमनं श्रीपर्णकिंशुकोद्भवम् ।
दोषघ्नं दीपनं मेध्यं किञ्चित्तिक्तं रसायनम् ॥ १८ ॥

[माधवद्रव्यगुण : तैलवर्ग १० : १६-१८]

*Taila* of *Śrīparṇa* & *Kiṁśuka*

The oil of *śrīparṇa* and *kiṁśuka* alleviates *pitta* and *kapha*. It is *doṣaghna* (correcting morbid factors) and digestive stimulant. It promotes intellect. It is slightly bitter and rejuvenating.

श्लेष्मातकाक्षपिचुमर्दककाकिनीनां,
काश्मर्यकस्य यदि वापि हरीतकीनाम् ॥ १९ ॥
तैलं निहन्ति पलितान्युपयुज्य नस्ये ।
गोक्षीरभोज्यनिरतस्य सदैव पुंस: ॥ २० ॥

*Taila* of *Śleśmātaka* etc.

The oil of *śleṣmātaka, akṣa, picumandaka, kākini, kāṣmaryaka* and *harītakī* cures premature graying of hair when used for inhalation. For this purpose, patients should constantly use cow's milk as their food.

20

'यवतिक्ताभवं तैलं स्वादुपाकं विलेखनम् ।

कफवातहरं रूक्षं कषायं नातिपित्तकृत् ॥ २१ ॥

*Taila* of *Yavatiktā*

The oil of *yavatiktā* is sweet in *vipāka* and depleting. It alleviates *kapha* and *vāta*. It is un-unctuous and astringent. It does not aggravate *pitta* in excess.

[21] सहकारभवं तैलं तिक्तं सुरभिरोचनम् ।

*Taila* of *Sahakāra*

The oil of *sahakāra* is bitter, fragrant and an appetiser.

फलोद्भवानि तैलानि यान्युक्तानीह [22] कानिचित् ।

गुणान्कर्म च विज्ञाय [23] फलानां च विनिर्दिशेत् ॥ २२ ॥

[माधवद्रव्यगुणः तैलवर्ग १०:१६-२१]

*Taila* **of other fruits**

The oil extracted from other fruits which are described elsewhere in this text shares the properties of fruits from which it is extracted.

तैलं सर्जरसोद्भूतं विस्फोटव्रणनाशनम् ।

कुष्ठपामाकृमिहरं वातश्लेष्मामयापहम् ॥ २३ ॥

*Taila* **prepared of** *Śarjarasa*

The oil prepared of *sarjarasa* cures *visphoṭa* (pustular eruptions), *vrana* (ulcer), *kusṭha* (obstinate skin diseases including leprosy), *pāmā* (itching), *kṛmi* (parasitic infection) and diseases caused by *vāyu* and *kapha.*

तैलं स्वयोनिवत्सर्वं कीर्तितं वाग्भटेन यत् ।

ततः शेषस्य बोद्धव्या योनेरेव गुणा जनैः ॥ २४ ॥

'यावन्तः स्थावराः स्नेहाः समासात्परिकीर्तिताः ।

24
सर्वे तैलगुणा ज्ञेया सर्वेऽप्यनिलनाशनाः ॥ २५ ॥
[माधवद्रव्यगुणः तैलवर्ग १०:२१-२२]

**Miscellaneous**

*Vāgbhaṭa* has stated that the oil shares the properties of the source plant from which it is extracted. Following this principle, the properties of the remaining types of oil should be determined.

वसा मज्जा च वातघ्नौ बलपित्तकफप्रदौ ।
मांसानुगस्वरूपौ च विद्यान्मेदोऽपि ताविव ॥ २६ ॥

**Muscle fat and Bone marrow**

*Vasā* (muscle fat) and *majjā* (bone marrow) alleviate *vāta* and increase strength, *pitta* as well as *kapha*. They share the properties of the meat of the respective animals. *Medas* (fat) has also similar properties.

औलूकी सौकरी वा च हंसजा कुक्कुटोद्भवा ।
वसा श्रेष्ठा स्ववर्गेषु कुंभीरमहिषोद्भवा ॥ २७ ॥
काकमृगवसा तद्वत्कारण्डोथा च निन्दिता ।

The *vasā* (muscle fat) of *ulluka, sukara, haṁsa, kukkuṭa, kumbhīra, mahiṣa, kāka* and *mṛga* is the best among their respective groups. The *vasā* (muscle fat) of *kāraṇḍa* is not useful.

सुस्वादु मेदश्छाग तु हास्तिकं तु वराद्वरम् ॥ २८ ॥

The *medas* (fat) of goat is delicious and that of the elephant is exceedingly useful.

मधुरौ बृंहणौ वृष्यौ बल्यौ मज्जा तथा वसा ।
यथा सत्त्वं तु शैत्योष्ण्यैर्वसामज्जा विनिर्दिशेत् ॥ २९ ॥

**Property**

Both *vasā* (muscle fat) and *majjā* (bone marrow) are

sweet, nourishing, aphrodisiac and strength promoting. The potency, viz., hot and cold of *vasā* and *majjā* should be determined on the basis of the nature of the animal from which they are collected.

25
'घृतमब्दात्परं पक्वं हीनवीर्यं प्रजायते ।
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥ ३० ॥'
[माधवद्रव्यगुण: तैलवर्ग २३]

**Miscellaneous**

Boiled ghee loses its potency after one year. But oil whether boiled or not maintains its potency for ever and therefore it is better.

॥ इति तैलवर्गः ॥

Thus ends the group dealing with various types of oils etc.

## NOTES AND REFERENCES

1. संयोगसंस्कारात्सर्वरोगापहं मतम् इति आकरे पाठ: ।
2. भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते इति आकरे पाठ: ।
3. तथाभिहतनिर्भुग्ने मृगव्यालादिभक्षिते इति आकरे पाठ: ।
4. तद्बस्तिषु च इति आकरे पाठ: ।
5. हृद्बस्तिपार्श्वजानूरुत्रिकपृष्ठास्थिशूलिनाम् इति आकरे पाठ: ।
6. आनाप्तष्ठीलपित्तासृक् इति आकरे पाठ: ।
7. प्लीहोदावर्त्तशूलिनाम् इति आकरे पाठ: ।
8. वातामयश्वासग्रन्थिवर्त्मविकारिणाम् इति आकरे पाठ: ।
9. पिच्छिलं इति आकरे पाठ: ।
10. च इति आकरे पाठ: ।

11. सर्वरोगप्रकोपणम् इति आकरे पाठः ।
    सर्वरोगहरं परं इति षष्ठपुस्तके पाठः ।
12. सौवर्चलेङ्गुदीपीलु इति आकरे पाठः ।
13. कंड्वस्रपित्तकृत् इति आकरे पाठः ।
14. तापोष्णे इति द्वितीयपुस्तके पाठः ।
15. सारलं इति आकरे पाठः ।
16. भृशोष्णे कटुतीक्ष्णे च इति पाठः ।
17. अक्षातिमुक्तकाक्षोडनालिकेरमधूकजम् इति आकरे पाठः ।
18. पियज्जलम् इति द्वितीयपुस्तके पाठः ।
19. श्रीपर्णीकिंशुकोद्भवम् इति आकरे पाठः ।
20. स्वादु पाके विरेचनम् इति आकरे पाठः ।
21. सतिक्तं सहकारस्य तैलं सुरभि रोचनम् इति आकरे पाठः ।
22. तानि च इति आकरे पाठः ।
23. फलानीव विनिर्दिशेत् इति आकरे पाठः ।
24. सर्वे चानिलनाशनाः इति आकरे पाठः ।
25. घृतमद्वाद्वात्परं इति द्वितीयषष्ठपुस्तकयोः पाठः ।

# CHAPTER 11

'दीपनं रोचनं मद्यं तीक्ष्णोष्णं[1] तुष्टिपुष्टिदम् ।
सुस्वादुतिक्तकटुकमम्लपाकरसं सरम् ॥ १ ॥
सकषायं स्वरारोग्यप्रतिभावर्णकृल्लघु ।
नष्टनिद्रातिनिद्रेभ्यो हितं पित्तास्रदूषणम् ॥ २ ॥
कृशस्थूलहितं रूक्षं सूक्ष्मं स्रोतोविशोधनम् ।
वातश्लेष्महरं युक्त्या पीतं विषवदन्यथा ॥ ३ ॥

[माधवद्रव्यगुणः मद्यवर्ग १२:१-३]

## *Madya* (Alcoholic drinks)

Alcoholic drink (*madya*) is a digestive stimulant, appetiser, sharp, *uṣṇa*, refreshing, nourishing, sweet, *tikta*, pungent, sour in *vipāka* and taste, laxative and astringent. It promotes good voice, health, intuition (*pratibhā*) and complexion. It is light. It is useful for persons who do not get sleep and also for persons who get sleep in excess. It vitiates *pitta* and blood. It is useful for both emaciated and corpulent persons. It is un-unctuous and subtle. It cleanes the channels

of circulation. It alleviates *vāyu* and *kapha*. All the above mentioned properties are manifested when alcohol is taken only in appropriate dose. Otherwise it works like a poison.

यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसाध्यः स्यात्तयोर्मानं पलोन्मितम् ॥४॥

*Āsava & Ariṣṭa*

The alcoholic drink prepared of unboiled drugs and water is called *āsava*. *Ariṣṭa* is prepared of decoctions and the dose of both the *āsava* and *ariṣṭa* is one *pala* (48 ml approx.).

आसवादधिकोऽरिष्टो गुणैः पाकेन लाघवात् ।
बीजद्रव्येण विज्ञेया आसवारिष्टयोर्गुणाः ॥ ५ ॥

*Ariṣṭa* is better than *āsava* because the former is light because of boiling. Their properties are determined on the basis of the property of drugs used in their preparation.

'शालिषष्टिकपिष्टादिकृतं मद्य सुरा [2]मता ।

*Surā*

The alcoholic drink prepared of the paste of *śāli* and *ṣaṣṭika* types of rice is called *surā*.

सुरा [3]गुर्वी बलस्तम्भपुष्टिमेदःकफप्रदा ॥ 6 ॥'
ग्राहिणी [4]शोफगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ।

*Surā* in heavy. It promotes strength, power of retention (*stambha*), plumpness, *medas* (fat) and *kapha*. It is constipative. It cures *śopha* (oedema), *gulma* (phantom tumour), *arśas* (piles), *grahaṇī* (sprue syndrome) and *mūtrakṛcchra* (dysuria).

[5]पुनर्नवाशालिपिष्टैर्विहिता वारुणी मता ॥ ७ ॥
[6]यत्तालखर्जूररसैः सहिता सापि वारुणी ।

### *Vāruṇī*

The alcoholic drink prepared of the paste of *punarnavā* and *śāli* is called *vāruṇī.* It is also prepared of the juice of *tāla* and *kharjūra.*

सुरावद्वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥ ८ ॥'

[भावप्रकाशः सन्धानवर्ग ११ : २३-२४]

*Vāruṇī* shares the properties of *surā.* However, it is light and it cures *pīnasa* (chronic cold), *ādhmāna* (flatulence) and *śūla* (colic pain).

**प्रसन्ना** स्यात्सुरामण्डस्ततः **कादम्बरी** घना ।

**जगलस्तदधः** प्रोक्तो **मेदको** जगलादधः ॥ ९ ॥

**Different parts**

The upper portion of *surā* (which is very thin) is called *prasannā.* The portion below that which is more dense is called *kādambarī.* The portion below that is called *jagala.* The *surā* which is at the bottom of the container is called *medaka.*

सद्यो गृहीत सारो यः कल्को ज्ञेयः स **वक्कसः** ।

**किण्वं** स्यान्मदिराबीजमसंजातं मधूलकम् ॥ १० ॥

The fermenting material from where alcohol has been taken out is called *vakkasa.* The material that is used for initiating fermentation of alcoholic drinks is called *kiṇva.* If *kiṇva* is not matured then it is called *madhūlaka.*

**प्रसन्ना**नाहगुल्मार्शः — छर्द्यरोचकवातनुत् ।

### *Prasannā*

*Prasannā* cures *ānāha* (flatulence), *gulma* (phantom tumour), *arśas* (piles), *chardi* (vomiting), *arocaka* (anorexia) and aggravated *vāyu.*

दीपन्याध्मानहृत्कुक्षितोदशूलप्रणाशिनी ॥ ११ ॥

कादंबरी गुरुर्वृष्या दीपनी वातहृत्सरा ।

*Kādambarī*

*Kādambarī* type of alcoholic drink is a digestive stimulant. It cures *ānāha* (flatulence), pain in the heart and pelvic region and colic pain. It is heavy, aphrodisiac, alleviator of *vāyu* and laxative.

जगलः कफनुद्ग्राही शोफार्शोग्रहणीहरः ॥ १२ ॥

रूक्षोष्णः पाचनो बल्यः क्षुत्तृष्णारुचिनाशनः ।

*Jagala*

*Jagala* alleviates *kapha*. It is constipative. It cures *śopha* (oedema), *arśas* (piles) and *grahaṇī* (sprue syndrome). It is un-unctuous, hot, carminative and strength promoting. It cures *kṣut* (morbid hunger), *tṛṣṇā* (morbid thirst) and *aruci* (anorexia).

मेदको मधुरो बल्यः स्तम्भनः शीतलो गुरुः ॥ १३ ॥

*Medaka*

*Medaka* is sweet, strength promoting, *stambhana* (which increases the power of retention), cooling and heavy.

'[8]वक्कसो हृतसारत्वाद् विष्टंभी[9] वातकोपनः ।

[माधवद्रव्यगुणः मद्यवर्ग १२:६]

*Vakkasa*

*Vakkasa* from which alcohol is taken out is constipative and it aggravates *vāyu*.

किण्वकं वातशमनमहृद्यं दुर्जरं गुरुः ॥ १४ ॥

*Kiṇvaka*

*Kiṇvaka* alleviates *vāyu*. It is not good for heart. It is difficult of digestion and heavy.

10

मधूलकं कफकरं स्निग्धं विष्टम्भिदुर्जरम् ।

*Madhūlaka*

*Madhūlaka* aggravates *kapha*. It is unctuous, constipative and difficult of digestion.

मृद्वीकाभिः कृतं मद्यं **मार्द्वीकं कापिशं** च तत् ॥ १५ ॥

कापिशं मदिरा श्रेष्ठं स्निग्धं स्वादुसरं लघु ।

रोचनं पाचनं हृद्यं बृंहणं बलवीर्यदम् ॥ १६ ॥

अल्पपित्तानिलकरमविदाहि कफापहम् ।

पाण्डुताक्षयमेहार्शो विषमज्वरनाशनम् ॥ १७ ॥

*Mārdvīka*

The alcoholic drink prepared of grapes is called *mārdvīka* or *kāpiśa*. It is the best among the alcoholic drinks It is unctuous, sweet, laxative, light, appetiser, carminative, cardiac tonic and nourishing. It promotes strength and semen. It causes *amlapitta* (acidity in stomach) and aggravation of *vāyu*. It does not cause burning sensation and it alleviates *kapha*. It cures *pāṇḍu* (anemia), *kṣaya* (consumption), *meha* (obstinate urinary disorders including diabetes), *arśas* (piles) and *viṣama jvara* (irregular fever).

"तस्मादल्पान्तरगुणं **खार्जूरं** वातलं गुरु ।

हृद्यं कषायमधुरं सुगन्धेन्द्रियबोधनम् ॥ १८ ॥"

[माधवद्रव्यगुणः मद्यवर्ग १२ : ११]

*Khārjūra madya*

The alcoholic drink prepared of *kharjūra* is slightly inferior in quality in comparison to the *mārdvīka* type of alcohic drink. It aggravates *vāyu* and is heavy. It is a cardiac tonic, astringent, sweet and fragrant. It activates the senses (*indriya bodhana*).

[11]धातक्यम्बुगुडैर्गौडो भिषग्भिः परिकीर्तितः ।
[12]गौडोऽग्निवर्धनो वर्णबलकृत्तर्पणः कटुः ॥ १९ ॥
तिक्तको बृंहणः स्वादुः सृष्टविण्मूत्रमारुतः ।

*Gauḍa madya*

The alcoholic drink prepared of *dhātakī*, water and *guḍa* is called by physicians "*gauḍa*". It promotes the power of digestion, complexion and strength. It is refreshing, pungent, bitter, nourishing and sweet. It promotes the elimination of stool, urine and flatus.

मधूककुसुमैर्मद्यं माधूकमिति कथ्यते ॥ २० ॥
वातपित्तकरं रूक्षं माधूकं परिकीर्तितम् ।

*Mādhūka madya*

The alcoholic drink prepared of the flower of *madhūka* is called *mādhūka*. It aggravates *vāyu* and *pitta*. It is un-unctuous.

'[13]इक्षोः पक्वैरसैः सिद्धः [14]सीधुः पक्वरसश्च सः ॥२१॥
आमैस्तैरेव [15]विहितः स च [16]शीतरसो भवेत् ।

*Sidhu*

The alcoholic drink prepared of boiled sugar cane juice is called *pakvarasa sidhu*. If unboiled sugar cane juice is used in the preparation, then it is called *śīta rasa*.

सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ॥ २२ ॥
वातपित्तकरो [17]हृद्यः [18]स्नेहनो रोचनो जयेत् ।
[19]विबन्धमेदो — शोफार्शः — [20]श्वासोदरकफामयान् ।

*Pakvarasa* type of *sidhu* is the better of the two. It promotes good voice, digestive power, strength and complex-

ion. It aggravates *vāyu* and *pitta*. It is a cardiac tonic, unctuous and an appetiser. It cures *vibandha* (constipation), *medas* (adiposity), *śopha* (oedema), *arśas* (piles), *śvāsa* (asthma), *udara* (obstinate abdominal diseases including ascitis) and diseases caused by *kapha*.

तस्मादल्पगुण: शीतरस: संलेखन: स्मृत: ।। २३ ।।

[भावप्रकाश: सन्धानवर्ग २१ : २५-२७]

*Śītarasa* type of *sidhu* is slightly inferior in quality. It is known for its depleting action.

'शार्करो मधुरो हृद्यो दीपनो बस्तिशोधन: ।

वातघ्नो मधुर: पाके रुच्य इन्द्रियबोधन: ।। २४ ।।'

[माधवद्रव्यगण: मद्यवर्ग १२ : १३]

### *Śārkara*

*Śārkara* type of alcoholic drink is sweet, cardiac tonic and digestive stimulant. It cleanses the urinary bladder and alleviates *vāyu*. It is sweet in *vipāka*, appetiser and stimulant of senses (*indriya bodhana*).

'छेदी मध्वासवस्तीक्ष्णो मेहपीनसकासजित् ।'

[माधवद्रव्यगुण: मद्यवर्ग १२ : १६]

### *Madhvāsava*

*Madhvāsava* in *chedi* (which takes away tissues by cutting) and sharp. It cures *meha* (obstinate urinary disorders including diabetes), *pīnasa* (chronic rhinitis) and *kāsa* (bronchitis).

21

आक्षिक: पाण्डुरोगघ्नो बल्य: संग्राहिको लघु ।। २५ ।।

22

कषायो मधुर: शीत: पित्तघ्नोऽसृक्प्रसादन: ।

### *Ākṣika*

*Ākṣika* type of alcoholic drink cures *pāṇḍu* (anemia). It

is a promoter of strength, constipative, light, astringent, sweet and cooling. It alleviates *pitta* and promotes blood formation.

जाम्बवो बद्धनिष्यंदो[23] तौवरो वातकोपनः ।
तीक्ष्णः कषायो मदकृत् दुर्नामकफगुल्मनुत् ।। २६ ।।'
[माधवद्रव्यगुणः मद्यवर्ग १२ : १७-१८]

*Jāmbava & Tauvara*

*Jāmbava* type of alcoholic drink helps in the prevention of excretion (*baddha niṣyanda*).

*Tauvara* aggravates *vāyu*. It is sharp, astringent and intoxicating. It cures *durnāma* (piles), aggravated *kapha* and *gulma* (phantom tumour).

'निर्दिशेद् द्रव्यतश्चान्यान् कंदमूलफलासवान् ।'
[माधवद्रव्यगुणः मद्यवर्ग १२ : २१]

'अरिष्टासवसीधूनां गुणान् कर्माणि चादिशेत् ।
बुद्ध्या[24] यथास्वसंस्कारमवेक्ष्य कुशलो भिषक् ।। २७ ।।'
[माधवद्रव्यगुण. मद्यवर्ग १२ : २३-२४]

**Miscellaneous**

Many other types of alcoholic drinks viz., *āsavas, ariṣṭas* and *sīdhus* are prepared from rhizomes, roots and fruits of different plants. Their properties should be determined by an expert physician on the basis of the properties of their ingredients and the pharmaceutical processes followed in their preparation.

पिप्पल्यादि कृतो गुल्मकफरोगहरो भवेत् ।

The alcoholic drink prepared from *pippalī* etc., cures *gulma* (phantom tumour) and diseases caused by *kapha*.

चिकित्सितेषु वक्ष्यन्तेऽरिष्टा रोगहराः पृथक् ।। २८ ।।

In a separate section on the "treatment of diseases"

*ariṣṭas* which cure different ailments will be described.

नवं मद्यमभिष्यन्दि त्रिदोषशमनं सरम् ।
25
अहृद्यं विरसं दाही दुर्गन्धं विशदं गुरु ॥ २९ ॥

**Fresh and Preserved wines**

Freshly prepared alcoholic drinks are *abhiṣyandi* (which obstructs channels of circulation). It alleviates all the three *doṣas* and is a laxative. It is not a cardiac tonic and is not tasteful (*virasa*). It causes burning sensation and produces putrid smell. It is *viśada* (non-slimy) and heavy.

'जीर्णं तदेव रोचिष्णुः क्रिमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धिगुणवल्लघु स्रोतोविशोधनम् ॥ ३० ॥'

[भावप्रकाश: सन्धानवर्ग २१ : ३१]

The same alcoholic drink, when preserved for a long time and used, is relishing. It cures *kṛmi* (parasitic infection) and aggravation of *kapha* as well as *vāyu*. It is cardiac tonic, fragrant, endowed with good qualities and light. It cleanses the channels of circulation.

व्यक्तं पञ्चरसं शुद्धं गंधयुक्तं गुणावहम् ।

**Good and bad quality**

The alcoholic drink in which five tastes are manifested, which is pure and which is endowed with good smell is of a good quality.

त्याज्यं विदाहि दुर्गन्धि विरसं क्रिमिलं घनम् ॥ ३१ ॥

The alcoholic drink which causes burning sensation, which is putrid in smell, which is of bad taste, which contains *kṛmis* (maggots) and which is thick should be rejected.

'सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
26
तामसे निन्द्यकर्माणि निद्रां च कुरुते मदः ॥ ३२ ॥

**Action on different types of individuals**

Alcoholic drink makes a person of *sāttvika* type to sing and laugh. In a *rājasika* type of person it promotes strength. In *tāmasika* type of persons it produces despisable acts and they get sleep after taking alcoholic drinks.

विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
27
प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतोपमम् ॥ ३३ ॥

**Proper method of drinking**

An alcoholic drink, taken according to the prescribed procedure, in proper doses, at the proper time, along with wholesome food, according to the capacity of the individual and in an exhilerating mood produces effects like ambrosia.

किन्तु मद्यं स्वाभावेन यथैवान्नं तथा स्मृतम् ।

अयुक्तियुक्तं रोगाय युक्तियुक्तं यथाऽमृतम् ॥ ३४ ॥

[भावप्रकाश: सन्धानवर्ग २१ : ३२-३८]

By nature, an alcoholic drink is like a food. When used inappropriately, it causes diseases and in appropriate circumstances it works like ambrosia.

प्राणाः प्राणभृतामन्नं तदयुक्त्या निहन्त्यसून् ।

विषं प्राणहरं तच्च युक्तियुक्तं रसायनम् ॥ ३५ ॥

Food, when taken appropriately, gives life and it takes away life when used inappropriately. A poison normally kills a person but when taken appropriately it works as a rejuvenating drug.

॥ इति मद्यवर्गः ॥

Thus ends the group dealing with alcoholic drinks.

1. पग्म् इति आदर्शपुस्तिकासु पाठः ।
2. स्मृता इति आकरे पाठः ।
3. गुर्वो बलस्तन्यपुष्टिमेदः कफप्रदा इति आकरे पाठः ।
4. शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् इति आकरे पाठः ।
5. पुनर्नवाशालिपिष्टिविहिता वारुणी स्मृता इति आकरे पाठः ।
6. सहितैस्तालखर्जूररसैर्या साऽपि वारुणी इति आकरे पाठः ।
7. बीज समं जातं इति आकरे पाठः ।
8. वक्वसो इति द्वितीयपुस्तके पाठः ।
9. वातवर्धनः इति द्वितीयपुस्तके पाठः ।
10. विष्टम्भिस्वादुदुर्जरम् इति षष्ठपुस्तके पाठः ।
11. धातक्यन्नगुडैर्गौडो इति षष्ठपुस्तके पाठः ।
12. गौडोनिषेवितो इति षष्ठपुस्तके पाठः ।
13. रसो इति षष्ठपुस्तके पाठः ।
14. पक्वः इति आदर्शपुस्तिकासु पाठः ।
15. यः सीधुः इति आकरे पाठः ।
16. शीतरसः स्मृतः इति आकरे पाठः ।
17. वातपित्तकरः सद्यः स्नेहनो रोचनो हरेत इति आकरे पाठः ।
18. स्नेहनो रेचने जयेत् इति षष्ठपुस्तके पाठः ।
19. विबन्दमेदः इति आकरे पाठः ।
20. शोफोदरकफामयान् इति आकरे पाठः ।
21. आक्षकः इति आकरे पाठः ।
22. पित्तघ्नोऽसृकप्रसादनः इति आकरे पाठः ।
23. बद्धनिस्यन्दस्तुवरो इति आकरे पाठः ।
24. यथास्व सस्कारमवेक्ष्य इति आकरे पाठः ।
25. दाहि इति षष्ठपुस्तके पाठः ।
26. मदिराऽऽचरेत् इति आकरे पाठः ।
27. नस्य स्यादमृतं यथा इति आकरे पाठः ।

# CHAPTER 12

कन्दमूलफलादीनि सस्नेहलवणानि च ।
यत्र द्रवेऽभिषीयन्ते तच्छुक्तमभिधीयते ॥ १ ॥

### *Śukta* (Vinegar)

The potion prepared by adding rhizomes, roots and fruits along with fat and salt in water (lit. liquid) is called *śukta*.

'रक्तपित्तकरं शुक्तं छेदि भक्तविपाचनम् ।
भेदनं लेखनं[1] पाण्डुरोगकृमिहरं[2] लघु ॥ २ ॥
तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं[3] कटुपाकि च ।

It produces *raktapitta* (a disease characterised by bleeding from different parts of the body). It causes *chedana* (which takes away tissues by cutting). It helps in the digestion of food. It is purgative and depleting. It cures *pāṇḍu* (anemia) and *kṛmi* (parasitic infection). It is light, sharp, hot, diuretic, cardiac tonic, alleviator of *kapha* and pungent in *vipāka*.

तद्वत्तदासुतं सर्वं रोचनं च[4] विशेषतः ॥ ३ ॥'
[माधवद्रव्यगुणः काञ्जिकवर्गः १३ : १-२]

When prepared by the process of fermentation (*āsuta*), it also produces the same effect. It, however, becomes a good appetiser.

"संधितं धान्यमण्डादि प्रोच्यते [5]**कांजिकं** जनैः ।

*Kāñjika*

The potion prepared by fermenting *dhānya manda* etc., is called *kāñjika*.

काञ्जिकं भेदितीक्ष्णोष्णं रोचनं पाचनं लघु ॥ ४ ॥

'दाहज्वरहरं स्पर्शात् पानाद्वातकफापहम्' ।"

[माधवद्रव्यगुणः काञ्जिकवर्ग १३ : ७]

[भावप्रकाशः सन्धानवर्ग २१ : १-२]

It is purgative, sharp, hot, appetiser, carminative and light. When applied externally, it cures *dāha* (burning syndrome) and fever. When taken internally, it alleviates *vāyu* and *kapha*.

'[6]**तुषोदकं** यवैरामैः सतुषैः शकलीकृतैः ॥ ५ ॥'

[भावप्रकाशः सन्धानवर्ग २१ : ८६]

*Tuṣodaka*

*Tuṣodaka* is prepared by the coarse powder of *yava* along with its husk and some other drugs.

'तुषाम्बु दीपनं हृद्यं [7]पाण्डुक्रिमिगदापहम् ।'

[माधवद्रव्यगुणः काञ्जिकवर्ग १३ : ६]

तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्बस्तिशूलजित् ॥ ८ ॥

It is a digestive stimulant and a cardiac tonic. It cures *pāṇḍu* (anemia) and *kṛmi* (parasitic infection). It is sharp, hot and carminative. It vitiates *pitta* and blood and cures pain in the urinary bladder,

सौवीरं तु यवैरामैः[8] पक्वैर्वा[9] निस्तुषैः कृतम् ।
गोधूमैरपि सौवीरमिति क्वचन कीर्तितम् ॥ ७ ॥

*Sauvīra*

*Sauvīra* is prepared of dehusked *yava*—either unboiled or boiled. In some places *sauvīra* is also prepared of *godhūma.*

सौवीरकं[10] ग्रहण्यर्शःकफघ्नं भेदि दीपनम् ।
[उ]दावर्ताङ्गमर्दास्थिशूलानाहेषु शस्यते ॥ ८ ॥

*Sauvīraka* cures *grahaṇī* (sprue syndrome), *arśas* (piles) and aggravation of *kapha.* It is purgative and digestive. It is useful in *udāvarta* (flatulence), *aṅga marda* (malaise), *asthi śūla* (pain in bones) and *ānāha* (tymphanitis).

आरनालं तु गोधूमैस्तत्सौवीरगुणं[11] मतम् ।

*Āranāla*

*Āranāla* is prepared of *godhūma* and it shares all the properties of *sauvīraka.*

धान्याम्लं शालिचूर्णादि[12] कोद्रवादिकृतं मतम्[13] ।
अरुचौ वातरोगेषु सर्वेष्वास्थापने हितम् ॥ ९ ॥

[भावप्रकाशः सन्धानवर्ग २१ : ८-११]

समुद्रमाश्रितानां च जनानां सात्म्यमुच्यते ।

*Dhānyāmla*

*Dhānyāmla* is prepared of the powder of *śāli, kodrava* etc. It is useful in anorexia and diseases caused by *vāyu.* It is useful in *āsthāpana* type of enema for all patients. It is *sātmya* (wholesome) for persons residing on the sea coast.

मूलकच्छदसंधानं[14] शाण्डाकी रोचनी मता ॥ १० ॥

मुद्गादिवटकैर्यातु क्रियते सा गुणोत्तमा ॥ ११ ॥
सा तु वातहरी लघ्वी रोचनी पाचनी परम् ।
शूलाजीर्णविबन्धामनाशिनी बस्तिशोधनी ॥ १२ ॥

*Śāṇḍākī*

The potion prepared by the fermentation of the leaves of *mūlaka* is called *śāṇḍākī*. It is purgative. The *śāṇḍākī* prepared of the *vaṭaka* of *mudga* etc., is superior in quality. It alleviates *vāyu*. It is light, appetiser and carminative par excellence. It cures *śūla* (colic pain), *ajīrṇa* (indigestion), *vibandha* (constipation) and *āma*. It cleanses the urinary bladder.

'का[ञ्जि]कार्द्रं[15] सलवणं पाचनं दीपनं लघु ।
वातश्लेष्महरं[16] रुच्यं विशेषादामवातनत् ॥ १३ ॥'

[माधवद्रव्यगुण: काञ्जिकवर्ग १३ : ११]

**Special preparation of *Kāñjika***

The potion prepared of *kāñjika* mixed with *ārdraka* and salt is carminative, digestive stimulant and light. It alleviates *vāyu* and *kapha*. It is an appetiser. It specifically alleviates *āmavāta* (rheumatism).

॥ इति शक्तवर्ग: ॥

Thus ends the group dealing with various types of vinegar.

## NOTES AND REFERENCES

1. जरणं इति आकरे पाठ: ।
2. श्लेष्मपाण्डुकृमिहरं इति आकरे पाठ: ।

3. कफजं इति आकरे पाठः ।
4. सुविशेषतः इति द्वितीयपुस्तके पाठः ।
   तु विशेषतः इति आकरे पाठः ।
5. काञ्जिकं कथ्यते इति आकरे पाठः ।
6. यवैरामैः इति आकरे पाठः ।
7. हृत्पाण्डुक्रिमिरोगनुत् इति आकरे पाठः
8. सौवीरमाचार्य्या. इति आकरे पाठः ।
9. केचिदूचिरे इति आकरे पाठः ।
10. सौवीरं इति आकरे पाठः ।
11. गोधूमैरामैः स्याग्निस्तुषीकृतैः इति आकरे पाठः ।
12. च इति आकरे अधिकं पाठः ।
13. भवेत् इति आकरे पाठः ।
14. मूलकच्छदसंधाने इति षष्ठपुस्तके पाठः ।
15. काञ्चिकाद्रै इति द्वितीयपुस्तके पाठः ।
16. वातपित्तहरं इति षष्ठपुस्तके पाठः

# CHAPTER 13

'मूत्रं [1] गोऽजाविमहिषीगजाश्वोष्ट्रखरोद्भवम् ।

*Mūtra* (Urine)

**Variety**

The urine of cow, goat, sheep, buffalo, elephant, horse, camel and donkey is commonly used in medicine.

पित्तलं तीक्ष्णरूक्षोष्णं लवणानुरसं कटु ॥ १ ॥

कृमिशोफोदरानाहशूलपाण्डुकफानिलान् ।

गुल्मारुचिविषश्वित्रकुष्ठार्शांसि जयेल्लघु ॥ २ ॥

**General Property**

Urine aggravates *pitta*. It is sharp, un-unctuous, hot, saline in *anurasa* (subsidiary taste) and pungent. It cures *kṛmi* (parasitic infection), *śopha* (oedema), *udara* (obstinate abdominal diseases including ascitis), *ānāha* (flatulence), *śūla* (colic pain), aggravation of *kapha* as well as *vāyu*, *gulma* (phantom tumour), *aruci* (anorexia), *viṣa* (poisoning), *śvitra* (leucoderma) and *kuṣṭha* (obstinate skin diseases including leprosy). It is light.

[2]गोमूत्रं लघु तीक्ष्णोष्णं सक्षारत्वान्न वातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥ ३ ॥

**Cow's urine**

Cow's urine is light, sharp, hot and alkaline. Therefore, it does not aggravate *vāyu*. It is light, digestive stimulant, promoter of intellect, aggravator of *pitta* and alleviator of *kapha* as well as *vāyu*.

शूलगुल्मोदरानाहविरेका[3]स्थापनादिषु ।
[4]मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥ ४ ॥

In diseases which are amenable to urine like *śūla* (colic pain), *gulma* (phantom tumour), *udara* (obstinate abdominal diseases including ascitis) and *ānāha* (flatulence) and for the purpose of purgation therapy and *āsthāpana* therapy cow's urine should be used.

कासश्वासापहं [5]शोफकामलापाण्डुरोगनुत् ।
छागं रूक्षोष्णकटुकं [6]नाडीव्रणविषापहम् ॥ ५ ॥

**Goat's urine**

The urine of goat cures *kāsa* (bronchitis), *śvāsa* (asthma), *śopha* (oedema), *kāmalā* (jaundice) and *pāṇḍu* (anemia). It is ununctuous, hot and pungent. It also cures *nāḍīvraṇa* (sinus) and *viṣa* (poisoning).

प्लीहोदरश्वासकास[7]शोफवर्चोग्रहे हितम् ।
सक्षारं तिक्तकटुकमुष्णं वातघ्नमाविकम् ।

**Sheep's urine**

The urine of sheep cures *plīhan* (splenic disorder), *udara* (obstinate abdominal disorders including ascitis), *śvāsa*

(asthma), *kāsa* (bronchitis), *śopha* (oedema) and *varcograha* (retention of stool). It is alkaline, bitter, pungent and hot. It alleviates *vāyu*.

दुर्नामोदरशूलेषु कुष्ठमेही[8] विशुद्धिषु ॥ ६ ॥
आनाहशोथगुल्मेषु पाण्डुरोगेषु[9] **माहिषम्** ।

**Buffalo's urine**

The urine of buffalo is useful in *durnāma* (piles), *udara* (obstinate abdominal diseases including ascitis), *śūla* (colic pain), *kuṣṭha* (obstinate skin diseases including leprosy), *meha* (obstinate urinary disorders including diabetes), *viśuddhi* (elimination therapy), *ānāha* (tymphanitis), *śotha* (oedema), *gulma* (phantom tumour) and *pāṇḍu* (anemia).

सतिक्तलवणं भेदि वातघ्नं पित्तकोपनम् ॥ ७ ॥
तीक्ष्ण क्षारं किलासे च **नागमूत्रं** प्रयोजयेत् ।

**Elephant's urine**

The urine of elephant is bitter, saline and purgative. It alleviates *vāyu* and aggravates *pitta*. It is sharp and alkaline. It is useful in *kilāsa* (a type of leucoderma).

दीपनं कटु तीक्ष्णोष्णं वातचेतोविकारनुत्[10] ॥ ८ ॥
**आश्वं**[11] कफहरं[12] मूत्रं कृमिदद्रुविनाशनम्[13] ।

**Urine of Horse**

The urine of horse is a digestive stimulant, pungent, sharp and hot. It cures diseases caused by aggravation of *vāyu* and of the mind. It alleviates *kapha* and cures *kṛmi* (parasitic infection) and *dadru* (ring worm).

**औष्ट्रं** कुष्ठोदरोन्मादशोफार्शःकृमिवातनुत् ॥ ९ ॥

**Camel's urine**

The urine of camel cures *kuṣṭha* obstinate skin

diseases including leprosy), *udara* (obstinate abdominal diseases including ascitis), *unmāda* (insanity), *arśas* (piles) and *kṛmi* (parasitic infection). It alleviates *vāyu*.

गरचेतोविकारघ्नं तीक्ष्णं[14] जठररोगनुत् ।
दीपनं गार्दभं मूत्रं कृमिवातकफापहम् ॥ १० ॥

**Urine of donkey**

The urine of donkey cures *gara* (poisoning) and *cetovikāra* (mental disease). It is sharp. It cures *jaṭhara* (obstinate abdominal diseases including ascitis). It is a digestive stimulant. It also cures *kṛmi* (parasitic infection). It alleviates *vāyu* and *kapha*.

कषायतिक्तमेतेषां हिक्काश्वासहरं[15] शकृत्[16] ।
पित्तरक्तकृमिहरं रोचनं कफवातजित् ॥ ११ ॥'

[माधवद्रव्यगुण: मूत्रवर्ग १४ : १-१२]

**Stool**

The stool of these animals is astringent and bitter. It alleviates *hikkā* (hiccup), *śvāsa* (asthma), vitiation of *pitta* and blood and *kṛmi* (parasitic infection). It is appetiser and it alleviates *kapha* and *vāyu*.

'नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् ।
रक्तपामाहरं तीक्ष्णं सक्षारलवणं स्मृतम् ॥ १२ ॥

**Human urine**

The urine of human beings cures *gara* (poisoning). It is rejuvenating. It alleviates vitiation of blood and *pāmā* (itching). It is sharp, alkaline and saline.

गोजाविमहिषीणां[17] तु स्त्रीणां मूत्रं प्रशस्यते ।
खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं[18] मतम् ॥ १३ ॥'

[भावप्रकाश: मूत्रवर्ग १९ : ७-८]

**Male and Female urine**

The urine of females of cattle, goat, sheep and buffalo is more useful On the other hand, the urine of the males of donkey, camel, elephant, human being and horse is known to be useful.

स्त्रीपुंसयोरनियमश्चरकादौ यतो मतः ।
तस्मादन्यतमं शास्त्रं विशेषात्स्त्रीसमुद्भवम् ॥ १४ ॥

In classics like *Caraka*, this distinction between male and female urine has not been made. Therefore, in actual practice urine of either the male or female animal can be used. However, the urine of female animal is more useful.

Thus ends the group dealing with various types of urine.

## NOTES AND REFERENCES

1. गोजाविमहिषीगजाश्वोष्ट्रखरोद्भवम् इति आकरे पाठः ।
2. कटु इति आकरे पाठः ।
3 शूलगुल्मोदरानाहविरेकास्थापनादिषु इति आकरे पाठः ।
4. मूत्रप्रयोगे सर्वेषु इति आकरे पाठः ।
5 (क) शोथकामलापाण्डुरोगनुत् इति आकरे पाठः ।
(ख) शोफकामलापाण्डुदाहनुत् इति षष्ठपुस्तके पाठः ।
6. नाडीविषगरापहम् इति आकरे पाठः ।
7. प्लीहोदरश्वासकासशोथवर्चोग्रहे इति आकरे पाठः ।
8 कुष्ठमेहविशुद्धिषु इति आकरे पाठः ।
9. पाण्डुरोगे च इति आकरे पाठः ।
10. वातरोगविकारनुत् इति आकरे पाठः ।
11. कासहरं इति आकरे पाठः ।

12. रुक्षं इति आकरे पाठः ।
13. कृमिकण्डुविनाशनम् इति षष्ठपुस्तके पाठः ।
14. कृमिवातविषापहम् इति आकरे पाठः ।
15. हिध्माश्वासहरं इति आकरे पाठः ।
16. सकृत् इति द्वितीयपुस्तके पाठः ।
17. गोऽजाऽविमहिषीणां इति आकरे पाठः ।
18. स्मृतम् इति आकरे पाठः ।

# CHAPTER 14

**सामान्यतो जलगुणा :**

'पानीयं श्रमनाशनं क्लमहरं मूर्च्छापिपासाहरम् ।
तन्द्रास्वप्नविनाशनं बलकरं स्याज्जीवनं तर्पणम् ॥१॥
हृद्यं गुप्तरसं ह्यजीर्णशमनं चैकान्तपथ्यं परम् ।
शीतं लघ्वमृतोपमं रसगणानां कारणं छर्दिहृत् ॥ २ ॥

**Water**

**General properties**

Water removes physical and mental fatigue, *mūrchā* (fainting), thirst, *tandrā* (drowsiness) and *svapna* (sleep). It promotes strength. It is life giving, refreshing and caradiac tonic. It has unmanifested tastes. It cures indigestion. It is wholesome par excellence. It is cooling, light and like ambrosia. It helps in the manifestation of all tastes. It cures *chardi* (vomiting).

**अथ तद्भेदा :**

पानीयं प्रथमं प्रोक्तं **दिव्यं भौम**मिति द्विधा ।

**Varieties**

Water is first classified into two categories viz., *divya* (which falls from the sky) and *bhauma* (which is available on the earth).

दिव्यं त्वनिर्देश्यरसं जीवनं तर्पणं लघु ॥ ३ ॥
रसायनं तृषामूर्च्छातन्द्रादाहक्लमापहम् ।
सौम्यं च पाचनं बल्यं मदनिद्रा त्रिदोषनुत् ॥ ४ ॥
आश्वासजननं ह्लादि श्रमघ्नमतिवृद्धिकृत् ।

The former type of water has no manifested taste. It is life-giving, refreshing, light and rejuvenating. It cures *tṛṣā* (morbid thirst), *mūrchā* (fainting), *tandrā* (drowsiness), *dāha* (burning syndrome) and *klama* (mental fatigue). It is *saumya* (cooling) and carminative. It promotes strength and cures *mada* (intoxication), *nidrā* (excessive sleep) and vitiation of all the three *doṣas*. It gives consolation and happiness. It removes physical fatigue and promotes intellect.

**धाराजं करकाजातं तौषारं हैममेव च ॥ ५ ॥**
चतुर्धा[2] सलिलं दिव्यं तेषु धारं गुणाधिकम् ।

**Classification of *divya* type of water**

*Divya* type of water is of four types viz., *dhārāja*, *karakājāta*, *tauṣāra* and *haima*. Of them, *dhārāja* is the best.

पतितं यत्तु गगनात्तद्धारमिति कीर्तितम् ॥ ६ ॥
तत्तु धौतशिलाहर्म्यपटादिभ्यो विनिःसृतम् ।
हेमाद्रिपात्रगं पेयं यावन्न विकृतं भवेत् ॥ ७ ॥
तत्तु तावद्भवेद्दिव्यं यावत्प[त]ति[3] [न]भुवि[4] ।
धारं नीरं मरुत्पित्तकफास्रहरते लघु ॥ ८ ॥

### *Dhārāja* water

The water that falls from the sky is called *dhārāja.* It should be collected on a clean roof made of stones or through a piece of cloth and collected in vessels of gold and stone. It should be used before it gets spoiled. The rain water which is collected before it falls on the earth is called *divya. Dhāra* type of divya water alleviates *vāyu*, *pitta* and *kapha* and it is light.

धारं वारि द्विधा ज्ञेयं गांगसामुद्रभेदतः ।

**Variety**

The *dhāra* type of water is of two type viz., *gāṅga* (which is derived from the river (?) Ganges and *sāmudra* (which is derived from the sea).

'आकाशगंगा [5]संभूतं जलमादाय दिग्गजाः ॥ ९ ॥
मेघैरन्तरिता वृष्टिं कुर्वन्तीति वचः सताम् ।

According to the saints, *diggajas* (elephant guiding different directions as described in the epic) collect water from *ākāśa gaṅgā* (the gaṅgā river in the sky as described in the epic) and release it on the earth in the form of rain through the cloud.

गंगामाश्वयुजे मासि [6]यत्प्रवर्षति तोयदः ॥ १० ॥
[7]सर्वदा तज्जलं [8]पेयं तथा च चरके वचः ।

The *gaṅgā* water which rains from the clouds in the month of *aśvina* (September-October) is always useful for drinking. This is described in *Caraka saṁhitā.*

[9]स्थापितं हैमजे पात्रे राजते मृण्मयेऽपि वा ॥ ११ ॥
शाल्यन्नं येन संसिक्तं भवेदक्लेदि वर्णवत् ।
तद्गांगं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ॥ १२ ॥'
[भावप्रकाशः वारिवर्ग १३ : १०-१३]

If this *gāṅga* type of water is collected in a vessel of gold, silver or stone and *śāli* rice is kept in it soaked then this rice does not deteriorate (*akledı*) and it retains its colour for a long time. This is the characteristic feature of *gāṅga* type of water. In *sāmudra* type of water this *śāli* rice deteriorates.

'आश्विने मासि सामुद्रं गुणैर्गाङ्गवदादिशेत्[10] ।'

The *sāmudra* type of water which rains in the month of *aśvina* (September-October) shares all the properties of the *gāṅga* type of water.

'फूत्कारविषवातेन नागानां व्योमचारिणाम् ॥ १३ ॥
वर्षासु सविषं तोयं दिव्यमप्याश्विनादृते[11] ।
अनार्त्तवं प्रमुञ्चन्ति वारि वारिधरास्तु यत् ॥ १४ ॥
तत्त्रिदोषाय सर्वेषां देहिना परिकीर्तितम् ।

**Poisonous Water**

The *nāgas* (snakes as described in the epic) moving in the sky emit (*phutkāra*) poisonous air which impregnates the rain water and such rain falls take place from clouds unseasonally i.e. during months other than *aśvina* (September and October). This type of water aggravates all the three *doṣas* in living creatures.

[12]दिव्यं वाय्वग्निसंयोगात्संहताः खात्पतन्ति याः ॥१५॥
[13]शिलाशकलवच्चापस्ताः कारक्योऽमृतोपमाः ।

*Karakājāta* **(Water from hail stone)**

The *divya* type of water gets condensed because of the impact of wind and heat (*agni*) and falls from the sky in the form of pieces of stone. This is called *karakājāta* water which is like ambrosia.

[14] कारक्योत्थं जलं रूक्षं विशदं गुरु च स्थिरम् ॥ १६ ॥
[15] दारणं शीतलं सान्द्रं पित्तहृत्कफवातकृत् ।

This type of water is un-unctuous, non slimy (*viśada)*, heavy and *sthira* (stable). It is penetrating (*dāraṇa*), cooling and dense. It alleviates *pitta* and aggravates *kapha* as well as *vāta.*

[16] अपितात् याः समुद्रान्ते [17] वह्नि [18] राप[श्च]तद्भवा ॥१७॥
धूमावयवनिर्मुक्तास्तुषाराख्यास्तु [19] ता [20] मताः ।
अपथ्याः प्राणिनां प्रायो भूरुहाणां तु ता हिताः ॥१८॥

*Tauṣāra* (**Water from dew & frost)**

The water on the sea coast gets impregnated with heat (*vahni*). It is free from portions of smoke and is called *tuṣāra.* It is generally unwholesome for living creatures but it is useful for plants.

[21] तौषारं वातलं शीतं रूक्षं सान्द्रमपित्तलम् ।
कफोरुस्तम्भ[22]कुष्ठाग्निमेदोगण्डादिरोगनुत् ॥ १९ ॥

*Tauṣāra* types of water aggravates *vāyu.* It is cooling, un-unctuous and dense. It does not aggravate *pitta.* It cures ailments like aggravation of *kapha, urustambha* (a disease characterised by immobility of thigh), *kuṣṭha* (obstinate skin diseases including leprosy), *agni* (digestive power), *medas* (adiposity) and *gaṇḍa* (goitre).

हिमवच्छिखरादिभ्यो द्रवीभूयाभिवर्षति ।
यत्तदेव हिमं हैमं जलमाहुर्मनीषिणः ।

*Haima* (**Water from snow)**

When the snow (*hima*) collected on the top of hills melts and this water comes through rain fall, it is called *haima* water,

[23]
हैमं गुरुतरं शीतं पित्तनुद्वातवर्धनम् ॥ २० ॥

This water is heavier and cooling. It alleviates *pitta* and aggravates *vāyu.*

अन्ये तु :

[24]
जलमनलधूमेरितमन्तःसमुद्रस्य यद्घनीभूतम्[25] ।
पवनानीतमुदीच्यां तद्धिममिति कीर्त्यते मुनिभिः ॥२१॥

[भावप्रकाशः वारिवर्ग १३ : १९-२३]

**Another view**

The sea water being impelled by heat (*anala*) and smoke gets condensed (solidified). It is carried by the wind to the north which is called *hima* (snow) by sages.

'हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममेव च ।
कफं न तद्दूषयति न पित्तं न च मारुतम्'[26] ॥ २२ ॥

This snow (*hima*) water is cooling, ununctuous, *dāraṇa* (which causes excission) and subtle. It does not vitiate either *kapha* or *pitta* or *vāyu.*

एतेन हिमस्य द्वैविध्यमा[ख्या]तम्'[27] ।

Thus, there are two types of *haima* water.

अथ भौमं जलं वक्ष्ये यथा देशगुणान्वितम्[28] ॥ २३ ॥

भौममम्भः प्रथमतस्त्रिविधं मुनिभिर्मतम् ।

आनूप जाङ्गलं चैव तथा साधारणं क्रमात् ॥ २४ ॥

*Bhauma* **(Water on earth)**

Depending upon the attributes of the land, the *bhauma*

type of water is first classified into three types viz., *ānūpa*, *jāngala* and *sādhāraṇa*.

देशः प्रचुरपानीयो बहुवृक्षसमाकुलं ।
बहुवातकफव्याधिरानूप इति कीर्तितः ॥ २५ ॥
अल्पोदकः स्वल्पवृक्षः प्रायः पित्तासृगामयः ।
विज्ञेयो जाङ्गलो देशस्ताभ्यां साधारणः परः ॥ २६ ॥

The area which contains a lot of water, which is surrounded by many trees and where many diseases caused by *vāyu* and *kapha* are manifested is called *ānūpa* (marshy land). The land which has less of water and fewer trees and where diseases of *pitta* and blood occur is called *jāṅgala* (arid land). The land which is in between these two categories is called *sādhāraṇa* (moderate land).

आनूपोद्भवमानूपं जांगलं जङ्गलोद्भवम् ।
साधारणस्थलोत्थं च जल साधारणं मतम् ॥ २७ ॥

The water found in marshy areas is called *ānūpa*, that of arid areas is called *jāṅgala* and that of the moderate type of land is called *sādhāraṇa*.

'आनूपं वार्यभिष्यन्दि स्वादुस्निग्धं तथा[29] गुरु ।
वह्निहृत्कफकृन्नित्यं विकारान्कुरुते[30] बहून् ॥ २८ ॥
[भावप्रकाशः वारिवर्ग १३ : ३०]

ज्ञेयं जांगलमानूप विपरीतगुणान्वितम् ।
'साधारणं तु मधुरं दीपनं शीतलं लघु ।
तर्पणं प्रीतिजनकं[31] तृष्णाघ्नं दाहदोषनुत् ॥ २९ ॥'
[भावप्रकाशः वारिवर्ग १३ : ३१]

**Attributes**

The *ānūpa* type of water reduces the power of digestion

and aggravates *kapha*. It is despisable. It causes many diseases. The *jāṅgala* type of water has properties which are just opposite to *ānūpa* type. The *sādhāraṇa* type of water is sweet, digestive stimulant, cooling, light and refreshing. It producess the feeling of comfort and cures *tṛṣṇā* (morbid thirst) and *dāha* (burning syndrome).

भौमस्य पयसोऽन्येऽपि भेदाः सन्ति वदामि तान् ।
नादेय प्रभृतिस्तेषां लक्षणानि गुणानपि ।। ३० ।।

**Another Classification**

The *bhauma* type of water is also classified in a different way like *nādeya* (which is derived from *nadī* or river) etc. Their characteristics and properties will now be described.

'नद्या नदस्य वा नीरं नादेयमिति कीर्तितम् ।

**River Water**

The water of a *nadī* (small river) or *nada* (big river) is called *nādeya*.

**नादेयमुदकं** रूक्षं वातल लघु दीपनम् ।
32
अनभिष्यन्दि विशदं कटुक कफपित्तजित् ।। ३१ ।।

This is ununctuous, aggravator of *vāyu*, light, digestive stimulant, *anabhiṣyandi* (which does not obstruct the channels of circulation), *viśada* (non-slimy) and pungent. It alleviates *kapha* and *pitta*.

नद्यः शीघ्रप्रवाहाश्च सर्वा याश्चामलोदकाः ।
गुर्व्यः शैवालसछन्ना मंदगाः कलुषाश्च याः' ।। ३२ ।।
[भावप्रकाशः वारिवर्ग १३: ३३-३४]

All rivers which have a strong flow carry pure water. The water of the river which flows very slowly, is heavy. It is covered with moss etc. and its water is not pure.

'नदीसरस्तडागस्थे कूपप्रस्रवणादिजे ।

उदके देशभेदेन गुणान् दोषांश्च लक्षयेत् ।। ३३ ।।

**Other Varieties**

The good and bad qualities of the water of rivers, lakes, ponds, wells and springs should be determined on the basis of the attributes of the land in which they are situated.

विदार्य भूमिं निम्नां यन्महत्या धारया स्रवेत् ।
तत्तोयमौद्भिद नाम भिषजः[33] प्राक्तना जगुः ।। ३४ ।।

*Audbhida* **(Water coming out from earth)**

The water which comes out in a strong current by penetrating the low lying land is called *audbhida* by ancient physicians.

औद्भिदं वारि पित्तघ्नमविदाह्यतिशीतलम् ।
प्रीणनं मधुर बल्य ईषद्वातकर लघु ।। ३५ ।।

The *audbhida* type of water alleviates *pitta*. It does not produce burning sensation. It is exceedingly cold, refreshing, sweet and strength promoting. It is a mild aggravator of *vāyu* and is light.

शैलसानुस्रवद्वारिप्रवाहो निर्झरो मतः[34] ।
सानु[35] प्रस्रवण चापि तज्जल नैर्झर भवेत् ।। ३६ ।।

*Nirjhara* **(Water from Spring)**

The water that flows from the peak of the mountain is called *nirjhara*. The water of the spring that is found in the peak is also called *nirjhara*.

नैर्झर रुचिकृन्नीरं कफघ्नं दीपन लघु ।
मधुरं कटुपाकं च वातलं[36] नातिपित्तकृत् ।। ३७ ।।

The water of *nirjhara* is appetiser, alleviator of *kapha*, digestive stimulant, light, sweet in taste and pungent in *vipāka*.

It aggravates *vāyu* and excessively aggravates *pitta.*

नद्याः शैलवराच्चापि स्रुतमेकत्र संस्थितम् ।

कुमुदांभोजसंछन्नं वारि सारसमुच्यते ॥ ३८ ॥

*Sārasa* **(Water of pond)**

The water that flows down from the big mountain and gets accumulated in the valley is called *sārasa.* It is covered with *kumuda* and *padma.*

सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु ।

तुवरं रोचनं रूक्षं [37] बद्धमूत्रमलं शुचिः ॥ ३९ ॥

The *sārasa* type of water is strength promoting, alleviator of *tṛṣṇā* (morbid thirst), sweet, light, astringent, appetiser and un-unctuous. It causes retention of urine and stool. It is pure.

अल्पं सरः पल्वलं स्याद्यत्र दक्षिणगे[38] रवौ ।

न तिष्ठति जलं किञ्चित्तत्रस्थं वारि पाल्वलम् ॥४०॥

*Pālvala* **(Water of small pond)**

A small pond is called *palvala.* During the southern solstice when the sun moves towards a southernly direction, these small ponds get dried. The water of these small ponds is called *pālvala.*

पाल्वलं वार्यभिष्यन्दि गुरु स्वादु त्रिदोषकृत् ।

This water is *abhiṣyandi* (which obstructs the channels of circulation), heavy and sweet. It aggravates all the three *doṣas.*

प्रशस्तभूमिभागस्थं नैकसंवत्सरोषितम् ।

मुनिभिः किल तत्तोयं ताडागमिति कीर्तितम् ॥ ४१ ॥

### *Tāḍāga* (Water from lake)

The water that gets accumulated for many years in a plain land is called *tāḍāga* by the sages.

39

ताडागमुदकं स्वादु: कषायं कटुपाकि च ।

वातलं बद्धविण्मूत्रमसृक्पित्तकफापहम् ॥ ४२ ॥

The water of *taḍāga* is sweet and astringent in taste and pungent in *vipāka*. It aggravates *vāyu*. It causes retention of stool and urine. It alleviates vitiation of blood, *pitta* and *kapha*.

शिलादिभिरबद्धो य: सतीर्था वापिकाकृति ।

सगर्त: कथितश्चुण्डस्तज्जलं चौण्डमुच्यते ॥ ४३ ॥

### *Cauṇḍa* water

The receptacle of water dug in the earth of the size of a *vāpi* (big well) which has no boundary wall of stone and which has a staircase to go down is called *cuṇḍa*. Its water is called *cauṇḍa*.

40

चौण्ड्यं नीरं वह्निकरं रूक्षं कफहरं लघु ।

मधुरं पित्तनुद्रुच्यं पाचनं विशदं मतम् ॥ ४४ ॥

This water stimulates digestion. It is ununctuous, alleviator of *kapha*, light, sweet, alleviator of *pitta*, appetiser, carminative and *viśada* (non slimy).

"पाषाणैरिष्टिकाभिर्बद्धास्याद्या तु कूपवत् ।

वापी सा खलु विज्ञेया कृतसोपानपङ्क्तिका ॥४५॥

### *Vāpī* water

The water reservoir which is like a well, which has a boundary wall of stone or brick and which has a staircase to go down, is called *vāpī*.

वाप्यं क्षारं जलं पित्तकरं वातकफापहम्

तदेव यदि मिष्टं स्यात्तदा पित्तानिलापहम् ॥ ४६ ॥

The water of the *vāpī* is alkaline. It aggravates *pitta* and alleviates *vāyu* as well as *kapha*. If this water is sweet in taste then it alleviates *pitta* and *vāyu*.

भूमौ खातोऽल्पविस्तारो गाम्भीर्यणाधिकोभृशम् ।

[41]

इष्टिकादिनिबद्धश्च स कूप इति कीर्तितः ॥ ४७ ॥"

### *Kūpa* water

The water reservoir prepared by digging earth which has no wide opening but which is very deep and which has a boundary wall of bricks is called *kūpa* (well).

'कौपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु ।

तत्क्षारं कफवातघ्नं दीपनं पित्तकृत्परम्' ॥ ४८ ॥

[भावप्रकाश: वारिवर्ग १३ : ४९]

If the water of this well is sweet in taste, then it alleviates all the three *doṣas*. It is wholesome and light. If the taste of this water is alkaline, then it alleviates *kapha* and *vāyu*. It is a digestive stimulant and it aggravates *pitta*.

'नद्यादिनिकटे भूमिर्या भवेद्वालुकामयी ।

उद्भाव्यते ततो यत्तु तज्जलं विकिरं विदुः ॥ ४९ ॥

### *Vikira* water

The water that is taken out by digging small hole in the sandy river bed is called *vikira*.

विकिरं शीतलं स्वच्छं निर्दोषं लघु च स्मृतम् ।

तुवरं स्वादु पित्तघ्नं क्षारं तत्पित्तलं मनाक् ॥ ५० ॥

This water is cooling, pure, free from defects and light.

If it is either astringent or sweet then it alleviates *pitta*. If it is alkaline then it slightly aggravates *pitta*.

केदार[42] क्षेत्रमुद्दिष्ट कैदारं तज्जलं भवेत्[43] ।

**Kedāra water**

*Kedāra* means a field. The water of the field is called *kaidāra*.

कैदारं वार्यभिष्यन्दि मधुरं गुरु दोषकृत् ।। ५१ ।।

This water is *abhiṣyandi* (which obstructs the channels of circulation), sweet and heavy. It aggravates *doṣas*.

वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं[44] जलम् ।

त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ।। ५२ ।।

**Rain water**

The rain water which is collected from the ground on the same day is unwholesome. If it remains on the ground for three nights then it becomes clear and acts like ambrosia.

हेमन्ते सारसं नीरं[45] ताडागं वा गुणावहम्[46] ।

शिशिरेऽपि[47] हितं तोयं सारसं वा तडागजम् ।। ५३ ।।

वसन्तग्रीष्मयोः कौप्यं[48] वाप्यं वा नैर्झरं जलम् ।

नादेयं वारि नादेयं वसन्तग्रीष्मयोर्बुधैः' ।। ५४ ।।

[भावप्रकाशः वारिवर्ग १३ : ५५-६०]

[49] 'विषवत्पत्रपुष्पादिदुष्टनिर्झरयोगतः ।

[50] औद्भिदं वान्तरिक्षं वा वारि वर्षासु शस्यते ।। ५५ ।।

शस्तं शरदि नादेयं नीरमंशूदकं परम् ।

**Water in different seasons**

In the *hemanta* (early winter) and *śiśira* (later part of winter) seasons the water of *saras* (big pond) and *taḍāga* (small pond) is useful. In spring and summer the water of a well, *vāpī* (big well) and *nirjhara* (spring) is useful. In the spring and summer seasons, river water should not be used because it gets polluted by poisonous leaves, flowers etc., and also by the polluted springs. During the rainy season, *audbhida* type of water (that comes out by piercing the earth) and the water that is collected directly from the sky (*āntarikṣa*) is useful. During autumn, river water and *aṁśūdaka* (described below) are useful.

51

दिवा रविकरैर्पुष्टं निशि शीतकरांशुभिः ।
ज्ञेयमंशूदकं नाम स्निग्धं दोषत्रयापहम् ॥ ५६ ॥
अनभिष्यंदिनिर्दोषमांतरिक्षजलोपमम् ।
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥ ५७ ॥

*Aṁśūdaka*

The water which is exposed to the sun's rays during the day time and the moon's rays during the night time is called *aṁśūdaka*.

It is unctuous. It alleviates all the *doṣas*. It is *anabhiṣyandi* (which does not obstruct the channels of circulation) and free from defects. It is like *āntarikṣa jala* (water collected directly from the sky). It is strength promoting, rejuvenating, intellect promoting, cold and light. It is like ambrosia.

अन्यच्च :

52

शरदि स्वच्छमुदक[म]गस्त्यस्याखिलं हितम् ।

**Another view**

The clean water of autumn which is impregnated with the rays of *agastya* (star canopus) is always useful.

**अथवृद्धसुश्रुतमतम् :**

पौषे वारि सरोजातं माघे तत्तु तडागजम् ।
53 54
फाल्गुने कूपसंभूतं चैत्रे चौण्ड्य हितं मतम् ।। ५८ ।।
55
वैशाखे नैर्झरं नीरं ज्येष्ठे शस्तं तदौद्भिदम् ।
आषाढे शस्यते कौपं श्रावणे दिव्यमेव च ।। ५९ ।।
56
भाद्रे कौपं पयः शस्तमाश्विने चौण्ड्यमेव च ।
57
कार्त्तिके मार्गशीर्षे च पयोमात्रं प्रशस्यते ।। ६० ।।

**Water in different months according to *Vṛddha Susruta***

In the month of *pauṣa* (December-January) the water of *saras* (big pond) is useful. In the month of *māgha* (January-February) the water of *taḍāga* (small pond) is useful. In *phālguna* (February—March) well water is useful. In *caitra* (March—April) the water of *cauṇḍya* (a big well without a boundary wall) is useful. In *vaiśākha* (April—May) spring water is useful. In *jyeṣṭha* (May—June) *audbhida* (the water that comes out penetrating the earth) is useful. Well-water is useful in *āṣāḍha* (June—July) and the water collected directly from the sky (*divya*) is useful in *śrāvaṇa* (July—August). In *bhādrapada* (August—September) well-water is useful and in *aśvina* (September—October) the water of *cuṇḍa* (big well without any border wall) is useful. In *kārtika* (October—November) and *mārgaśīrṣa* (November—December) all types of water are useful.

**अथ जलोद्धरणकाल :**

भौमानामम्भसां प्रायो ग्रहणं प्रातरिष्यते ।
58 59
शीतलं निर्मलत्वं च यतस्तेषां परो गुणाः ।। ६१ ।।

**Time of Collection**

All types of water available on the ground should be collected in the early morning because during this time they are extremely cold and clean.

अत्यम्बुपानान्नविपच्यतेऽन्न[60]मनम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्ध[61]नाय मुहुर्मुहुर्वारि पिबेदभूरि ॥६२॥'

[भावप्रकाश: वारिवर्ग १३ : ६१-६६]

**Mode of intake**

Taking water in excess or not taking any water—both affect the process of digestion of food. Therefore, with a view to promoting the power of digestion, a person should take water in small quantities very frequently.

चन्द्रकान्तोद्भव रूक्षं विषपित्तज्वरापहम् ।

[माधवद्रव्यगुण: तोयवर्ग १५ : ११]

### *Candrakānta* water

The water collected by moon stone (*candrakānta*) is un-unctuous. It cures *viṣa* (poisoning), aggravation of *pitta* and *jvara* (fever).

सामुद्रमुदकं विस्रं लवणं सर्वदोषकृत् ॥ ६३ ॥

### Sea-water

The water of the sea is *visra* (foul smelling) and saline. It aggravates all the *doṣas*.

नद्यः पाषाणविच्छि[62]न्नक्षुभिताभिहतोदकाः ।
मलयप्रभवा[63] याश्च तासामम्भोऽमृतोपमम् ॥ ६४ ॥

### River water

The rivers which pass in a strong current through stones and those whose source is in the Malaya mountain—their water is like ambrosia.

पश्चिमाभिमुखा याश्च पथ्यास्ता निर्मलोदकाः ।
प्रायो मृदु[64]वहा गुर्व्यो याश्च पूर्वसमुद्रगाः ॥ ६५ ॥

पारिजात्रभवा[65] याश्च विन्ध्यसह्यभवाश्च याः ।

शिरोहृद्रोगकुष्ठानां हेतवः श्लीपदस्य च ॥ ६६ ॥

The rivers which flow towards the west generally carry clean water. Those flowing towards the sea of the east are generally of slow current and their water is heavy. Rivers originating from *Parijātra*, *Vindhya* and *Sahya* mountains carry water which causes *śiraroga* (diseases of head), *hṛdroga* (diseases of heart), *kuṣṭha* (obstinate skin diseases including leprosy) and *ślīpada* (filariasis).

चन्द्रार्ककरसंस्पृष्ट[66] वायुना स्फालित[67] च यत् ।

पर्वतोपरि यद्वारि सम पौरंदरेण तत्' ॥ ६७ ॥

[माधवद्रव्यगुण. तोयवर्ग १५ १८-२३]

The water at the top of a mountain which is exposed to the rays of the sun and the moon, and strong currents of wind is like ambrosia (lit. suitable for Indra).

कीटमूत्रपुरीषाण्डशावकादिप्रदूषितम् ।

तृणपर्णोत्करैर्युक्तं कलुषं विषदूषितम् ॥ ६८ ॥

योऽवगाहेत वर्षासु पिवेद्वापि नव जलम् ।

वाह्याभ्यन्तरतोरोगान् लभतेऽसौ न संशयः ॥ ६९ ॥

**Polluted water**

The water which is mixed with the urine, stool, egg or embryo of insects, grass, leaves and poisons, and which is freshly collected on the ground should not be used either for a bath or for drinking. By doing so, the person falls a victim to a number of diseases—both external and internal. There is no doubt about it.

'मूर्च्छापित्तोष्मदाहेषु[68] विषे रक्ते मदात्यये ।

भ्रमे श्रमे विदग्धेऽन्ने तमके वमयोः तथा ।

ऊर्ध्वगे रक्तपित्ते च शीतमम्भः प्रशम्यते ॥ ७० ॥

### Cold water

Cold water is useful in *mūrchā* (fainting), vitiation of *pitta*, *usmā* (excessive hot feeling), *dāha* (burning syndrome), *viṣa* (poisoning), vitiation of blood, *madātyaya* (alcoholism), *bhrama* (giddiness), *śrama* (physical fatigue), after digestion of food, in *tamaka* (asthma), *vami* (vomiting) and in *urdhvaga rakta pitta* (bleeding through various orifices in the head).

**अथ तन्निषेधः**

पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे[69] ।

आध्माने स्तिमिते कोष्ठे सद्यःशुद्धौ नवज्वरे ॥ ७१ ॥

अरुचिग्रहणीगुल्मश्वासकासेषु[70] विद्रधौ ।

हिक्कायां[71] स्नेहपीते च शीताम्बु परिवर्जयेत् ॥ ७२ ॥

**Prohibition**

Cold water should not be used in *pārśva śūla* (pain in the sides of the chest), *pratiśyāya* (cold), diseases of *vāyu*, *gala graha* (obstruction in the throat), *ādhmāna* (flatulence), *stimita koṣṭha* (absence of peristaltic movement in the intestine), *sadya śuddhi* (immediately after the purification therapy), *nava jvara* (beginning stage of fever), *aruci* (anorexia), *grahaṇī* (sprue syndrome), *gulma* (phantom tumour), *śvāsa* (asthma), *kāsa* (bronchitis), *vidradhi* (abscess), *hikkā* (hiccup) and *snehapāna* (immediately after oleation therapy).

आरोचके प्रतिश्याये प्रसेके[72] श्वयथौ क्षये ।

मंदाग्नावुदरे[73] कुष्ठे ज्वरे नेत्रामये तथा ॥ ७३ ॥

व्रणे च मधुमेहे च पानीयं[74] मन्दमाचरेत् ।

In *arocaka* (anorexia), *pratiśyāya* (cold), *praseka* (saliva-

tion), *śvayathu* (oedema), *kṣaya* (consumption), *agnimāndya* (indigestion), *udara* (obstinate abdominal diseases including ascitis), *kuṣṭha* (obstinate skin diseases including leprosy), *jvara* (fever), *netrāmaya* (eye disease), *vraṇa* (ulcer) and *madhumeha* (diabetes mellitus) one should take less quantity of water.

जीवनं जीविनां जीवो जगत्सर्वं तु तन्मयम् ।
अतोऽत्यन्तं[75] नृपायां[76] झैनं क्वचिद्वारि वार्यते' ॥ ७४ ॥

[भावप्रकाश: वारिवर्ग १३ : ७०-७४]

'तृषितो मोहमायाति मोहात्प्राणान्विमुञ्चति[77] [78] ।
अतः सर्वास्ववस्थासु न क्वचिद्वारि वार्यते ॥ ७५ ॥'

[भावप्रकाश: वारिवर्ग १३ : ७६]

Water is the life of all living creatures and the entire world is pervaded by water. Therefore, when a person is extremely thirsty then giving water is not prohibited. If water is not given, then the thirsty person becomes unconscious and succumbs to death. Therefore in all circumstances water is never prohibited.

'यत्क्वाथ्यमानं[79] निर्वेगं निःफेनं निर्मलं भवेत्[80] ।'

[माधवद्रव्यगुण: तोयवर्ग १५ : ४१]

तत्तोयं दोषहृत्सर्वं दीपनं पाचनं लघु ।

**Boiled water**

The water which is boiled and when the boiling is over and the foam subsides, it is cleaned, then it alleviates all the *doṣas*. It is digestive stimulant, carminative and light.

तत्पादहीनं वातघ्नमर्द्धहीनं[81] तु पित्तनुत् ॥ ७६ ॥

[माधवद्रव्यगुण: तोयवर्ग १५ : ४२]

त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ।

When it is reduced to three-fourth after boiling, it alleviates *vāyu*. When it is reduced to half by boiling, it alleviates *pitta*. When it is reduced to one-fourth after boiling, it alleviates *kapha* and it becomes constipative, digestive stimulant and light.

‘अर्द्धविशिष्टं[82] यत्तोयं तदुष्णोदकमुच्यते ॥’ ७७ ॥
[माधवद्रव्यगुण: तोयवर्ग १५ : ४१]

उष्णोदकं सदा पथ्यं श्वासकासज्वरार्तिजित् ।
कफवातामदोषघ्नं पित्तघ्नं बस्तिशोधनम् ॥ ७८ ॥
‘भिनत्ति श्लेष्मसंघातं मारुतं चापकर्षति’[83] ।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि’ ॥ ७९ ॥

**Hot water**

The water which is reduced to half after boiling and which is hot is called *uṣṇodaka*. This hot water is always wholesome and it cures *śvāsa* (asthma), *kāsa* (bronchitis), *jvara* (fever), aggravation of *kapha* and *vāyu*, *āma* and aggravation of *pitta*. It cleanses the urinary bladder and gets detached the adhered *kapha*. It helps in the elimination of *vāyu*. When hot water is taken at night, it removes indigestion.

पादशेषं तु तत्तोयं **आरोग्याम्बु** तदुच्यते ।
आरोग्यम्बु सदा पथ्यं श्वासकासकफापहम् ॥ ८० ॥
सद्यो ज्वरहरं भेदी दीपनं पाचनं लघु ।
आनाह[84]पांडुशूलार्शो—गुल्मशोथोदरापहम् ॥ ८१ ॥

*Ārogyāmbu*

When the water is boiled and reduced to one-fourth, it is called *ārogyāmbu* (healthy water). It is always wholesome. It cures *śvāsa* (asthma), *kāsa* (bronchitis) and aggravation of *kapha*. It instantaneously reduces fever. It is purgative, digestive

stimulant, carminative and light. It cures *ānāha* (flatulence), *pāṇḍu* (anemia), *śūla* (colic pain), *arśas* (piles), *gulma* (phantom tumour), *śotha* (oedema) and *udara* (obstinate abdominal diseases including ascitis).

उष्णं तदग्निजननं लघ्वलं[85] बस्तिशोधनम् ।
पार्श्वरुक् पीतं साध्मानं हिक्कानिलकफापहम् ॥८२॥
शस्तं तृष्णामशूलेषु तदशुद्धौ नवज्वरे ।

When the *ārogyāmbu* is hot, it stimulates digestive power. It is extremely light. It cleanses the urinary bladder. It cures *parśvaruk* (pain in the sides of the chest), *adhmāna* (flatulence), *hikkā* (hiccup) and aggravation of *vāyu* and *kapha*. It is useful in *tṛṣā* (morbid thirst), *āma*, *śūla* (colic pain), *aśuddhi* (when the purificatory therapy has not acted properly) and *nava jvara* (beginning stage of fever).

दाहातीसारपित्तासृक्—मूर्च्छामद्यविषार्तिषु ॥ ८३ ॥
कफजे वातजे रोगे तृष्णाछर्दिभ्रमादिषु ।
'मद्यपानसमुद्भूते रोगे पित्तोच्छ्रिते[86] तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते[87] ॥' ८४ ॥

[माधवद्रव्यगुण: तोयवर्ग १५ : ३३-३४]

When the *ārogyāmbu* becomes cold, it is called *śṛta śīta*. This cold water is useful in *dāha* (burning syndrome), *atisāra* (diarrhoea), vitiation of *pitta* and blood, *mūrcchā* (fainting), *madya* (alcoholism), *visa* (poisoning), diseases caused by *kapha* and *vāyu*, *tṛṣṇā* (morbid thirst), *chardi* (vomiting), *bhrama* (giddiness), diseases caused by excessive intake of alcohol, excessive vitiation of *pitta* and *sannipāta* (when all the three *doṣas* are vitiated simultaneously).

शृताम्बु तत् त्रिदोषघ्नं यदन्तर्बाष्पशीतलम्[88] ।
अरूक्षमनभिष्यन्दि कृमितृड्ज्वरहृल्लघु ।

The boiled water which is cooled along with its steam alleviates all the three *doṣas*. It is not un-unctuous and it does not obstruct the channels of circulation. It cures *kṛmi* (parasitic infection), *tṛṭ* (morbid thirst) and *jvara* (fever). It is light.

'धारााशीतेन विष्टम्भी दुर्जरं पवनाहृतम् ॥' ८५ ॥

[माधवद्रव्यगुण· तोयवर्ग १५ : ४३]

When the boiled water is cooled by pouring over another container, it becomes constipative and difficult of digestion because during this process the water comes in contact with a lot of air.

'दिवाश्शृतं तु यत्तोयं रात्रौ तद् गुरुतां व्रजेत् ।
89
रात्रौ शृतं दिवा तद्वद्गुरुत्वमधिगच्छति ॥' ८६ ॥

[माधवद्रव्यगुण: तोयवर्ग १५ : ४४]

If the water is boiled during the day time and kept over-night, it becomes heavy. Similarly, if water is boiled at night and kept till the day time, then it becomes heavy.

पानीयं न तु पानीय पानीयेऽन्यप्रदेशजे ।

अजीर्णे क्वथितं चामे पक्वे जीर्णे च नेतरत् ॥ ८७ ॥

Water of another place should not be taken when there is indigestion and formation of *āma*. It should be taken only when it is properly boiled and not otherwise.

'स्निग्ध स्वादु हिम हृद्यं दीपनं वस्तिशोधनम् ।
90
रक्तपित्तपिपासाघ्न **नालिकेरोदकं** गरु ।

**Coconut water**

The water of tender coconuts is unctuous, delicious, cooling, cardiac tonic and digestive stimulant. It cleanses the urinary bladder and cures *raktapitta* (a disease characterised by bleeding from different parts of the body) and *pipāsā*

(morbid thirst). It is heavy.

तदेव जीर्णं विष्टम्भि गुरु पित्तकरं स्मृतम् ॥' ८८ ॥

[माधवद्रव्यगुणः तोयवर्ग १५ : ४९-५०]

The water of the matured coconut causes wind formation in stomach. It is heavy and it aggravates *pitta*.

भक्तादौ सलिलं पीतं कासमन्दाग्निदोषकृत् ।

मध्ये तु दीपनं श्रेष्ठमन्ते स्थौल्यकरं परम् ॥ ८९ ॥

**Time of taking water**

Water taken before eating food causes *kāsa* (bronchitis) and *agnimāndya* (suppression of the power of digestion). When it is taken during the process of eating, it stimulates the power of digestion. If, however, it is taken after the completion of the process of eating, then it causes *sthaulya* (adiposity).

अजीर्णे भेषजं वारि जीर्णेऽन्ने च बलप्रदम् ।

अमृतं भोजनार्द्धे तु भोजनोपरि तद्विषम् ॥ ९० ॥

If there is indigestion water works as a medicine. When there is proper digestion, intake of water promotes strength. When taken in the middle of a meal it works like ambrosia and when taken after a meal, water works like a poison.

"अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः ।

91

तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥९१॥"

[माधवद्रव्यगुणः तोयवर्ग १५ : ५३]

If water is taken in excess or if water is not taken at all, then it hampers the process of digestion. Therefore with a view to promoting the power of digestion, a person should take small quantities of water very frequently.

यत्तु व्यापन्नं [तत्] न ग्राह्यम् ॥ ९२ ॥

**Water pollution**

Polluted water should not be used.

तस्य लक्षणानि—

92
'यत्पंकशैवालतृणपद्मपत्रप्रभृतिभिरवच्छन्नं रविशशि-

किरणानिलैर्नाभिजुष्टं गन्धवर्णरसोपसृष्टं तद् व्यापन्नम्' ॥६३॥

[सुश्रुत:सूत्र ४५ : ११]

The signs and symptoms of polluted water are as below :

The water which is mixed with mud, moss, grass, lotus leaf etc., which is not exposed to the rays of the sun and the moon and wind and which has manifested smell, colour and taste, is called polluted.

अनार्त्तवं वार्षिकमपि प्रथमं तच्च भूमिगम् ।

व्यापन्नमिति जानीयात्सर्वदोषप्रकोपणम् ॥ ६४ ॥

The water collected of unseasonal rain or the water collected from the ground immediately after rain is also polluted. It aggravates all the *doṣas*.

93
'तस्य स्पर्शरूपरसगन्धवीर्यविपाकदोषा. संभवन्ति ।

94
तत्र खरता पैच्छिल्यमौष्ण्य दन्तग्राहिता च स्पर्शदोषा: ।

पंकसिकताशैवालबहुवर्णता रूपदोषा: ।

Polluted water has defects of touch, colour, taste, smell, *vīrya* (potency) and *vipāka* (taste after digestion).

Roughness, sliminess, heat and sticking to teeth—these are the defects in touch. The appearance of mud, sand and moss, and variegated colour are the defects in colour.

व्यक्तरसता रसदोष: । अनिष्टगन्धता गन्धदोष: । यदुप-

95
युक्तं चिराद्विपच्यते तृष्णागौरवशूलकफप्रसेकानापाद-

यति सवीर्यदोष:। यदुपयुक्तं चिराद्विपच्यते विष्टंभयति

वाशनं [स विपाकदोष इति] । यस्तु व्यापन्नं पिबति

स नानाविकारानाप्नोति ॥ ९५ ॥

Manifestation of taste is the defect in taste.

The presence of a foul smell is the defect in smell.

When water is taken, if it gets digested after a long time and if it produces thirst, heaviness, colic pain and slivation, then these are the defects in potency.

If water gets digested very late and causes fermentation of the food, then it should be determined that the water has the defect of *vipāka.*

A person who takes defective water succumbs to many diseases.

सप्त कलुषस्य प्रसादनानि भवन्ति—कतकगोमेदविसग्र-

न्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति ॥

शीतलीकरणानि प्रवातस्थापनमुदकप्रक्षेपणं यष्टिका-

भ्रामणम् वीजनं वस्त्रोद्धरण च वालुकाप्रक्षेपणम्

96

शिक्यावलम्बनं चेति ॥ ९६ ॥

[सुश्रुत: सूत्र ४५ : ११, १७, १९]

Water pollution can be corrected by seven items, viz., (1) *kataka,* (2) *gomeda,* (3) *visa granthi,* (4) *śaivāla mūla,* (5) *vastra* (cloth), (6) *muktā* (pearl) and (7) *maṇi* (jewel).

For cooling the water, the container should be kept in an airy place, water should be cooled over the container, the water should be stirred with the help of a stick, it should be fanned, the container should be covered with a piece of cloth, sand should be poured over water and the container should be kept hanging on a *śikya.*

पादावशेषं सलिलं ग्रीष्मे शरदि शस्यते ।
हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः ॥ ९७ ॥

**Boiling in different seasons**

During summer and autumn seasons, water which is boiled and reduced to one-fourth is useful. During the remaining seasons, viz., *hemanta* (early winter), *śiśira* (later part of winter), rainy season and spring season, water boiled and reduced to half is useful.

**कश्चित्तु :**

वसुगन्धेषु वाणेषु वेदेषु त्रिषु पक्षयोः ।
एकभागावशेषं स्यादम्बु वर्षादिषु क्रमात् ॥ ९८ ॥

**Another view**

During the rainy season, autumn, *hemanta* (early winter), *śiśira* (later part of winter), spring and summer, water to be used should be boiled and reduced to 6/8 (*vasu*), 5/8 (*vāṇa*), 4/8 (*veda*), 3/8 (*tri*), 2/8 (*pakṣa*) and 1/8 (*ekabhāga*) respectively.

अत्र यथा दोषाणां हीनता प्रौढता तथा व्यवस्था कल्पनीया ॥ ९९ ॥

In this context, however; the exact nature of processing should be determined on the basis of the diminution and aggravation of the *doṣas*.

**अथ निर्दोषीकरणानि :**

व्यापन्नमपि पानीयं क्वथितं सूर्यतापितम् ।
सुवर्ण रजत लोह पाषाणं सिकता मृदम् ॥ १०० ॥
भृशं संताप्य निर्वाप्य सप्तधा साधितं तथा ।
कर्पूरजातीपुन्नागपाटलादिषु वासितम्[97] ॥ १०१ ॥
सुचि सान्द्रपटे[98] स्राव्यं[99] क्षुद्रजन्तुभिरक्षितम् ।
स्वच्छं कतकमुक्ताद्यैः शुद्धं दोषापहं भवेत् ॥ १०२ ॥

**Removal of pollution**

For the removal of pollution, the boiled water should be exposed to the sun's rays and in this water hot pieces of gold, silver, iron, stone, sand or clod of earth should be immersed seven times. To this water fragrant things like *karpūra, jātī, punnāga, pāṭalā* etc. should be added. This should then be filtered with the help of a clean and compact piece of cloth. It should be protected from small insects. In the vessel containing this clean water, *kataka,* pearl etc. should be added. This process corrects pollution.

आमं जलं जीर्यति याममात्रं तदर्द्धमात्रं शृतशीतलं च ।

तदर्धमात्रं तु शृतं कदुष्णं पयः प्रपाके त्रय एव कालाः ॥१०३॥

**Time taken for digestion**

Unboiled water gets digested in one *yāma* (three hours). The water which is boiled and cooled takes one and a half hours for digestion. The water which is boiled and warm gets digested in forty five minutes. These are the three different times for digestion of water.

॥ इति वारिवर्गः ॥

Thus end the groups dealing with different types of water.

## NOTES AND REFERENCES

1. द्रष्टव्यम् भावप्रकाशः वारिवर्ग 13 : 2 ।
2. चतुर्धा इति द्वितीयपुस्तके पाठः ।
3. यावत्पति इति द्वितीयपुस्तके पाठः ।
4. नो इति द्वितीय पुस्तके पाठः ।
5. आकाशगङ्गासम्बन्धि इति आकरे पाठः ।

6. प्रायो वर्षति वारिदः इति आकरे पाठः ।
7. सर्वथा इति आकरे पाठ. ।
8. तथैव इति आकरे पाठः ।
9. स्थापिते इति आकरे पाठः ।
10. द्रष्टव्यम् भावप्रकाशः वारिवर्ग 13 : 14 ।
11. दिव्यमण्याश्विनं विना इति आकरे पाठः ।
12. दिव्यवाय्वग्निसंयोगात्संहताः इति आकरे पाठः ।
13. पाषाणखण्डवच्चापस्ताः इति आकरे पाठः ।
14. करकाजं इति आकरे पाठः ।
15. दारुणं इति आकरे पाठः ।
16. अपि नद्याः इति आकरे पाठः ।
17. वह्निरापस्तदुद्भवाः इति आकरे पाठः ।
18. रापश्चतद्भवाः इति द्वितीय पुस्तके पाठः ।
19. ताः इति आकरे पाठः ।
20 स्मृताः इति आकरे पाठः ।
21. तुषाराम्बु हिमं रूक्षं स्यादुवातलपित्तलम् इति आकरे पाठः ।
22. कफोरुस्तम्भकण्ठाग्निमेहगण्डादिरोगनुत् इति आकरे पाठः ।
23. हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् इति आकरे पाठः ।
24. और्वानिलधूमेरितमम्बु इति आकरे पाठः ।
25. कथ्यते सद्भिः इति आकरे पाठः ।
26. द्रष्टव्यम् भावप्रकाशः वारिवर्ग 13 : 24 ।
27. द्वैविध्यमायातम् इति द्वितीयपुस्तके पाठः ।
28. दोषगुणान्वितम् इति आकरे पाठः ।
29. घनं इति आकरे पाठः ।
30. वह्निहृत्कफकृद्हृद्य इति आकरे पाठः ।
31. रोचनं तृष्णादाहदोषत्रयप्रणुत् इति आकरे आकरे पाठः ।
32. कफपित्तनुत् इति आकरे पाठः ।
33. वदन्तीति महर्षयः इति आकरे पाठः ।
34. झरः इति आकरे पाठः ।

35. स तु प्रस्रवणश्चापि तत्रत्यं नैर्झरं जलम् इति आकरे पाठः ।
36. स्यादपित्तलम् इति आकरे पाठः ।
च न पित्तकृत् इति षष्ठपुस्तके पाठः ।
37. बद्धमूत्रबलं इति षष्ठपुस्तके पाठः ।
38. स्याद्यचन्द्रर्क्षगेरवौ इति द्वितीयपुस्तके पाठः ।
39. स्वादुपाकि इति षष्ठपुस्तके पाठः ।
40. कफकरं इति षष्ठपुस्तके पाठः ।
41. द्रष्टव्यम् भावप्रकाश वारिवर्ग १३ : ४६-४८ ।
42. केदारः इति आकरे पाठः ।
43. स्मृतम् इति आकरे पाठः ।
44. भूमिस्थमहितं इति आकरे पाठः ।
44. तोयं इति आकरे पाठः ।
46. वाहित स्मृतम् इति आकरे पाठः ।
47. हेमन्ते विहितं तोयं शिशिरेऽपि प्रशस्यते इति आकरे पाठः ।
48. कौप इति आकरे पाठः ।
49. विषवद्धनवृक्षाणां पत्राद्यैर्दूषित यतः इति आकरे पाठः ।
50. औद्भिदं वाऽऽन्तरीक्षं वा कौपं वा प्रावृषि स्मृतम् इति आकरे पाठः ।
51. रविकरैर्जुष्टं इति आकरे पाठः ।
52. स्वच्छमुदयादगस्त्यस्याखिलं इति आकरे पाठः ।
53. फाल्गुणे इति द्वितीयपुस्तके पाठः ।
54. चौञ्ज्यं इति आकरे पाठः ।
55. तथोद्भिदम् इति आकरे पाठः ।
56. चौञ्ज्यमेव इति आकरे पाठः ।
57. जलमात्रं इति आकरे पाठः ।
58. शीतत्वं इति आकरे पाठः ।
59. मतोगुणः इति आकरे पाठः ।
60. अत्यम्बुपानान्नविपच्यतेऽन्नं निरम्बुपानाच्च इति आकरे पाठः ।
61. वह्निविवर्धनाय इति द्वितीयपुस्तके पाठः ।
62. पाषाणविच्छिन्ना क्षुभिताभिहतोदकाः इति आकरे पाठः ।

63. मलयप्रभवाः याश्च इति आकरे पाठः ।
64. मृदुर्वहा इति षष्ठपुस्तके पाठः ।
65. पारियात्रभवा इति आकरे च षष्ठपुस्तकयोः पाठः ।
66. चन्द्रार्ककरसंस्पृष्टं इति आकरे पाठः ।
67. मुहुः इति आकरे पाठः ।
68. मूर्च्छापित्तोष्णदाहेषु इति आकरे पाठः ।
69. लघु ग्रहे इति आदर्शपुस्तिकासु पाठः ।
70. अरुचिग्रहणीगुल्मश्वासकासे च इति षष्ठपुस्तके पाठः ।
71. स्नेहपाने च इति आकरे पाठः ।
72. मन्देऽग्नौ जठरे इति आकरे पाठः ।
73. मुखप्रसेके जठरे कुष्ठे नेत्रामये ज्वरे इति आकरे पाठः ।
74. पिवेत्पानीयमल्पकम् इति आकरे पाठ. ।
75. नातोऽत्यन्तनिषेधे न कदाचिद्वारि वार्य्यते इति आकरे पाठः ।
76. मुधासु इति आदर्श पुस्तकेसु पाठः । नथा इति द्वितीयपुस्तके पाठः ।
77. तृपितो........वार्यते पाठोऽयं षष्ठपुस्तके नोपलभ्यते ।
78. वार्य्येत् इति आकरे पाठः ।
79. तत्क्वाथ्यमानं इति आदर्शपुस्तिकासु पाठः ।
80. च यत् इति आकरे पाठः ।
81. वातघ्नमर्धहीनं इति द्वितीयपुस्तके पाठः ।
वातघ्नमर्धहीन च पित्तजित इति आकरे पाठः ।
82. भवति इति आकरे पाठः ।
83. द्रष्टव्यम् माधवद्रव्यगुणः तोयवर्ग १५ : ३२-३३ ।
84. आनाहपाण्डुशोफार्शो इति षष्ठपुस्तके पाठः ।
85. लघवं इति षष्ठपुस्तके पाठः ।
86. पित्तोत्थिते इति षष्ठपुस्तके पाठः ।
87. हितं पयः इति आकरे पाठः ।
88. शृतशीतं त्रिदोषघ्न बाष्पान्तर्भाविशीतलम् इति आकरे पाठ. ।
89. तु दिवसे गुरुत्वमधिगच्छति इति आकरे पाठः ।
90. वृत्तं पित्तपिपासघ्नं इति द्वितीयपुस्तके पाठः ।
वृष्यं पित्तपिपासघ्नं इति आकरे पाठः ।

91. द्रष्टव्यम्—श्लोक-६२ ।
92. हठ इति आकरे अधिकं पाठः ।
93. षट् इति आकरे अधिकं पाठः ।
94. स्पर्शदोषः इति आकरे पाठः ।
95. पाठोऽयं सुश्रुते नोपलभ्यते ।
96. वसुप्यङ्गेषु इति द्वितीयपुस्तके पाठः ।
97. क्षुद्रजन्तुविवर्जितं इति षष्ठपुस्तके पाठः ।
98. कनकमुद्गाद्यैः इति षष्ठपुस्तके पाठः ।
99. दोषापगं इति द्वितीयपुस्तके पाठः ।

# CHAPTER 15

रक्तशालिस्त्रिदोषघ्नश्चक्षुष्यः शुक्रमूत्रलः ।
तृष्णौजोबलकृत्स्वर्यो हृद्यस्तदनु चापरम् ॥ १ ॥

*Rakta śāli* **(Oriza sativa Linn.)**

The red variety of *śāli* rice alleviates all the three *doṣas.* It promotes eyesight and semen. It is diuretic. It causes thirst and promotes *ojas*, strength and voice. It is a cardiac tonic.

शीतो लघुस्त्रिदोषघ्नो मधुरो गौरषष्टिकः ।

*Gaura ṣaṣṭika* **(a variety of Oriza sativa Linn.)**

The white variety of *ṣaṣṭika* rice is cooling and light. It alleviates all the three *doṣas* and it is sweet.

1
किञ्चिद्धीनो गुरुस्तस्मादपरो रसपाकतः ॥ २ ॥

There is another variety of it which is slightly inferior in taste and *vipāka* and which is heavier than the former.

2
महाशालिः परं वृष्यः कलमः श्लेष्मपित्तहा ।

### *Mahā śāli* and *Kalama*

*Mahā śāli* type of rice is exceedingly aphrodisiac. *Kalama* variety of rice alleviates *kapha* and *pitta*.

मधुरश्चाम्लपाकश्च व्रीहिः पित्तकरो गुरुः ॥ ३ ॥

### *Vrīhi* (a variety of Oryza sativa Linn.)

The *vrīhi* type of rice is sweet. It produces acidity during digestion. It aggravates *pitta* and is heavy.

अत्युष्णो बह्वभिष्यन्दि पाटलस्तु त्रिदोषकृत् ।

### *Pāṭala*

The *pāṭala* type of rice is very hot and is exceedingly *abhiṣyandi* (which obstructs the channels of circulation). It aggravates all the three *doṣas*.

वापितं गुरु तद्धान्यं किञ्चिद्धीनमवापितम् ।

रोपितं तु नवं वृष्यं पुराणं च लघु स्मृतम् ॥ ४ ॥

**Sowing and transplantation**

The rice which is cultivated by sowing is heavy; otherwise it is slightly inferior in quality. The rice which is cultivated by transplantation is aphrodisiac when freshly harvested. When preserved for a long time, it becomes light.

[3] दग्धीयामवनौ जाताः शालयो लघुपाकिनः ।

कषाया बद्धविण्मूत्राः[4] रूक्षाः[5] श्लेष्मापकर्षणाः ॥ ५ ॥

**Cultivation**

The *śāli* rice which is cultivated in a forest land after setting fire to the vegetation is light for digestion. It is astringent. It causes retention of stool and urine. It is un-unctuous and alleviator of *kapha*.

स्थलजाः कफपित्तघ्नाः कषायाः कटुकान्विताः[6] ।

किञ्चित्सतिक्तमधुरा पवनानलवर्द्धनाः[7] ॥ ६ ॥

The *śāli* rice which is cultivated on plain ground alleviates *kapha* and *pitta*. It is astringent, pungent, slightly bitter and sweet. It aggravates *vāyu* and stimulates the power of digestion.

केदारा मधुरा[8] वृष्या बल्याः पित्तनिबर्हणाः ।
ईषत्कषायाल्पमला गुरवः कफशुक्रलाः ॥ ७ ॥

The rice which is cultivated in the rice field is sweet, aphrodisiac, strength promoting and alleviator of *pitta*. It is slightly astringent and it produces less excreta. It is heavy. It produces more of *kapha* and semen.

रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः ।
[9] अदाहिनो दोषहरा बल्या मूत्रविवर्धनाः ॥ ८ ॥

The rice which is cultivated by repeated transplantation is light. It gets digested easily and is superior in quality. It does not cause burning sensation. It alleviates *doṣas*. It promotes strength. It is diuretic.

शालयः छिन्नरूढा ये रूक्षास्ते बद्धवर्चसः ।
तिक्ताः कषायाः पित्तघ्नाः लघुपाकाः कफापहाः ॥९॥

[माधवद्रव्यगुणः शालिवर्ग १६ : १ ९]

The rice which is grown after cutting the plant, is unctuous. It causes retention of stool. It is bitter and astringent. It alleviates *pitta*. It is light for digestion. It also alleviates *kapha*.

॥ इति शालयः ॥

Thus ends the group dealing with various types of rice.

## NOTES AND REFERENCES

1. रसस्तस्मादपरो इति षष्ठपुस्तके पाठः ।
2. कमलः इति द्वितीयपुस्तके पाठः ।
3. दग्धायामवनौ इति आकरे द्वितीयपुस्तके च पाठः ।
4. बद्धविण्मूत्रा इति आकरे पाठः ।
5. रूक्षाः इति आकरे पाठः ।
6. कटुकाश्रयाः इति आकरे पाठः ।
7. पवनानलवर्धना इति द्वितीयपुस्तके पाठः ।
8. ईषत्कषायाल्पवला इति षष्ठपुस्तके पाठः ।
9. विदाहिनो इति आकरे पाठः ।

# CHAPTER 16

श्यामाकः शोषणो रूक्षो वातलः श्लेष्मपित्तहा ।

*Śyāmāka* **(Echinochloa frumentacea Linn.)**

*Śyāmāka* is *śoṣaṇa* (drying) and un-unctuous. It aggravates *vāta* and alleviates *kapha* and *pitta*.

[1] तद्वत् प्रियंगुनीवारकोरदूषाः प्रकीर्तिता ॥ १ ॥

*Priyaṅgu* **(Setaria italica Beauv.)**, *Nīvāra* **(a type of paddy) &** *Koradūṣā* **(Paspalum scorbiculatum Linn.)**

*Priyaṅgu*, *nīvāra* and *koradūṣa* share the properties of *śyāmāka*.

रूक्षः शीतो गुरुः स्वादुः सरो विड्वातकृद्यवः ।

वृष्यः स्थैर्यकरो मूत्रमेदःपित्तकफान् जयेत् ॥ २ ॥

पीनसश्वासकासोरुस्तम्भ[2]कंठासृगामयान् ।

*Yava* **(Hordeum vulgare Linn.)**

*Yava* is un-unctuous, cooling, heavy, sweet, laxative, producer of more of stool and flatus and aphrodisiac. It

produces *sthairya* (steadiness) and reduces urine, fat, *pitta* and *kapha*. It cures *pīnasa* (chronic rhinitis), *śvāsa* (asthma), *kāsa* (bronchitis), *urustambha* (which produces immobility of thigh) and diseases of the throat and blood.

न्यूनो यवादनुयवो[3] रूक्षोष्णो वंशजो[4] यवः ॥ ३ ॥

*Anuyava & Vaṁśaja yava*

The *anuyava* is slightly inferior in quality in comparison to *yava*. The *yava* (fruit) of *vaṁśa* (bamboo) is un-unctuous and hot.

[5]वृष्यशीतो गुरुः स्निग्धो जीवनो वातपित्तहा ।
[6]संधानकारी मधुरो गोधूमः स्थैर्यकृत्सरः ॥' ४ ॥

[माधवद्रव्यगुणः कुधान्यवर्ग १७ : २-५]

*Godhūma* **(Triticum aestivum Linn.)**

*Godhūma* (wheat) is aphrodisiac, cooling, heavy, unctuous and life giver. It alleviates *vāta* and *pitta*, and helps in the union of broken tissues. It is sweet. It produces steadiness. It is also a laxative.

गोधूम उक्तो मधुरो गुरुश्च बल्यः स्थिरः शुक्ररुचिप्रदश्च ।
स्निग्धो [शीतश्चा] निलपित्तहारी सवातकृत् [?] श्लेष्मकर. सरश्च ॥५॥

**Another view**

*Godhūma* is sweet, heavy, promoter of strength, steadiness and semen, appetiser, unctuous and cold. It alleviates *vāyu* and *pitta* and produces flatus (*vāta* ? ) and *kapha*. It is laxative.

'ईषत्कषायो मधुरः सतिक्तः सग्राहकः पित्तकरस्तथोष्णः ।
[7]तिलो विपाके मधुरो बलिष्ठ स्निग्धो व्रणालेपन[8] पथ्य उक्तः ॥ ६ ॥
[9]दन्त्योऽग्निमेधाजननोऽल्पमूत्रस्त्वच्योऽथ केश्योऽनिलहा गुरुश्च ।

### *Tila* (Sesamum indicum Linn.)

*Tila* is slightly astringent, sweet, bitter, constipative, aggravator of *pitta*, hot, sweet in *vipāka*, promoter of strength and unctuous. It is useful for application over ulcers and for teeth. It is a promoter of digestive power and intellect. It reduces the quantity of urine. It is useful for the skin and the hair. It alleviates *vāyu* and is heavy.

[10]

तिलेषु सर्वेष्वसितः प्रधानो मध्यः सितो हीनतरास्तथान्ये ॥ ७ ॥

[माधवद्रव्यगुणः कुधान्यवर्ग १७ : ५-७], [सुश्रुतः सूत्र ४६ : ३९-४०]

Among the different types of *tila*, the black variety is the best, the white variety is middling and other varieties are inferior in quality.

कृष्णमुद्गा महामुद्गा गौरा हरितपीतकाः ।

श्वेता रक्ताश्च निर्दिष्टा लघवः पूर्वपूर्वतः ॥ ८ ॥

### *Mudga* (Phaseolus radiatus Linn.)

**Variety**

*Kṛṣṇa mudga*, *mahā mudga*, white, green, yellow, white and red—these are the different varieties of *mudga*. The former ones are lighter than the latter ones.

[11]

सुश्रुतेन पुनः प्रोक्ता प्रधाना हरिता गुणैः ।

According to *Suśruta*, the green variety is the best among the *mudgas*.

कफपित्तास्रजिन्मुद्गः कषायो मधुरो लघुः ।

ग्राही शीतः कटुः पाके चक्षुष्यो नातिवातलः ॥ ९ ॥

**Property**

*Mudga* alleviates *kapha*, *pitta* and blood. It is astringent, sweet, light, constipative, cooling and pungent in *vipāka*. It promotes eye sight and does not aggravate *vāyu* in excess.

[12] प्रधानात्वग्निस्तद्वन्मुद्गाः समाः स्मृताः ।

*Vanya mudga*

Different varieties of *vanya* (wild variety) *mudga* share all the properties of cultivated varieties of *mudga.*

मसूरो [13] मधुरो [14] रुच्यः संग्राही कफपित्तहा ॥ १० ॥

*Masūra* **(Lens culinaris Medic.)**

*Masūra* is sweet, appetiser and constipative. It alleviates *kapha* and *pitta.*

[15] रक्तपित्तज्वरोन्माथि शीतो ग्राही **मकुष्ठकः** ।

*Makuṣṭha* **(Phaseolus aconitifolius Jacq.)**

*Makuṣṭhaka* alleviates *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *jvara* (fever). It is constipative.

कफासृक्पित्तपुंस्त्वघ्नाश्चणका वातला हिमाः ॥११॥

[मानवद्रव्यगुणः शिम्बिधान्यवर्ग १६-१-५]

*Caṇaka* **(Cicer arietinum Linn )**

*Caṇaka* alleviates *kapha,* blood and *pitta.* It causes impotency and aggravates *vāyu.* It is cooling.

**हरेणवः** **सतीनाश्च** विज्ञेया बद्धवर्चसः ।

[सुश्रुतः सूत्र ४६ : ३३]

*Hareṇu* & *Satīna*

**(Pisum arvens Linn. & Pisum sativum Linn.)**

*Hareṇu* and *satīna* cause constipation.

**आढक्य** [16] कफपित्तघ्न्यः [17] कषायाश्चातिवातलाः ॥ १२ ॥

ता एव घृतसंयुक्तास्त्रिदोषशमनाः मता ।

### *Āḍhakī* (Cajanus cajan Millsp.)

*Āḍhakī* alleviates *kapha* and *pitta*. It is astringent. It aggravates *vāyu* in excess. When added with ghee, it alleviates all the three *doṣas*.

उष्णः कुलत्थो रसतः कषायः कटुर्विपाके कफमारुतघ्नः ॥१३॥

### *Kulattha* (Dolichos biflorus Linn.)

*Kulattha* is hot, astringent in taste, pungent in *vipāka* and alleviator of *kapha* as well as *vāyu*.

18
शुक्राश्मरीगुल्मनिषूदनश्च संग्राहकः पीनसकासहन्ता ।
19
आनाहमेदोगुदकीलहिक्काश्वासापहः शोणितपित्तकृच्च ॥१४॥

It cures *śukrāśmarī* (stone in the seminal tract) and *gulma* (phantom tumour). It is constipative. It also cures *pīnasa* (chronic rhinitis), *kāsa* (bronchitis), *ānāha* (flatulence), *medas* (adiposity), *guda kīla* (piles), *hikkā* (hiccup) and *śvāsa* (asthma). It vitiates blood and *pitta*.

20
बलासहन्ता पवनामयघ्नो विशेषतो वन्यकुलत्थकस्तु ।

### *Vanya Kulattha*

The wild variety of *kulattha* specifically alleviates *kapha* and cures diseases caused by *vāyu*.

स्निग्धोष्णो मधुरो वृष्यो मेदोमांसकफप्रदः ।
वातनुद् बृंहणो बल्यो माषो बहुमलो गुरुः ॥१५॥

[माधवद्रव्यगुणः शिम्बिधान्यवर्ग १८ : १-६]

### *Māṣa* (Phaseolus mungo Linn.)

*Māṣa* is unctuous, hot, sweet and aphrodisiac. It produces more of fat, flesh and *kapha*. It alleviates *vāyu*, promotes nourishment and strength and produces more of stool. It is heavy.

21
'माषो गुरुर्भिन्नपुरीषमूत्रः स्निग्धो वृष्यो मधुरोऽनिलघ्नः ।
22
संतर्पणः स्तन्यकरो विशेषाद्बलप्रदः पित्तकफावहश्च ॥ १६ ॥

**Another view**

*Māṣa* is heavy, laxative, diuretic, unctuous, aphrodisiac, sweet, alleviator of *vāyu*, refreshing and promoter of lactation. It has the specific property of promoting strength and aggravating *pitta* as well as *kapha.*

माषैः समानं **फलमात्मगुप्तमुक्तं** च **काकाण्डफलं** तथैव च ।

The fruits of *ātmaguptā* and *kākāṇḍa* have properties similar to those of *māṣa.*

23
**अरण्यमाषा** गुणतः प्रदिष्टा रूक्षाः कषायाश्च विदाहिनश्च' ॥१७॥

[सुश्रुतः सूत्र ४६ : ३४, ३६]

*Araṇya māṣa*

The wild variety of *māṣa* is un-unctuous and astringent. It causes burning sensation.

'**राजमाषः** सरो रुच्यः कफशुक्राम्लपित्तनुत् ।

सुस्वादुर्वातलो रूक्षः कषायो विशदो गुरुः ॥ १८ ॥

*Rāja māṣa* **(Vigna cylindrica Skeels)**

*Rāja māṣa* is laxative and appetiser. It reduces *kapha* and semen, and cures *amla pitta* (hyper acidity in stomach). It is delicious, aggravator of *vāyu,* un-unctuous, astringent, *viśada* (non-slimy) and heavy.

गुरूष्णं स्निग्धमधुरं **काकाण्डं** **चात्मगुप्तजम्** ।

फलं वृष्यं च बल्यं च बृंहणं वातजित्परम् ॥ १९ ॥

*Kākāṇḍa* (?) & *Ātmaguptā* **(Mucuna pruriens DC.)**

The fruits of *kākāṇḍa* and *ātma guptā* are heavy, hot,

unctuous, sweet, aphrodisiac, strength promoting and nourishing. They are excellent alleviators of *vāyu.*

स्निग्धातसी[24] स्वादुतिक्ता[25] कफपित्तकरा गुरुः ।

दृक्शुक्रहृत्कटुः पाके तद्वद्वीजं **कुसुम्भजम्** ॥ २० ॥

*Atasī* & *Kusumbha*

**(Linum usitatissimum Linn. & Carthamus tinctorius Linn.)**

*Atasī* is unctuous, sweet, bitter, aggravator of *kapha* as well as *pitta* and heavy. It reduces eye sight and semen. It is pungent in *vipāka.*

Seed of *kusumbha* shares properties of *atasī.*

वातपित्तकरा रूक्षा **निष्पावाः** श्लेष्मशोषणाः ।

*Niṣpāva* **(Dolichos lablab Linn.)**

Different types of *niṣpāva* are aggravaters of *vāyu* and *pitta* and un-unctuous. They dry up *kapha.*

बलघ्नाः[26] कफनाशिन्यो विरूक्षाः स्वादु शीतलाः ।

विष्टम्भिन्योऽग्निशमना निर्दिष्टा **शिम्बिजातयः** ॥२१॥

[माधवद्रव्यगुणः शिम्बिधान्यवर्ग १८ : १०-१३]

*Śiṁbi* **(a type of Dolichos lablab Linn.)**

Different types of *śimbi* reduce strength and alleviate *kapha.* They are exceedingly un-unctuous, sweet, cooling and constipative. They reduce the power of digestion.

रूक्षः कषायो बलकृद्विदाही बलासदृष्टिक्षयकृत्कषायः[27] ।

कटुर्विपाके मधुरश्च[28] **शिम्बः** प्रभिन्नविण्मारुतपित्तलश्च ॥२२॥

*Śiṁba* **(a type of Dolichos lablab Linn.)**

*Śiṁba* is un-unctuous, astringent and promoter of

strength. It causes burning sensation and reduces *kapha* and eye sight. It is pungent in *vipāka* and sweet. It eliminates stool as well as *vāyu* and aggravates *pitta*.

सितासिताः पीतकरक्तवर्णाः[29] भवन्ति [30]येनैकरसाश्च शिबाः ।
यथोदितास्तद्गुणतः[31] प्रधाना ज्ञेयाः कटूष्णा रसपाकतश्च[32] ॥२३॥'

[सुश्रुतः सूत्रस्थान ४६ : ४४-४६]

It has several varieties viz., white, black, yellow and red. They have different tastes but all of them share the properties described above. They are predominantly pungent in taste as well as *vipāka* and hot.

विदाहवन्त्यश्च भृशं च[33] रूक्षा [34]विष्टम्भ्यवीर्यमनिलप्रदाश्च[35] ।
सुदुर्जराश्चैवरुचिप्रदाश्च सर्वे स्मृता वैदलिकाश्च शिबाः ॥२४॥

[सुश्रुतः सूत्रस्थान ४६ : ४७-४८]

[36]अनलश्लेष्मपित्तघ्नो बद्धविण्मूत्रवातलः ।

*Vaidalikas & Siṁbas*

Pulses having dicotyledons and different type of *simba*—all produce burning sensation. They are exceedingly un-unctuous and constipative. They aggravate *vāyu* and are extremely difficult of digestion and are appetisers.

They reduce the power of digestion, alleviate *kapha* as well as *pitta* and cause retention of stool, urine and flatus.

'कफवातहरस्तीक्ष्णः सिद्धार्थो रक्तपित्तकृत् ॥ २५ ॥
स्निग्धोष्णः कृमिकुष्ठघ्नः कटुको रसपाकतः ।

*Siddhārtha*

*Śiddhārtha* alleviates *kapha* and *vāta*. It is sharp. It causes *raktapitta* (a disease characterised by bleeding from different parts of the body). It is unctuous and hot. It cures *kṛmi*

(parasitic infection) and *kuṣṭha* (obstinate skin diseases including leprosy). It is pungent both in taste and *vipāka*.

तद्गुणा राजिका रुच्या तद्गुणोऽन्योऽपि सर्षपः ॥२६॥

*Rājikā* & *Sarṣapa* **(Brassica campestris Linn.)**

*Rājikā* and *sarṣapa* share the properties of *siddhārtha*. In addition *rājikā* is an appetiser.

37

शूकधान्यं शिम्बिधान्यं परिसंवत्सरोषितम् ।
लघुपथ्यतमं प्रोक्तं गुर्वपथ्यतमं नवम् ।
यद्यदागच्छति क्षिप्रं तत्तल्लघुतरं स्मृतम् ॥ २७ ॥

**Property in preservation**

*Śūka dhānya* and *śimbi dhānya* which are preserved for one year before use, are the lightest and most wholesome. Freshly harvested ones are heavy and extremely unwholesome. The earlier they ripen, the lighter they are.

यवगोधूममाषाश्च तिलश्चापि नवा हिता: ।
38
पुराणा विरसा रूक्षा न तथा बलकारिण: ॥' २८ ॥

[माधवद्रव्यगुण: शिम्बिधान्यवर्ग १८ : १४-१७]

*Yava, godhūma, māṣa* and *tila* are useful when they are freshly harvested. When preserved for a long time, they become tasteless and un-unctuous. They do not promote strength to the same extent as the fresh ones do.

विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणम् ।

[माधवद्रव्यगुण: शिम्बिधान्यवर्ग १८ : १९]

**Other defects**

The germinated corns cause burning sensation. They are heavy and constipative. They cause impairment of eye sight.

अनार्त्तवं व्याधिकरमपर्यागतमेव च ॥ २६ ॥

अभूमिजं नवं वापि न धान्यं गुणवत्स्मृतम् ।

नवं धान्यमभिष्यन्दि लघु संवत्सरोषितम् ॥ ३० ॥

[माधवद्रव्यगुणः शिम्बिधान्यवर्ग १८ : १८-१६]

Unseasonal and immature corns cause many diseases. Those which are not grown on the ground and which are freshly harvested do not possess the prescribed properties. Freshly harvested corns are *abhisyandi* (which obstruct the channels of circulation) and they become light after preservation for one year.

॥ इति धान्यवर्गः ॥

Thus ends the group dealing with different type of corns.

## NOTES AND REFERENCES

1. तद्वच्च कगुनीवारकोरदूषाः इति आकरे पाठः ।
2. पीनसश्वासकासोरुस्तम्भकंठत्वगामयान् इति आकरे पाठः ।
3. यवादपयवो इति आकरे पाठः ।
4. रूक्षोऽम्लो इति आकरे पाठः ।
5. वृष्यः शीतो इति आकरे पाठः ।
6. संधानो बृंहणो बल्यो गोधूमः स्थैर्यकृत्परम् इति आकरे पाठः
7. तिक्तो इति आकरे पाठः ।
8. एव पथ्यः इति आकरे पाठः ।
9. दन्योऽग्निमेधा इति द्वितीयपुस्तके पाठः ।
   बलाऽग्निमेधा० इति आकरे पाठः ।
10. हीनतरास्तथाऽन्ये इति आकरे पाठः ।
11. द्रष्टव्यम्—सुश्रुतः सूत्र ४६ : २६ ।
12. प्रधानाह्नरिता मुद्गा वन्या मुद्गास्तु मुद्गवत् इति आकरे पाठः ।

13. मधुरः इति आकरे पाठः ।
14. शीतः इति आकरे पाठः ।
15. रक्तपित्तज्वरोन्माद शीतो इति आदर्शपुस्तिकासु पाठः ।
16. आढकी कफपित्तघ्नी कलायास्त्वतिवातलाः इति आकरे पाठ. ।
17. कफवातघ्न्यः इति द्वितीयपुस्तके पाठः ।
18. शुक्राश्मरीगुल्मनिसूदनश्च इति आकरे पाठः ।
19. शोणितपित्तकर्त्री इति आकरे पाठः ।
20. कफस्य हन्ता नयनामयघ्नो विशेषतो वन्यकुलत्थ उक्तः इति आकरे पाठः ।
21. स्निग्धोष्णवृष्यो इति आकरे पाठः ।
22, शुक्रकफावहश्च इति आकरे पाठः ।
23. कषाया अविदाहिनश्च इति आकरे पाठः ।
24. स्निग्धोमा इति आकरे पाठः ।
25. स्वादुतिक्तोष्णा इति आकरे पाठः ।
26. वातघ्नाः कफशुक्रघ्नाः इति आकरे पाठः ।
27. रूक्षः कषायो विषशोषशुक्रबलासदृष्टिक्षयकृद्विदाही इति आकरे पाठः ।
28. मधुरस्तु इति आकरे पाठ. ।
29. पीतकरक्तवर्णा इति आकरे पाठः ।
30. येऽनेकविधास्तु इति आकरे पाठः ।
31. यथादितस्ते गुणतः इति आकरे पाठः ।
32. रसपाकयोश्च इति आकरे पाठः ।
33. विरूक्षा इति आकरे पाठः ।
34. विष्टभ्य जीर्यन्त्यनिलप्रदाश्च इति आकरे पाठः ।
35. वैदलिकास्तु इति आकरे पाठः ।
36. जोनलः श्लेष्मपित्तघ्नो इति द्वितीयपुस्तके पाठः ।
37. समातीत प्रशस्यते इति आकरे पाठः ।
38. तथाऽर्थकराः स्मृताः इति आकरे पाठः ।

# CHAPTER 17

सर्ववातहरं मांसं वृष्यं बल्यतमं गुरु ।

तद्रसस्तर्पणो बल्यः स्निग्धः प्राणप्रदो लघुः ।

**Meat**

All types of meat alleviate *vāyu.* They are aphrodisiac, exceedingly strength promoting and heavy. Meat soup is refreshing, strength promoting, unctuous, life giver (*prāṇa prada*) and light.

मांसवर्गो द्विधाज्ञेयो जांगलानूपभेदतः ।। १ ।।

There are two groups of *māṁsa* (meat) viz., meat of *jāṅgala* animals and the meat of *ānūpa* animals.

**तत्र जांगललक्षणगुणाः**

जङ्घालं[1] मांसवर्गेऽत्र [बि][2]लस्थाश्च गुहाशयाः ।

तथा पर्णमृता ज्ञेया विष्किराः प्रतुदा अपि ।। २ ।।

[प्रसहा[3]ऽप्यथ च] ग्राम्या अष्टौ जाङ्गलजातयः ।

*Jāṅgala* **(Meat of animals dwelling in dry land forests)**

*Jāṅgala* is of eight categories viz., (1) *jaṅghāla*, (2) *vilastha*, (3) *guhāśaya*, (4) *parṇa mṛga*, (5) *viṣkira*, (6) *pratuda*, (7) *prasaha* and (8) *grāmya*.

**जांगला** मधुरा रूक्षास्तुवरा लघवम्तथा ॥ ३ ॥
बल्या वृष्या बृंहणाश्च दीपना दोषहारिणः ।
मूकता मिन्मिनत्व च गद्गदत्वार्दिते नथा ॥ ४ ॥
वाधिर्यमशुचि च्छर्दि प्रमेहं मुखजान्गदान् ।
गलगण्डं श्लीपदं च नाशयत्यनिलामयान् ॥ ५ ॥

Meat of this variety is sweet, un-unctuous, astringent, light, strength promoting, aphrodisiac, nourishing and digestive stimulant. It alleviates *doṣas* and cures *mūkatā* (dumbness), *minminatva* (stammering), *gadgadatva* (lulling speech), *ardita* (facial paralysis), *vādhirya* (deafness), *aśuci* (sense of impurity), *chardi* (vomiting), *prameha* (obstinate urinary disorders including diabetes), *mukharoga* (diseases of the oral cavity), *gala gaṇḍa* (goitre), *ślīpada* (filariasis) and diseases caused by *vāyu*.

4 5
**कूलेचराः प्लवाश्चापि कोशस्थाः पादिनस्तथा** ।
**मत्स्या** एतत्ते विख्याताः पञ्चधानूपजातयः ॥ ६ ॥

*Ānūpa* **(Meat of animals inhabiting marshy land)**

*Ānūpa* is of five categories viz., (1) *kūlecara*, (2) *plava*, (3) *kośastha*, (4) *pādin* and (5) *matsya*.

**आनूपाः** मधुराः स्निग्धाः गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छिलाश्चैव मांसवृद्धिप्रदाः परम् ।
प्रायोऽभिष्यन्दिनस्ते हि प्रायो[ऽ]पथ्यतमाः मताः ॥७॥

Meat of this variety is sweet, unctuous, heavy, suppresser of the power of digestion, alleviator of *kapha* and slimy. It increases muscle tissue considerably. It is generally *abhiṣyandin* (which obstructs the channels of circulation) and unwholesome.

**अथ जांगललक्षणम्, विशिष्टगुणा :**

**हरिणैणकुरंगार्क्षवातायुमृगमातृकाः** ।
6
**राजीवः** पृषतश्चापि **श्वदंष्ट्रः शरभादयः** ॥ ८ ॥
**जङ्घालसं**ज्ञिताः एते तेषा चिह्नं पृथक् शृणु ।
**हरिण**स्ताम्र उद्दिष्टः **एणः** कृष्णतनुर्मतः ॥ ९ ॥
**कुरंग**स्ताम्रवर्णः स्याद्धरिणाकृतिको महान् ।
**ऋष्यो** नीलांड्को लोके सरोरु इति भण्यते ॥ १० ॥
**वातायुस्तु** किशोराभो मृगः स्वल्पः प्रकीर्तितः ।
7
स्वल्पः पृथूदरो ज्ञेयः शशाभो **मृगमातृकः** ॥ ११ ॥
**कस्तूरीहरिणं** चैके वदंति मृगमातृकम् ।
**राजीवस्तु** मृगो ज्ञेयो राजीभिः परितो वृतः ॥ १२ ॥
**पृषत**श्चन्द्रविन्दुः स्याद्धरिणात्किञ्चिदल्पकः ।
**श्वदंष्ट्रः** सम्मतो यस्तु काश्मीरे कर्कटाभिधः ॥ १३ ॥
काश्मीरदेशे **शरभो**ऽष्टपात्स्यादुत्साहयुक्तश्चतुरूर्ध्वपादः ।
उष्ट्रप्रमाणः समहाविषाणः ख्यातो नवस्थः स महामृगाख्यः॥ १४॥

**Different types of *Jāṅgala* meat**

*Hariṇa, eṇa, kuraṅga, ṛkṣa, vātāyu,mṛga mātṛkā, rājīva, pṛṣat, śvadaṁṣṭra, śarabha*—these animals are called *jaṅghāla.* Their characteristic features are given below:

*Hariṇa* is of coppery colour. *Eṇa* has a black body.

*Kuraṅga* is of coppery colour. It looks like *hariṇa* but it is bigger in size. *Ṛṣya (ṛkṣa)* is commonly called *nīlāṇḍuka* or *saroru*. *Vātāyu* is like a deer calf and it is small in size. *Mṛga mātṛka* is like a rabbit. It is small in size and it has a bulging abdomen. Some people, however, take musk deer as *mṛga mātṛka*. *Rājīva* has a spotted body. *Pṛṣat* is dotted like the moon in its body and it looks like a *hariṇa* of small size. *Śvadaṁṣṭra* is called *karkaṭa* in Kashmir. *Śarabha* is found in Kashmir. It has eight legs, four of which are upwards. It is like a camel in size and it has big horns. This animal, which is also known as *mahā mṛga* is locally called *navastha* (?).

**'कृतमालो वप्रचुरः विश्रुतो विन्दुचित्रकः[8] ।'**

'जागला:[9] प्रायशः[10] सर्वे पित्तश्लेष्महरा मता.[11] ॥ १५ ॥
किञ्चिद्वातकरा[12] ज्ञेया लघवो बलवर्धनाः ।

*Kṛtamāla*, *vapracura*, *viśruta* and *vindu citraka*—these animals also come under the *jaṅghāla* category.

The meat of all these animals generally alleviates *pitta* and *kapha*. It slightly aggravates *vāyu*. It is light and promoter of strength,

**गोधाशशभुजंगाखुशल्लक्याद्या[13] विलेशयाः ॥ १६ ॥**

*Vileśaya* **(Meat of animals which live in burrows in the earth)**

*Godhā, śaśa, bhujaṅga, ākhu, śallaki* etc., are called *vileśaya* animals.

बिलेशया वातहरा मधुरा रसपाकयोः ।
बृंहणा बद्धविण्मूत्रा:[14] वीर्योष्णाश्च प्रकीर्तिताः ॥ १७ ॥

The meat of these animals alleviates *vāyu*. It is sweet both in taste and *vipāka*. It is nourishing and it causes retention of stool and urine. It is hot in potency.

15 16
**सिंहव्याघ्रवृकाक्षर्क्षतरक्षुद्वीपिनस्तथा** ।

**बभ्रुजम्बुकमार्जारा इत्याद्या** स्युर्गुहाशयाः ॥ १८ ॥'

[भावप्रकाशः मांसवर्ग ११ : १४-१६]

*Guhāśaya* **(Meat of animals that dwell in caves)**

*Siṁha, vyāghra, vṛka, akṣa, ṛkṣa, tarakṣu, dvīpin, babhru, jambuka, mārjāra* etc., are called *guhāśaya* animals.

**तरक्षुः** हुडहा इति लोके । **द्वीपिः चित्रः व्याघ्रः** ।

स्थूलपुच्छो रक्तनेत्रो बभ्रुभेद' स नकुलः ॥ १९ ॥

*Tarakṣu* is commonly known as *haḍahā*. *Dvīpin* is the tiger with a spotted body. A variety of *babhru* which has a thick tail and red eyes is called *nakula*.

'गुहाशया वातहरा गुरूष्णा मधुराश्च ते ।

स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ।

The meat of these animals alleviates *vāyu*. It is heavy, hot, sweet, unctuous and promoter of strength. It is always wholesome for patients suffering from the diseases of the eye and the anus.

17
**वनौका** **वृक्षमार्जारवृक्षमर्कटिकाऽऽदयः** ॥ २० ॥'

[भावप्रकाशः मांसवर्ग ११ : १७-१८]

'स्मृताः **पर्णमृगा** वृष्याश्चक्षुष्याः शोणिते हिताः ।

श्वासाऽर्शःकासशमनाः सृष्टमूत्रपुरीषकाः ॥२१॥'

[भावप्रकाश. मांसवर्ग ११ : १९]

***Parṇa mṛga***

***Vanaukā, vṛkṣa mārjāra, vṛkṣa markatikā*** **etc., are called** ***parṇa mṛga*** animals.

The meat of these animals is aphrodisiac, promoter of eye sight and useful in the correction of the vitiation of blood. It cures *śvāsa* (asthma), *arśas* (piles) and *kāsa* (bronchitis). It helps in the elimination of urine and stool.

18
वर्तिकालावविकिरकपिंजलकतित्तिराः ।
19
चकोरक्रकराद्याश्च विष्किराः समुदाहृताः ॥ २२ ॥

*Viṣkira* **(Meat of gallinacious birds)**

*Vartikā, lāva, vikira, kapiñjalaka tittira, cakora, krakara,* etc., are called *viṣkira* animals.

विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः ।

They eat by tearing (*vikīrya*) the food because of which they are called *viṣkira*.

20
कपिंजल इति ख्यातो लोके कपिञ्जतित्तिरः ।

[भावप्रकाश मांसवर्ग ११ : २०-२१]

चकोरः प्रसिद्धः । क्रकरः कथर इति लोके ॥ २३ ॥

The gray coloured *tittira* (*kapiśa tittira*) is called *kapiñjala*. *Cakora* is a well known bird. *Krakara* is locally called *kathara*.

'विष्किरा मधुराः शीता कषाया. कटुपाकिनः ।
21
बल्या वृष्यास्त्रिदोषघ्नाः पथ्याश्च लघवो मताः ॥२४॥'

[भावप्रकाश: मांसवर्ग ११ : २२]

The meat of these animals is sweet, cooling, astringent in taste, pungent in *vipāka*, strength promoting and aphrodisiac. It alleviates all the three *doṣas*. It is wholesome and light.

'कालकंठकहारीतकपोतशतपत्रकाः
22
सारिका खंजरीटश्च पिकाद्या प्रतुदा मताः

### *Pratuda* (Meat of packer birds)

*Kālakaṇṭhaka, hārīta, kapota, śatapatra, sārikā, khañjariṭa, pika* etc., are called *pratuda* animals.

प्रत्युद्य[23] भक्षयन्त्येते तुण्डेन प्रतुदास्ततः ॥ २५ ॥'

[भावप्रकाशः मांसवर्ग ११ : २३]

They eat by picking (*pratudya*) the food because of which they are called *pratuda*.

कालकंठकगोडादौ गौरै अडागके इति प्रसिद्धः ॥२६॥

In the country of *gauḍa, kālakaṇṭhaka* is popularly called *gaurai* and *aḍāgake*.

हारीता हारिला इति लोके ॥ २७ ॥

*Hāritā* is called *hārilā* in the local vernacular.

कपोतो धवलः पाण्डु शतपत्रो बृहच्छुकः ।

*Kapota* is white and yellowish (*pāṇḍu*). *Śatapatra* is the bigger variety of *śuka*.

'प्रतुदा मधुराः पित्तकफघ्नास्तुवरा हिमाः ।
लघवो बद्धवर्चस्का किञ्चिद्वातप्रकोपनाः[24] ॥ २८ ॥

The meat of these animals is sweet. It alleviates *pitta* and *kapha*. It is astringent, cooling and light. It causes retention of stool and it slightly aggravates *vāyu*.

काको गृध्र उलूकाश्च चिल्लुश्च[25] शशघातिनः[26] ।

चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः ॥२९॥'

[भावप्रकाशः मांसवर्ग ११ : २३-२५]

### *Prasaha* (Meat of animals & birds who eat by snatching)

*Kāka, gṛdhra, ulūka, cillu, śaśaghātin, cāṣa, bhāsa, kurara*

etc., are called *prasaha* animals.

[27] ‘प्रसहाः कीर्तिता एते प्रसह्यान्नाद्यभक्षणाः ।

These animals eat by snatching (*prasahya*) their food because of which they are called *prasaha.*

[28] वीर्योष्णाः प्रसहाः सर्वे तन्मांसं चाहरन्ति ये ॥ ३० ॥’

[भावप्रकाशः मांसवर्ग ११ : २६-२७]

[29] ते शोषभस्मकोन्मादरेतक्षीणा भवन्ति हि ।

The meat of all these animals is hot in potency. Persons who eat their meat suffer from *śoṣa* (consumption), ***bhasmaka*** (gluttonous appetite), ***unmāda*** (insanity) and reduction in semen.

[30] छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ॥३१॥

*Grāmya* **(Meat of domesticated animals)**

*Chāga, meṣa, vṛṣa, aśva* etc., are called *grāmya* animals by the great sages.

[31] ग्राम्या वातहराः सर्वे दीपनाः कफपित्तलाः ।

मधुरा रसपाकाभ्यां बृंहणा बलवर्धनाः ॥३२॥

The meat of all these animals alleviates *vāyu,* stimulates digestion and aggravates *kapha* and *pitta.* It is sweet both in taste and *vipāka,* nourishing and strength promoting.

लुलायगण्डवाराहचमरीवारणादयः ।

[32] एते कूलेचराः प्रोक्ता यस्मात् कूले चरन्त्यपाम् ॥३३॥

*Kūlecara* **(Meat of animals who live near water)**

*Lulāya, gaṇḍa, vārāha, camarī, vāraṇa,* etc., are called *kūlecara* animals.

These animals graze (reside) by the side of water (*kūla*) because of which they are called *kūlecara.*

लुलायो महिषः। गण्डः खड्गः। चमरी चमरपुच्छो गौः ॥३४॥

*Lulāya is mahiṣa* (buffalo), *gaṇḍa* is *Khaḍga* (rhinoceros) and *camarī* is a *type of cow* having a chowric tail.

कुलेचरा मरुत्पित्तहरा वृष्या बलावहाः।
मधुराः शीतलाः स्निग्धाः मूत्रलाः श्लेष्मवर्धनाः ॥३५॥

The meat of *kūlecara* animals like *lalāya, mahiṣa, gaṇḍa, khadga, camarī, camara puccha* and *go* alleviate *vāyu* and *pitta.* It is aphrodisiac, promoter of strength, sweet, cooling, unctuous and diuretic. It aggravates *kapha.*

[33] **हससारसकाचाक्षबकक्रौञ्चससारिकाः** ।
**नंदीमुखी सकादम्ब बलाकाद्याः प्लवा** मताः[34] ।
[35] प्लवन्ते सलिले यस्मादेते तस्मात्प्लवाः स्मृता ॥३६॥

*Plava* **(Meat of animals who swim in water)**

*Hamsa, sārasa, kācākṣa, baka, krauñca, sasārikā, nandī mukhī, kādamba, balākā* etc., are called *plava* animals.

काचाक्षः[36] कर्दिकाक्षो[37] वृहद्बकः[38] । क्रौञ्चः शरद्विहङ्ग[39] स्यात् टेंक इति लोके। ससरिका[40] सिधु[41] इति लोके ॥ ३७ ॥

*Kācākṣa* is also known as *karditākṣa or bṛhadbaka. Krauñca* is also called *śarad vihaṅga* and in folk language it is called *teṅka. Sasārikā* is called *sindhu* in folk language.

स्थूला कठोरा वृत्ता च यस्याश्चञ्चूपरिस्थिता।
गुटिका[42] जम्बु सदृशी ज्ञेया[43] नन्दीमुखीति सा ॥ ३८ ॥
कादंब[44] कयवा इति लोके। बलाका लघुबकः[45] बगुली इति लोके ॥३९॥

*Nandī mukhi* has, above its bill, a projection which is big in size, hard to touch and round in shape. *Kādamba* is called

*Kayaṁbā* in folk lore. *Balākā* is the small variety of *vaka*, which in folk lore is called *bagulī*.

प्लवाः पित्तहराः स्निग्धाः मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चैव[46] बलशुक्रकराः सराः ॥ ४० ॥

The meat of these animals alleviates *pitta*. It is unctuous, sweet, heavy and cooling. It aggravates *vāyu* and *kapha* and promotes strength as well as semen. It is laxative.

[47]शशकविणकश्चैव शुक्तिशंबूकभल्लुकाः ।
[48]जीवाश्चैवंविधाः सर्वे कोशस्थाः परिकीर्तिताः ॥४१॥

*Kośastha* (Meat of animals that dwell in shells)

*Śaśaka*, *viṇaka*, *śukti*, *śaṁbūka*, *bhalluka* etc., are called *kośastha* animals.

कोशस्थाः मधुराः स्निग्धा पित्तवातहरा हिमाः ।
[49]बृंहणाश्च तथा वृष्याः वर्चस्याः कफवर्धनाः ॥ ४२ ॥

The meat of these animals is sweet, unctuous, alleviator of *pitta* as well as *vāyu*, cooling, nourishing and aphrodisiac. It increases the quantity of stool and *kapha*.

कुम्भीरकूर्मनक्राश्च कर्कटः[50] कृष्णकर्कटः ।
[51]घण्टिका शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥ ४३ ॥

*Pādin*

*Kumbhīra*, *kūrma*, *nakra*, *karkaṭa*, *kṛṣṇa karkaṭa*, *ghaṇṭikā*, *śiśumāra* etc., are called *pādin* animals.

कुम्भीरो जलजन्तु[52] विशेषः । कूर्म कच्छप[53] इति लोके ।
नक्रः नाक इति लोके शरंघादि[54] नद्यां बहुलः ॥ ४४ ॥

[55] 'कर्कट: कंकडा इति लोके । कृष्णकर्कटस्तद्भेद: । घंटिका

घडियाल इति लोके । शिशुमार: [56] सूसि इति लोके ॥ ४५ ॥

*Kumbhīra* is a type of aquatic animal. *Kūrma* is known as *kacchapa* in folk lore. *Nakra* is called *nāka* in folk lore; they are found in large numbers in rivers like *Saranghā*. *Karkaṭa* is known as *keṁkaḍā* in the folk language. *Kṛṣṇa karkaṭa* is a variety of *karkata*. *Śiśumāra* is called *sūsi* in the folk lore.

पादिनोऽपि च ये ते तु कोशस्थानां गुणै: समा: ।'

[भावप्रकाश: मांसवर्ग ११ : २७-३७]

The meat of these animals shares the properties of the meat of *kośastha* animals.

'रोहिताद्यास्तु ये जीवास्ते **मत्स्या:** परिकीर्त्तिता: ।

*Matsya* **(fish)**

Living creatures like *rohita* etc., are called *matsya* (fish).

मत्स्या: स्निग्धोष्णमधुरा गुरव: कफपित्तला: ॥४६॥

[भावप्रकाश: मांसवर्ग ११ : ३९]

बल्याभिष्यन्दिनो वृष्या: बृंहणा: पवनापहा: ।

व्यवायाध्वरतानां च दीप्ताग्नीनां च पूजिता: ॥४७॥

Fish is unctuous, hot, sweet and heavy. It aggravates *kapha* and *pitta* and promotes strength. It is *abhiṣyandi* (which obstructs the channels of circulation), aphrodisiac, nourishing and alleviator of *vāyu*. It is useful for those indulging in sex and walking and for those who have a strong power of digestion.

**अथ जांगलादीनां कतिपयानां विशिष्टानां गुणा :**

'**हरिण:** शीतलो बद्धविण्मूत्रो दीपनो लघु: ।

रसेपाके च मधुर: [57] सुगन्धि सन्निपातहा ॥ ४८ ॥

**Property of the meat of individual animals**

*Hariṇa* **(Red deer)**

The meat of *hariṇa* is cooling. It causes retention of the stool and urine. It is digestive stimulant and light. In taste and *vipāka* it is sweet. It has a good smell and it alleviates all the three *doṣas*.

[58] कषायो मधुरो हृद्यः पित्तासृक्कफवातजित् ।
संग्राही रोचनो "बल्य[59]स्तेषामेणो ज्वरापहः ॥ ४६ ॥'
[भावप्रकाशः मांसवर्ग ११ : ४१-४२]

*Eṇa* **(Black buck)**

The meat of *eṇa* is astringent, sweet and a cardiac tonic. It alleviates *pitta*, blood, *kapha* and *vāta*. It is constipative and appetiser. It cures fever.

मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः ।
'पृषतस्तु भवेत्स्वादु[60] ग्राहकः शीतलो लघुः ।
दीपनो[61] रोचनः" श्वासज्वरदोषत्रयास्रजित् ॥ ५० ॥'
[भावप्रकाशः मांसवर्ग ११ : ४५]

*Pṛṣat* **(Spotted deer)**

The meat of *pṛṣat* is sweet both in taste and *vipāka*. It alleviates *doṣas* and is digestive stimulant. It is delicious, constipative, cooling and light. It is an appetiser. It cures *śvāsa* (asthma) and *jvara* (fever). It alleviates all the three *doṣas* as well as the vitiated blood.

'मुण्डिनी ज्वरकासास्रक्षयश्वासापहा हिमा ।'

*Muṇḍinī*

The meat of *muṇḍinī* cures *jvara* (fever), *kāsa* (bronchitis), vitiation of blood, *kṣaya* (consumption) and *śvāsa* (asthma). It is cooling.

'न्यङ्कुः स्वादुर्लघुर्बल्यो वृष्यो दोषत्रयापहः ॥५१॥'

[भावप्रकाशः मांसवर्ग ११ : ४६]

### *Nyaṅku* (Antelope)

The meat of *nyaṅku* is sweet, light, strength promoting and aphrodisiac. It alleviates all three *doṣas*.

ऋष्यस्तु मधुरो वृष्यः स्निग्धोष्णः कफपित्तलः ।

### *Ṛṣya*

The meat of *ṛṣya* is sweet, aphrodisiac, unctuous and hot. It aggravates *kapha* and *pitta*.

'शशः शीतो लघुर्ग्राही रूक्षः स्वादु सदा हितः ॥५२॥

62

वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः ।

63

ज्वरातिसारशोषास्रश्वसनार्शोहरश्च सः ।

### *Śaśa* (Hare)

The meat of *śaśa* is light, constipative, un-unctuous, sweet and always wholesome. It stimulates digestion and alleviates *kapha* as well as *pitta*. It is neutral for *vāyu*. It cures *jvara* (fever), *atisāra* (diarrhoea), *śoṣa* (consumption), vitiation of blood, *śvasana* (asthma) and *arśas* (piles).

शल्यकः श्वासकासास्रशोषदोषत्रयापहः ॥' ५३ ॥

[भावप्रकाशः मांसवर्ग ११ : ५०-५१]

॥ गुहाशयाः ॥

### *Śalyaka*

The meat of *śalyaka* cures *śvāsa* (asthma), *kāsa* (bronchitis), vitiation of blood and *śoṣa* (consumption). It alleviates all the three *doṣas*.

64

'लावा विष्किरवर्गे स्युस्ते चतुर्धा मता बुधैः ।

[65] पांसुलो [66] गौरकाश्चापि पौण्ड्रको दर्भरस्तथा ॥' ५४ ॥

[भावप्रकाशः मांसवर्ग ११ : ५४-५५]

### *Lāva* (Common quail)

*Lāva,* which is included in the *viṣkira* group, is of four types viz., (1) *pāṁsula,* (2) *gauraka,* (3) *pauṇḍraka* and (4) *darbhara.*

[67] 'लावा हृद्या हिमा स्निग्धा ग्राहिणो वह्निदीपनाः' ।

The meat of *lāva* in general is a cardiac tonic, cooling, unctuous, constipative and digestive stimulant.

पांशुलः [68] श्लेष्मलस्तेषा वीर्योष्णानिलनाशनः ॥ ५५ ॥

The meat of the *pāṁśula* type of *lāva* aggravates *kapha.* It is hot in potency. It alleviates *vāta.*

गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् ।

The meat of the *gaura* type of *lāva* is lighter, un-unctuous and stimulant of digestion. It alleviates all the three *doṣas.*

पौण्ड्रकः पित्तकृत्किञ्चिल्लघुर्वातकफापहः ॥ ५६ ॥

The meat of *pauṇḍraka* type of *lāva* aggravates *pitta.* It is slightly light. It alleviates *vāyu* and *kapha.*

दर्भरो रक्तपित्तघ्नो हृदामयहरो हिमः ।

The meat of *darbhara* type of *lāva* cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *hṛdāmaya* (heart disease). It is cooling.

[69] वर्त्तीको मधुरः शीतो रूक्षश्च [70] कफपित्तनुत् ॥ ५७ ॥

[भावप्रकाशः मांसवर्ग ११ : ५६-५७, ५८]

### *Vartika* (Gray partridge)

The meat of *vartika* is sweet, cooling and un-unctuous. It alleviates *kapha* and *pitta*.

[71] '**चटकः** शीतलः स्निग्धो स्वादुः शुक्रकफप्रदः ।

### *Caṭaka* (Tree sparrow)

The meat of *caṭaka* is cooling, unctuous and sweet. It increases semen and *kapha*.

सन्निपातहरो **वेश्मचटक**स्त्वतिशुक्रलः ।। ५८ ।।'

[भावप्रकाशः मांसवर्ग ११ : ६१]

### *Veśma caṭaka* (House sparrow)

The meat of *veśma caṭaka* alleviates *sannipāta* (a condition caused by the vitiation of all the three *doṣas*). It increases semen in excess.

**वर्तको**ऽग्निधमः [?] शीतो ज्वरदोषत्रयापहः ।

[72] सुरुच्यः शुक्रदो बल्यो **वर्तिका**ल्पगुणा ततः ।। ५९ ।।

### *Vartaka* and *Vartikā* (Male bustard and female bustard)

The meat of *vartaka* is cooling. It cures *jvara* and alleviates all three *doṣas*. It is delicious and promoter of semen as well as strength.

The meat of *vartikā* is slightly inferior in quality.

[73] '**तित्तिरि**र्वर्णदो ग्राही हिक्कादोषत्रयापहः ।

[74] श्वासकासहरः पथ्यस्तमा**द्गौरो**ऽधिको गुणैः ।।' ६० ।।

[भावप्रकाशः मांसवर्ग ११ : ५९]

### *Tittiri* (Partridge) & *Gaura*

The meat of *tittiri* promotes complexion. It is constipative. It cures *hikkā* (hiccup). It alleviates all the three *doṣas*. It cures *śvāsa* (asthma) and *kāsa* (bronchitis). It is wholesome.

The meat of *gaura* is better in quality.

'कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलजिद्गुरुः[75] ।
चक्षुष्यः शुक्रकफकृत् बल्यो[76] वृष्यः कषायकः ॥ ६१ ॥

### *Kukkuṭa* (Cock)

The meat of *kukkuṭa* is nourishing, unctuous, hot in potency, alleviator of *vāyu* and heavy. It promotes eyesight. It increases semen and *kapha*. It is strength promoting, aphrodisiac and astringent.

पानीयकुक्कुटः[77] स्निग्धो बृंहणः श्लेष्मलो गुरुः ।
वातपित्तक्षय[78]कृमीविषमज्वरनाशनः ॥ ६२ ॥

### *Pānīya Kukkuṭa* (Water cock)

The meat of *pānīya kukkuṭa* is unctuous, nourishing, aggravator of *kapha*, heavy and alleviator of *vāyu* and *pitta*. It cures *kṣaya* (consumption), *kṛmi* (parasitic infection) and *viṣama jvara* (irregular fever).

**अथ प्रतुदाः**

हारीतः[79] उष्णो रूक्षश्च रक्तपित्तकफापहः ।
[80]स्वेदस्वरकरः प्रोक्त ईषद्वातकरश्च सः ॥ ६३ ॥'

[भावप्रकाशः मांसवर्ग ११ : ६१-६५]

### *Hārita*

The meat of *hārita* is hot and un-unctuous. It alleviates

vitiation of blood, *pitta* and *kapha*. It promotes sweating and good voice. It slightly aggravates *vāyu.*

**पाण्डुकः** कफवातघ्नो ग्रहणीदोषनाशनः ।
रक्तपित्तहरः शीतो मधुरो रसपाकयोः ॥ ६४ ॥

*Pāṇḍuka*

The meat of *pāṇḍuka* alleviates *kapha* and *vāyu.* It cures *grahaṇī doṣa* (sprue syndrome), *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is cooling and sweet both in taste and *vipāka.*

संग्राही वातशमनः **कपोतः** परिकीर्तितः ।
कपोत इति विज्ञेयो लोके धवलपाण्डुकः ।

*Kapota* **(Dove)**

The meat of *kapota* is constipative and alleviator of *vāyu.* This bird is white and yellowish in colour.

'**पारावतो** गुरु स्निग्धो रक्तपित्तानिलापहः ॥' ६५ ॥
[भावप्रकाशः मांसवर्ग ११ : ७१]

संग्राही शुक्रलः शीतः कपोतोऽपि समोऽमुना ।

*Pārāvata* **(Pigeon)**

The meat of *pārāvata* is heavy and unctuous. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and vitiation of *vāyu.* It is constipative, promoter of semen and cooling. It shares the properties of *kapota.*

'नातिस्निग्धानि वृष्याणि स्वादुपाकरसानि च ।'
81
वातघ्नान्यतिशुक्राणि गुरूण्यण्डानि पक्षिणाम्' ॥६६॥
[भावप्रकाशः मांसवर्ग ११ : ७२]

## Egg

Eggs of birds are not very unctuous. They are aphrodisiac, sweet in *vipāka* and taste, alleviator of *vāyu*, promoter of semen in excess and heavy.

**अथ ग्राम्याः**

'छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषजित्[82] ।
नातिशीतमदाहित्वात्[83] स्वादु पीनसनाशनम् ॥ ६७ ॥
परं बलकरं रुच्यं बृंहणं धातुवर्द्धनम्[84] ।

### *Chāga* (Goat)

The meat of the goat is light, unctuous, sweet in *vipāka* and alleviator of all the three *doṣas*. It is not very cold and it does not cause burning sensation. It is sweet. It cures *pīnasa* (chronic rhinitis). It is an excellent promoter of strength. It is appetiser and nourishing. It promotes tissue elements.

अजायास्तु[85] प्रसूताया मांसं पीनसनाशनम् ॥ ६८ ॥
शुष्ककासेऽरुचौ शोथे[86] हितमग्नेश्च दीपनम् ।

The meat of a recently delivered she-goat cures *pīnasa* (chronic rhinitis). It is useful in *śuṣka kāsa* (dry cough), *aruci* (anorexia) and *śotha* (oedema). It stimulates the power of digestion.

अजासुतस्य बालस्य मांसं लघुतरं भवेत्[87] ॥ ६९ ॥
हृद्यं[88] ज्वरहरं श्रेष्ठं सुस्वादु[89] बलदं भृशम् ।

The meat of a male calf of the goat is lighter. It is cardiac tonic. It is an excellent curative of *jvara* (fever). It is exceedingly delicious and promoter of strength.

मांसं निष्कासिताण्डस्य[90] छागस्य कफकृद्गुरु ॥ ७० ॥

स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् ।

The meat of the castrated goat aggravates *kapha*. It is heavy. It cleanses the channels of circulation. It promotes strength and muscle tissue. It alleviates *vāyu* and *pitta*.

91

वृद्धस्य वातलं रूक्षं व्याधितस्य मृतस्य च ।

The meat of an old-goat aggravates *vāyu*. It is unctuous. The meat of diseased and dead goat shares these properties also.

ऊर्ध्वजत्रुविकारघ्नं छागमुंडं रुचिप्रदम् ॥' ७१ ।

[भावप्रकाश: मासवर्ग ११ : ७४-७६]

The meat from the head of the goat cures diseases of head and neck and is delicious.

92

मेषस्य बृहण मास पित्तश्लेष्मकरं गुरु ।

*Meṣa* (Sheep)

The meat of the sheep is nourishing. It aggravates *pitta* and *kapha*. It is heavy.

93

ततो वृषणहीनस्य मास किञ्चिल्लघु स्मृतम् ॥ ७२ ॥

The meat of a castrated sheep is slightly lighter.

मेद: [?] पुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहम् ।

पित्तश्लेष्मकरं किंचिद्वातव्याधिविनाशनम् ॥ ७३ ॥'

[भावप्रकाश: मांसवर्ग ११ : ८१, ८३]

The fat and the meat of the tail of the sheep are cardiac tonic, aphrodisiac and alleviator of fatigue. They aggravate *pitta* and *kapha* and alleviate to some extent diseases caused by *vāyu*.

94
गोमांसं गुर्वपथ्यं च पित्तश्लेष्मविवर्धनम् ।
स्निग्धं वातहरं बल्य बृंहणं पीनसं प्रणुत् ॥ ७४ ॥

*Go* (**Cow**)

Beef is heavy and unwholesome. It aggravates *pitta* and *kapha*. It is unctuous, alleviator of *vāyu*, strength promoting and nourishing. It cures *pīnasa* (chronic rhinitis).

95
'अश्वमांसं सलवणं वह्निकृत्कफपित्तनम् ।
वातहृद्बृंहणं बल्यं चक्षुष्यं मधुरं लघु ॥ ७५ ॥'
[भावप्रकाश: मांसवर्ग ११ : ८७]

*Aśva* (**Horse**)

The meat of the horse is saline and stimulant of the power of digestion. It aggravates *kapha* and *pitta*. It alleviates *vāyu*. It is nourishing, promoter of strength as well as eye sight, sweet and light.

**अथ कुलेचराः**

माहिषं मधुरं मासं स्निग्धोष्णं वातनाशनम् ।
निद्रारेतोबलस्तन्यतनुदीर्घकरं लघु (?) ॥ ७६ ॥

*Mahiṣa* (**Buffalo**)

The meat of the buffalo is sweet, unctuous, hot and alleviator of *vāyu*. It increases sleep, semen, strength, lactation and size of the body. It is light (?).

**अथ प्लवाः**

96
कादंबकं चक्रांगं च मांसं स्निग्धं हिमं गुरु ।
'वृष्यं च सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥ ७७ ॥'
[भावप्रकाश: मांसवर्ग ११ : ९०]

### *Kadambaka* and *Cakrāṅga*

The meat of *kadambaka* and *cakrāṅga* is unctuous, cooling, heavy and aphrodisiac. It helps in the elimination of stool and urine. It alleviates *vāyu*, *pitta* and vitiation of blood.

**अथ कोशस्थाः**

97

'**कच्छपो** बलदो वातपित्तजित्पुंस्त्वकारकः ।'

[भावप्रकाशः मांसवर्ग ११ : ९२]

### *Kacchapa* (Tortise)

The meat of *kacchapa* is promoter of strength. It alleviates *vāyu* and *pitta* and promotes potency.

विरूक्षणो लेखनश्च वीर्यौजःपित्तदूषणः ॥ ७८ ॥

स्वाद्वम्ललवणस्तेषा **गज**श्लेष्मानिलापहः ।

### *Gaja* (Elephant)

The meat of *gaja* is un-unctuous and depleting. It vitiates semen, *ojas* and *pitta*. It is sweet, sour and saline. It alleviates *kapha* and *vāyu*.

98

'स्नेहनं बृंहणं वृष्यं "श्रमघ्नमनिलापहम् ।

99

**वाराहं** पिशित बल्यं रोचन स्वादद गुरु ॥ ७९ ॥'

[माधवद्रव्यगुणः मांसवर्ग १९ : ११-१२]

### *Varāha* (Hog)

The meat of *varāha* is unctuous, nourishing, aphrodisiac, alleviator of fatigue and *vāyu*, promoter of strength, appetiser, delicious and heavy.

**स्निग्धं समधुरं वृष्यं" गुर्वभिष्यन्दि शीतलम् ।**

**वातपित्तहरं हृद्यं सौकरं चर्मचित्रितम् ॥ ८० ॥**

*Carmacitrita sukara*

The meat of *sukara* who has a spotted skin is unctuous, sweet, aphrodisiac, heavy, *abhiṣyandi* (which obstructs the channels of circulation), cooling, alleviator of *vāyu* as well as *pitta* and cardiac tonic.

'कफघ्नं **खड्गिपिशितं** कषायमनिलापहम् ।
पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम् ॥ ८१ ॥'
[माधवद्रव्यगुणः मांसवर्ग १६ : १२-१३]

*Khaḍga* **(Rhinoceros)**

The meat of *khaḍga* alleviates *kapha*. It is astringent and alleviator of *vāyu*. It is *pitrya* (liked by *pitṛs* or dead ancestors), sacred and promoter of longevity. It causes retention of urine and is un-unctuous.

100
'**बर्ही** हिततमो बल्यो वातघ्नो मांसशुक्रदः ।'
[माधवद्रव्यगुण· मासवर्ग १६ : १७]

*Barhī* **(Peacock)**

The meat of *barhī* is most wholesome. It promotes strength, alleviates *vāyu* and increases muscle tissue as well as semen.

101
'कषायमधुराः शीता रक्तपित्तनिबर्हणाः ॥ ८२ ॥
102
विपाके मधुराश्चैव **कपोताः** **गृहवासिनः** ।

*Kapota* **(Dove ?)**

The meat of various types of *kapota* residing in houses is astringent and sweet in taste and cooling. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is sweet in *vipāka*.

तेभ्यो लघुतराः किञ्चित् **कपोताः** **वनवासिनः** ॥ ८३ ॥

शीताः संग्राहिणश्चैव स्वल्पमूत्रकराश्च ते ।

The meat of those residing in forests is slightly lighter. It is cooling and constipative. It produces less of urine.

किञ्चिल्लघुतरा रूक्षा ग्राहिणः श्लेष्मपित्तलाः ।

हितास्ते पाण्डु चित्रांगा हारीता वनवासिनः ॥८४॥'

[माधवद्रव्यगुणः मासवर्ग १६ : १६-२२]

The meat of *kapotas* which are yellowish, spotted or green in colour and which reside in the forests, is slightly lighter, un-unctuous and constipative. It aggravates *kapha* and *pitta*, and it is wholesome.

'चक्षुष्या मधुराः पाके सर्पा[103] मेधकराः स्मृताः ।

*Sarpa* **(Snake)**

The meat of *sarpa* is promoter of eye sight, sweet in *vipāka* and promoter of intellect.

**दर्वीकरा दीप्यकाश्च** तेषूक्ता कटुपाकिनः ॥ ८५ ॥

मधुरात्यर्थचक्षुष्याः सृष्टविण्मूत्रमारुताः ।

Of them, *darvīkara* and *dīpyaka* are pungent in *vipāka*. They are sweet in taste and excellent promoter of eye sight. They help in the elimination of stool, urine and flatus.

**शंखकूर्मादयः**[104] स्वादुरसपाका बलावहाः ॥ ८६ ॥

शीताः स्निग्धा हिताः[105] पित्ते चक्षुष्याः शुक्रवर्द्धनाः[106] ।

*Śaṅkha*, *Kūrma* **etc., (Conch shell, tortoise etc.)**

The meat of *śaṅkha*, *kūrma* etc., is sweet both in taste and in *vipāka*. It is strength promoting, cooling, unctuous, useful for *pitta* and promoter of eye sight as well as semen.

**कृष्णकर्कटकस्तेषां** बल्यः कोष्णोऽनिलापहः ।

107
शुक्रसंधानकृत्सृष्टविण्मूत्रोऽनिलपित्तहा ॥ ८७ ॥'

[माधवद्रव्यगुण मांसवर्ग १६ : २७-३०]

*Kṛṣṇa Karkaṭa* **(Block crab)**

The meat of the black variety of *karkaṭa* is strength promoting and slightly hot. It alleviates *vāyu*. It promotes semen and healing. It helps in the elimination of stool and urine. It alleviates *vāyu* and *pitta*.

'हंसो वातहरो वृष्यो स्वर्यो मांसबलप्रदः ।

*Haṁsa* **(Swan)**

The meat of *haṁsa* alleviates *vāyu*. It is aphrodisiac. It is promoter of good voice, muscle tissue and strength.

108
चक्रवाकस्तथाठेंकश्चटको वातनाशनः ॥ ८८ ॥

*Cakravāka, Theṅka* **and** *Caṭaka*

The meat of *cakravāka, ṭheṅka* and *caṭaka* alleviates *vāyu*.

109
सारिकाबककादम्बलावका. पवनापहा. ।

स्निग्धाः सृष्टमला वृष्या रक्तपित्तहरा हिमा. ॥८९॥

*Sārikā, Baka, Kadamba* **and** *Lāvaka* **(Shama thrush, Common crane, Whistling teal & Common quail)**

The meat of *sārikā, baka, kadamba* and *lāva* alleviates *vāyu*. It is unctuous. It helps in the elimination of stool. It is aphrodisiac. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is cooling.

कासश्वासक्षयहरी गोधा मधुरशीतला ।

*Godhā* **(Inguana)**

The meat of *godhā* cures *kāsa* (bronchitis), *śvāsa* (asthma) and *kṣaya* (consumption). It is sweet and cooling.

110

मूषको मधुरः स्निग्धो कफशुक्रविवर्द्धनः ।

दुर्नामानिलदोषघ्नः कृमिदूषीविषापहः ॥ ६० ॥'

[माधवद्रव्यगुणः मांसवर्ग १६ : २४-२७]

*Mūṣaka* (**Mouse**)

The meat of *mūṣaka* is sweet and unctuous. It increases *kapha* and semen. It cures *durnāman* (piles), aggravation of *vāyu*, *kṛmi* (parasitic infection) and *dūṣī viṣa* (artificial poisoning).

रोचनं बृंहणं चारुकरीरैः सह जांगलम् ।

रक्तपित्तविसर्पे च कुष्ठे मेहे विषे हितम् ॥ ६१ ॥

**Combinations**

Along with *cāru karira*, the meat of *jāṅgala* type of animals is appetiser and nourishing. It cures *raktapitta* (a disease characterised by bleeding from different parts of the body), *visarpa* (erysipelas), *kuṣṭha* (obstinate skin diseases including leprosy), *meha* (obstinate urinary disorders including diabetes) and *viṣa* (poisoning).

रोचनं दीपनं हृद्य घंटोलैः सह जांगलम् ।

Along with *ghaṇṭola*, the meat of *jāṅgala* type of animals works as appetiser, digestive stimulant and cardiac tonic.

111

'वातश्लेष्मविकारघ्न दीपनं चानुलोमनं ॥ ६२ ॥

ह्लादनीयं विशेषेण वीताग्नेः सह जांगलं ।'

Along with *vītāgni*, the meat of *jāṅgala* type of animals cures diseases caused by *vāyu* and *kapha*. It is digestive stimulant and laxative. It is very delicious.

शुष्कमूलकसंसिद्धं मांसं यक्ष्महरं नृणाम् ॥ ६३ ॥

The meat prepared with dry radish cures *yakṣmā* (tuberculosis),

स्नेहनं दीपनं हृद्यं मांसं दधिकमुच्यते ।

The meat prepared with curd is unctuous, digestive stimulant and cardiac tonic.

बल्य स्वर्यं च चक्षुष्यं ताडोगैः सह साधितम् ॥६४॥

The meat prepared with *tāḍoga* promotes strength, good voice and eyesight.

'दूरे जलान्तनिलया[112] दूरे पानीयगोचराः ।
ये मृगाश्च विहंगाश्च तेऽल्पाभिष्यन्दिनो[113] मताः ॥६५॥
अतीव ते[114] बलीयांसः समीपोदकगोचराः ।
ये मृगाश्च विहंगाश्च महाभिष्यन्दिनो मताः ॥६६॥

**Habitat**

The meat of animals and birds residing and grazing far away from water is less *abhiṣyandi* (which obstructs the channels of circulation). The meat of animals which graze near water is an excellent promoter of strength. Such animals and birds are extremely *abhiṣyandi* (which obstructs the channels of circulation).

॥ इति मांसवर्गः ॥

Thus ends the group dealing with various types of meat.

## NOTES AND REFERENCES

1. जंगला इति षष्ठपुस्तके पाठः ।
2. चिलस्थाश्च इति द्वितीयपुस्तके पाठः ।

3. प्रमहा अप्पथ इति षष्ठपुस्तके पाठः ।
   सहा अथ च इति द्वितीयपुस्तके पाठः ।
4. अथानूपाः इति षष्ठपुस्तके अधिको पाठः ।
5. पल्वाद्यश्च इति षष्ठपुस्तके पाठः ।
6. राजीवतृषतश्चापि इति द्वितीयपुस्तके पाठः ।
7. शषाभो इति द्वितीयपुस्तके पाठः ।
8. "कृत........चित्रकः" पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
9. जाङ्गलाः इति आकरे पाठः ।
*Methikā* **(Trigonella foecum-graecum Linn.)**

*Methikā* is wholesome, laxative and alleviator of all the three *dosas*. It specifically alleviates *vāyu.*

'त्रिदोषशमनी वृष्या **काकमाची** रसायनी ।'

[माधवद्रव्यगुण: शाकवर्ग २२ : ७]

'नात्युष्णा शीतवीर्या च भेदिनी कुष्ठनाशिनी ॥८॥'

[माधवद्रव्यगुण. शाकवर्ग २२ : ८]

*Kākamācī* **(Solanum nigrum Linn.)**

*Kākamācī* alleviates all the three *doṣas.* It is aphrodisiac and rejuvenating. It is not very hot and is cold in potency. It is purgative and it cures *kuṣṭha* (obstinate skin diseases including leprosy).

'ईषत्तिक्तं त्रिदोषघ्नं शाकं कटु **सतीनजम्** ।

*Satīna* **(Pisum sativum Linn.)**

The *śāka* of *satīna* is slightly bitter. It alleviates all the three *doṣas* and it is pungent.

स्वादुपाकरसं शाक दुर्जरं **हरिमन्थजम्** ॥ ९ ॥

### *Harimantha*

The *śāka* of *harimantha* is sweet in *vipāka* as well as in taste. It is difficult of digestion.

भेदनं रूक्षमधुरं **कालाय**मतिवातलम् ।

### *Kalāya* (Lathyrus sativus Linn.)

*Kalāya* is purgative, un-unctuous and sweet. It aggravates *vāyu* in excess.

**राजक्षवक**शाक तु त्रिदोषशमनं लघु ॥ १० ॥

ग्राहि शस्तं विशेषेण ग्रहण्यर्शोविकारिणाम् ।

### *Rājakṣavaka*

The *śāka* of *rājakṣavaka* alleviates all the three *doṣas*. It is light and constipative. It is specifically useful for patients suffering from *grahaṇī* (sprue syndrome) and *arśas* (piles).

10

कषायावहिता पित्ते स्वादुतिक्तरसा हिमा ॥ ११ ॥

लघ्वी **मण्डूकपर्णी** च तद्वद्**गोजिह्विका** मता ।

### *Maṇḍūkaparni* and *Gojihvakā* (Centella asiatica Urban and Launaea asplenifolia Hook. f.)

*Maṇḍūkaparni* is astringent and useful in *pitta*. It is delicious, bitter in taste, cooling and light.

*Gojihvakā* has similar properties.

अविदाही त्रिदोषघ्नः संग्राही **सुनिषण्णकः** ॥ १२ ॥

### *Suniṣaṇṇaka* (Marsilia minuta Linn.)

*Suniṣaṇṇaka* does not produce burning sensation and it alleviates all the three *doṣas*. It is constipative,

ग्रहण्यर्शोविकारघ्नी[11] साम्ला वातकफे हिता ।
उष्णा कषायमधुरा **चांगेरी** चाग्निदीपनी ॥ १३ ॥

*Cāṅgerī* **(Oxalis corniculata Linn.)**

*Cāṅgerī* cures *grahaṇī* (sprue syndrome) and *arśas* (piles). It is sour and useful in the aggravation of *vāyu* as well as *kapha.* It is hot, astringent, sweet and digestive stimulant.

रक्तपित्तानिलहरं सतिक्तं **कंचटं** मतम् ।

*Kaṁcaṭa*

*Kaṁcaṭa* alleviates vitiation of blood, *pitta* and *vāyu.* It is bitter.

कफवातहर ग्राहि[12] **मोदकं**[13] तत्प्रकीर्तितम् ॥ १४ ॥

*Modaka*

*Modaka* alleviates *kapha* and *vāyu* and it is constipative.

कफापह शाकमुक्तं **वरुणप्रपुन्नाटयोः** ।
रूक्षं लघु च शीतं च वातपित्तप्रकोपणम् ॥ १५ ॥

*Varuṇa* **and** *Prapunnāṭa* **(Crataeva nurvala Buch.—Ham. and Cassia tora Linn.)**

The *śāka* of *varuṇa* and *prapunnāṭa* alleviates *kapha.* It is un-unctuous, light, cooling and aggravator of *vāyu* as well as *pitta.*

**वत्सादनी बिल्वपत्रं श्रेयसी तिलपर्ण्यपि** ।
**गण्डीरश्चित्रक**श्चेति शस्यते कफमारुते ॥ १६ ॥

*Vatsādanī* **etc.**

The *śāka* of *vatsādanī,* leaf of *bilva, śreyasī, tilaparṇī,*

*gaṇḍīra* and *citraka* is useful in the aggravation of *kapha* and *vāyu.*

कालशाकं गरश्लेष्मशोथघ्नं दीपनं कटु ।

*Kālaśāka* **(Corchorus capsularis Linn.)**

*Kālaśāka* cures *gara* (a type of poisoning), aggravation of *kapha* and *śotha* (oedema). It is digestive stimulant and pungent.

वर्षाभ्वौ[14] कफवातघ्नौ हितौ[15] शोथोदरार्शसि ॥ १७ ॥

*Varṣābhū* **(Trianthema portulacastrum Linn.)**

Both the type of *varsābhū* alleviate *kapha* and *vāyu* and they are useful in *śotha* (oedema), *udara* (obstinate abdominal diseases including ascitis) and *arśas* (piles).

दीपनाः कफवातघ्नाश्चिरबिल्वांकुरासनाः[16] ।

*Cirabilva, Aṅkura* **and** *Asana*

The *śāka* of *cirabilva*, *aṅkura* and *asana* is digestive stimulant and it alleviates *kapha* as well as *vāyu.*

वातपित्तकरा रूक्षा[17] कटुका रसपाकतः ॥ १८ ॥
वेणोः करीरा[18] श्लेष्मघ्नाः कषायाश्च[19] विदाहिनः ।

*Veṇu Karīra* **(Bambusa arundinacea Willd.)**

The *karīru* of *veṇu* aggravates *vāyu* and *pitta.* It is ununctuous and pungent both in taste and *vipāka.* It alleviates *kapha.* It is astringent and it produces burning sensation.

तथा नव्यांकुराश्चापि[20] श्लेष्मपित्तहराः स्मृताः ॥१९॥

Freshly sprouted *karīra* is known to alleviate *kapha* and *pitta.*

**आटरूषकवेत्राग्रगुडूचीनिम्बपर्पटा:** ।
किराततिक्तसहिता[21] रक्तपित्तकफापहा:[22] ॥ २० ॥'

[माधवद्रव्यगुण: शाकवर्ग २२ : ६-२१]

*Āṭarūṣaka* **etc.**

*Āṭarūṣaka*, *vetrāgra*, *guḍūcī*, *nimba*, *parpaṭa* and *kirātatikta* alleviate the vitiation of blood, *pitta* and *kapha*.

'**वार्ताकं** कटु तीक्ष्णोष्णं मधुरं कफवातजित् ।
सक्षारमग्निजननं हृद्यं रुच्यमपित्तलम् ॥ २१ ॥

*Vārtāka* **(Solanum melongena Linn.)**

*Vārtāka* is pungent, sharp, hot, sweet, alleviator of *kapha* as well as *vāyu*, alkaline, digestive stimulant, cardiac tonic and appetiser. It does not aggravate *pitta*.

तद्बालं कफपित्तघ्नं पक्वं सक्षारपित्तलम् ।
तद्वृद्धं[23] गुरु[24] संशुष्कं कफवातामयापहम् ॥ २२ ॥

The tender *vārtāka* alleviates *kapha* and *pitta*. The matured *vārtāka* is alkaline and aggravator of *pitta*. When over matured (*bṛddha*) it is heavy. The dried *vārtāka* cures the diseases caused by *kapha* and *vāyu*.

कफमेदोऽनिलहरमत्यल्प[25] लघु दीपनम् ।
वार्ताक पित्तलं किञ्चिदगारपरिपाचितम् ।
तदेवं[26] तु गुरु स्निग्धं सतैललवणान्वितम् ॥ २३ ॥

*Vārtāka* burnt over charcoal reduces *kapha*, fat and *vāyu*. It is very slightly light and digestive stimulant. It aggravates *pitta*. When mixed with oil and salt it becomes heavy and unctuous.

अग्निप्रदा [27]मारुतनाशिनी च शुक्रप्रदा शोणितवर्द्धिनी च ।
[28]बलासकासक्षयनाशिनी च [29]**वार्ताकुरेषा** गुणसम्प्रयुक्ता ॥ २४ ॥

*Vārtāku*

*Vārtāku* stimulates digestion, alleviates *vāyu*, promotes semen and blood and cures aggravation of *kapha*, *kāsa* (bronchitis) and *kṣaya* (consumption).

कण्डूकुष्ठकृमिघ्नानि कफपित्तहराणि च ।
[30]फलानि **बृहतीनां** च कटुतिक्तलघूनि च ॥ २५ ॥

*Bṛhatī* **(Solanum indicum Linn.)**

The fruit of *bṛhatī* cures *kaṇḍū* (itching), *kuṣṭha* (obstinate skin diseases including leprosy) and *kṛmi* (parasitic infection). It alleviates *kapha* and *pitta*. It is pungent, bitter and light.

**पटोलपत्रं** पित्तघ्न नाल तस्य कफापहम् ।
**फल** [31]तस्य त्रिदोषघ्नं मूल तस्य विरेचनम् ॥ २६ ॥

*Paṭola* **(Trichosanthes dioica Roxb.)**

The leaf of *paṭola* alleviates *pitta*. Its stem alleviates *kapha*. Its fruit alleviates all the three *doṣas* and its root is purgative.

रोचन कफपित्तघ्नमवृष्य **कारवेल्लकम्** ।

*Kāravellaka* **(Momordica charantia Linn.)**

*Kāravellaka* is an appetiser. It alleviates *kapha* and *pitta*. It reduces virility.

[32]कारवेल्लकवज्ज्ञेयं फल **कर्कोटिकस्य** च ॥ २७ ॥
**हस्तिकर्कोटिकं** [33]तद्वद्गुणैस्तच्च बृहत्फलम् ।

*Karkoṭika* **and** *Hastikarkoṭika*

The fruit of *karkoṭika* shares the properties of *kāravellaka*.

*Hasti karkoṭika* has similar properties but its fruits are bigger in size.

34
विषघ्न **वन्ध्याकर्कोटि केवुकं** कफपित्तजित् ॥२८॥'

[माधवद्रव्यगुणः शाकवर्ग २२ : २३-३१]

*Vandhyā karkoṭi* **and** *Kevuka*

*Vandhyākarkoṭi* and *kevuka* cure *viṣa* (poisoning) and alleviate *kapha* as well as *pitta.*

35
'**कूष्माण्डकं** च **कालिंगकर्कोटैर्वारुडिंडिसम्** ।
36
तथा **त्रपुसचीनाकं** विष्टम्भि कफवातजित् ॥ २९ ॥

भेदि विष्टम्भ्यभिष्यन्दि स्वादुपाकरसं गुरु ।

*Kūṣmāṇḍaka* **etc.**

*Kūṣmāṇḍaka, kāliṅga, karkoṭi, ervāru, ḍiṅḍisa, trapusa* and *cīnāka* are wind forming, alleviator of *kapha* and *vāyu,* purgative, *abhisyandi* (which obstructs the channels of circulation), sweet in *vipāka* and taste and heavy.

पित्तनुत्तेषु **कूष्माण्डं** बालं मध्यं कफापहम् ॥ ३० ॥'

[माधवद्रव्यगुणः शाकवर्ग २२ : ३५-३६]

पक्व लघूष्ण सक्षारदीपन बस्तिशोधनम् ।

सर्वदोषहर हृद्य पथ्य चेतोविकारिणाम् ॥ ३१ ॥

*Kūṣmāṇḍa* **(Cucurbita pepo F.I.)**

The tender *kūṣmāṇḍa* alleviates *pitta.* The mature *kūṣmāṇḍa* alleviates *kapha.* The ripe *kūsmāṇḍa* is light, hot, alkaline and digestive stimulant. It cleanses the urinary bladder and alleviates all *doṣas.* It is cardiac tonic and wholesome for patients suffering from mental diseases.

[37] 'वर्चोभेदीन्यलाबूनि रूक्षशीतगुरूणि च ।

*Alābū* (**Lagenaria siceraria Standl.**)

Different 'types of *alābū* are purgative, un-unctuous, cooling and heavy.

कटुतुंबी हिमा हृद्या पित्तकासविषापहा ॥ ३२ ॥

*Kaṭu tumbī*

*Kaṭu tumbī* is cooling and cardiac tonic. It alleviates *pitta* and cures *kāsa* (bronchitis) and *viṣa* (poisoning).

[38] त्रपुसैर्वारुककारु गुरु विष्टम्भि शीतलम् ।
[39] मुख्यं रूक्षं च त्रपुस मूत्रलं त्वतिमारुतम् ॥ ३३ ॥
[40] सनीलं त्रपुसं तेषां कफपित्तहर स्मृतम् ।
तत्पाण्डु कफकृज्जीर्णमम्लं वातकफापहम् ॥ ३४ ॥

*Trapusa, Ervāru & Kakāru*

*Trapusa, ervāru* and *kakāru* are heavy, wind forming, cooling, delicious and un-unctuous.

**Trapusa (Cucumis sativus Linn.)**

*Trapusa* is diuretic and it exceedingly aggravates *vāyu*. *Trapusa* when it is green alleviates *kapha* and *pitta*. When it becomes yellowish in colour, it aggravates *kapha*. When over matured, it becomes sour and it alleviates *vāta* as well as *kapha*.

एर्वारुकं तु सम्पक्वं [41] दाहतृष्णाश्रमार्त्तिनुत् ।
सक्षारपित्तलं तेषु शीर्णवृन्तं कफापहम् ॥ ३५ ॥
भेदनं दीपनं [42] हृद्यमानाहप्लीहनुल्लघ ।

### *Ervāruka* (Cucumis utilissimus Roxb.)

The ripe *ervāruka* cures *dāha* (burning syndrome), *tṛṣṇā* (morbid thirst) and *śrama* (physical fatigue). It is alkaline and aggravator of *pitta.*

*Ervāruka* whose stalk is dried up alleviates *kapha.* It is purgative, digestive stimulant and cardiac tonic. It cures *ānāha* (flatulence) and *plīhan* (splenic disorder). It is light.

[43] सक्षारमधुरा रुच्या रूक्षा वातकफापहा ।। ३६ ।।

[44] अश्मरी भेदनी गुर्वी **नाडी कूष्माण्डसंभवा** ।

### *Kūṣmāṇḍa nāḍī*

The stalk of *knsmāṇḍa* is alkaline, sweet, appetiser and un-unctuous. It alleviates *vāta* as well as *kapha* and removes *aśmarī* (stone in the urinary tract). It is heavy.

**अलाबुनालिका** गुर्वी मधुरा पित्तनाशिनी ।

वातश्लेष्मकरी रूक्षा शीतला मलभेदिनी ।। ३७ ।।'

[माधवद्रव्यगुणः शाकवर्ग २३ : ३७-४३]

### *Alābu nālikā*

The stalk of *Alābu* is heavy and sweet. It alleviates *pitta* and aggravates *vāyu* as well as *kapha.* It is un-unctuous, cooling and purgative.

[45] 'विड्भेदि मधुरास्निग्धा प्रायो विष्टंभि वातला ।

कफापहा शीततरारुच्यपहा **पटोलिका** ।। ३८ ।।'

### *Paṭolikā* (Trichosanthes cucumerina Roxb.)

*Paṭolikā* is purgative, sweet, unctuous and mostly wind forming. It aggravates *vāyu* and alleviates *kapha.* It is cooler and it cures *aruci* (anorexia).

'स्वादुपाकरसा वृष्या रक्तपित्तमदापहा ।
[46]**उपोदिका** सरा स्निग्धा बल्या श्लेष्मकरी हिमा ॥३९॥'

[माधवद्रव्यगुणः शाकवर्ग २२ : ४३]

### *Upodikā* (Basella rubra Linn.)

*Upodikā* is sweet in *vipāka* and taste and aphrodisiac. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is laxative, strength promoting, aggravator of *kapha* and cooling.

'[47]**आरुकस्य** च सक्षारं शाकं श्लेष्मकरं गुरु ।'

[माधवद्रव्यगुण शाकवर्ग २२ : ४५]

### *Āruka* (Prunus domestica Linn.)

*Āruka* is alkaline, aggravator of *kapha* and heavy.

'[48]स्वभावात्पिच्छलः शीतो विष्टम्भी वातकोपकः ॥४०॥
रक्तपित्तहरः स्वादु [49]**नीरीचः** परिकीर्तितः ।

### *Nīrīca*

*Nīrīca* is slimy by nature, cooling, wind forming and aggravator of *vāyu*. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and is delicious.

[50]**मारुसो** मधुरः शीतो विष्टम्भी [51]गुरु पित्तकृत् ॥४१॥
[52]रक्तनीलादयश्चैव तज्जातीयाश्च तद्गुणाः ।

### *Mārusa*

*Mārusa* is sweet, cooling, wind forming, heavy and aggravator of *pitta*. It has many varieties, viz., red, blue etc. and all of them have the same properties.

[53]स्तन्यकृच्छीतगुर्वी च सकषाया [54]**कलम्बुका** ॥ ४२ ॥

*Kalaṁbuka* **(Ipomoea reptans Poir.)**

*Kalaṁbuka* promotes lactation. It is cooling, heavy and astringent.

भेदिनी कफपित्तघ्नी कुष्ठघ्नी **हिलमोचिका** ।

*Hilamocikā* **(Enhydra fluctuans Lour.)**

*Halamocikā* is purgative. It alleviates *kapha* and *pitta* and cures *kuṣṭha* (obstinate skin diseases including leprosy).

कफपित्तहरस्तिक्तो रोचनो **ग्रीष्मसुन्दरः** ॥ ४३ ॥

*Grīṣma sundara*

*Grīṣma sundara* alleviates *kapha* and *pitta.* It is bitter and appetiser.

[55] कटुतिक्तरसा हृद्या रोचनी वह्निदीपनी ।
[56] सर्वदोषहरा लघ्वी कंठ्या **मूलकपोतिका** ॥ ४४ ॥

*Mūla kapotikā*

*Mūla kapotikā* is pungent and bitter in taste, cardiac tonic, appetiser, digestive stimulant, alleviator of all *doṣas,* light and promoter of good voice.

**मूलकं** गुरु विष्टम्भी तीक्ष्णमामत्रिदोषकृत् ।
[57] [स्नेहसिद्धं] तदेव स्याद्दोषत्रयविनाशनम् ।
[58] तत्फलं कफपित्तघ्नं तत्पुष्पं कफवातजित् ॥ ४५ ॥'

[माधवद्रव्यगुणः शाकवर्ग २२ : ५०-५६]

*Mūlaka* **(Raphanus sativus Linn.)**

*Mūlaka* is heavy, wind forming and sharp. It produces *āma* and aggravates all the three *dosas.* When prepared along with fat, it alleviates all the three *doṣas.* Its fruit alleviates *kapha* and *pitta* and its flower alleviates *kapha* and *vāta.*

विष्टम्भि वातलं शाकं शुष्कमन्यत्तु मूलकात् ।

All types of *śāka*, when dried cause wind formation and aggravate *vāyu*. *Mūlaka*, however, is an exception.

[59] त्रिदोषघ्नमभिष्यन्दि **शाकं सर्षपजं** गुरु ॥ ४६ ॥

*Sarṣapa* **(Brassica compestris Boiss)**

The *śāka* of *sarṣapa* alleviates all the three *doṣas* (?). It is *abhiṣyandi* (which obstructs the channels of circulation) and heavy.

तथैव **राजिका**[60] तिक्ता तीक्ष्णा **पञ्चांगुलः** सरः ।

*Rājikā* **and** *Pañcāṅgula* **(Brassica nigra Koch. and Ricinus communis Linn.)**

*Rājikā* shares the properties of *sarṣapa śāka*. In addition it is bitter and sharp.

The *śāka* of *pañcāṅgula* is laxative.

सरूक्षमुष्णं **कौसुम्भं** पित्तकृत्कफवातजित् ॥ ४७ ॥

*Kusumbha* **(Carthamus tinctorius Linn.)**

*Kusumbha* is un-unctuous and hot. It aggravates *pitta* and alleviates *kapha* as well as *vāta*.

ईषत्तिक्तं समधुरं [61]**माषपत्रं** तु शुक्रलम् ।

*Māṣa* **(Phaseolus mungo Linn.)**

The leaves of *māṣa* are slightly bitter, sweet and promoter of semen.

**आहस्तिनी**[62] **सपत्तूरा** मूत्रलाश्मरि[63]नाशिनी ॥ ४८ ॥

*Āhastinī* **and** *Pattūrā*

*Āhastinī* and *pattūrā* are diuretics. They cure *aśmari* (stone

in the urinary tract).

न्यग्रोधोदुम्बराश्वत्थप्लक्षपद्मादिपल्लवाः ।
कषायाः स्तम्भनाः शीता[64] हिताः पित्तातिसारिणाम् ॥४६॥

*Nyagrodha* **etc.**

The leaf of *nyagrodha, udumbara, aśvattha, plakṣa, padma* etc. is astringent, constipative and cooling. It is useful for patients suffering from *paittika* type of *atisāra* (diarrhoea).

'छात्रकास्तु पला[65][ले]क्षुकरीषक्षितिवेणुजाः ।
सर्वे संस्वेदजाः शीताः कषायाः स्वादुपिच्छिलाः[66] ॥५०॥

*Saṁsvedaja* **(Mushroom)**

Mushrooms which grow on *palāla* (straw), *ikṣu* (sugar-cane), *karīṣa* (cow dung), *kṣiti* (ground) and *veṇu* (bamboo) are called *saṁsvedaja*. All of them are cooling, astringent, delicious and slimy.

गुरवश्छर्दतीसारज्वरश्लेष्मामयप्रदा ।
स्वादुपाकरसा रूक्षा दोषलास्ते[67] पलालया. ॥ ५१ ॥

Mushrooms which grow on straw are heavy. They produce *chardi* (vomiting), *atisāra* (diarrhoea), *jvara* (fever) and diseases caused by *kapha*. They are sweet in *vipāka* as well as taste and un-unctuous. They aggravate *doṣas*.

श्वेता. शुचि[68]स्थलीकाष्ठवंशगो[69]व्रजसंभवाः ।
'[नाति[70]दोषकरा ज्ञेयाः] शेषास्तेभ्यो विगर्हिताः ॥५२॥

Mushrooms which are white in colour, which grow in clean places or on wood, bamboo and cattle shed are not very injurious. Remaining types of mushrooms should not be used.

तद्विकल्पोऽल्पदोषश्च[71] स्थलीगोव्रजसंभवः[72] ।'
खुखुण्डक इति ख्यातो वृष्यो बल्योऽथ बृंहणः ।

Another variety of mushroom is called *khukhuṇḍaka*. It is less injurious and it grows on the ground and in a cattle shed. It is aphrodisiac, strength promoting and nourishing,

विष्टम्भिनः स्मृताः[73] सर्वे छत्राका वातकोपनाः ॥५३॥
[माधवद्रव्यगुणः शाकवर्ग २२ : ५७-६४]

All the mushrooms are known to be wind forming and they aggravate *vāyu*.

पिनाकिर्[74]वातला सार्द्रा[75] रुच्चिष्यानिलदीपनी ।

*Pināki*

*Pināki* aggravates *vāyu*. When it is green it is an appetiser and stimulant of digestion.

**विदारी** वातपित्तघ्नी वृष्या बल्या रसायनी ॥५४॥

*Vidārī* **(Ipomoea paniculata R. Br.)**

*Vidārī* alleviates *vāyu* and *pitta*. It is aphrodisiac, strength promoting and rejuvenating.

**शतावरी**[76] महाबल्या चक्षुष्या वातपित्तनुत् ।

*Śatāvarī* **(Asparagus racemosus Willd.)**

*Śatāvarī* is an excellent promoter of strength and eyesight. It alleviates *vāyu* and *pitta*.

**महती**[77] चैव हृद्या च मेधाग्निबलवर्धिनी ॥ ५५ ॥
ग्रहण्यर्शोविकारघ्नी वृष्या बल्या रसायनी ।

The bigger variety is a cardiac tonic and promoter of

intellect, power of digestion and strength. It cures *grahaṇī* (sprue syndrome) and *arśas* (piles). It is aphrodisiac, strength promoting and rejuvenating.

[78] कासपित्तहरास्तिक्तास्तस्या [79] एवांकुरा मता ॥ ५६ ॥

Its sprouts cure *kāsa* (bronchitis) and alleviate *pitta.* They are bitter.

[80] सरूक्षं विसशालूक क्रौञ्चादनं कसेरुकम् ।

शृंगाटकं गलोड्यं च गुरु विष्टंभि शीतलम् ॥५७॥

*Visaśālūka* **etc.**

*Visaśālūka, krauñcādana, kaseruka, sṛṅgāṭaka* and *galoḍhya* are un-unctuous, heavy, wind forming and cooling.

पौष्कर तु भवेद्बीज रक्तपित्तज्वरापहम् ।

*Pauṣkara* **(Lotus seed)**

The seed of *puṣkara* cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *jvara* (fever).

तथा तालप्रलंबं च उरःक्षतरुजापहम् ॥ ५८ ॥

*Tāla pralamba* **(Borassus flabellifer Linn.)**

The inflorescence of *tāla* cures *uraḥkṣata* (phthisis).

[81] पित्तानिलहरो [82] हृद्यः स्वादुः [83] मुंजातकः स्मृतः ।

*Muñjātaka* **(Orchis latifolia Linn.)**

*Muñjātaka* alleviates *pitta* and *vāyu.* It is a cardiac tonic and delicious.

[84] शंखहस्तीकरक्तांग मधुपिण्डकशृंगकम् ॥ ५९ ॥

शंखाद्यान्यालुकानीह[85] रक्तपित्तहराणि च ।
गुरूणि स्वादुशीतानि स्तन्यशुक्रकराणि च ॥ ६० ॥

## *Āluka* (Dioscorea Sp.)

*Śaṅkha, hastīka, raktāṅga, madhupiṇḍaka* and *śuṅgaka*—these are the different types of *āluka*. They cure *rakta pitta* (a disease characterised by bleeding from different parts of the body). They are heavy, delicious and cooling. They promote lactation and semen.

पिंडारुकं[86] कफकरं गुरु वातप्रकोपणम् ।

## *Piṇḍāruka* (Colocasia esculenta Schott)

*Piṇḍāruka* aggravates *kapha*. It is heavy. It also aggravates *vāyu*.

सुरेन्द्रकन्दः श्लेष्मघ्नो विपाके[87] कटु पित्तकृत् ॥ ६१ ॥

## *Surendra kanda* (Amorphophalus sylvaticus Kunth)

*Surendra kanda* alleviates *kapha*. It is pungent in *vipāka* and it aggravates *pitta*.

'बल्यः कदल्याः कंदस्तु वातपित्तहरः[88] सदा[89] ।'

## *Kadali kanda* (Musa paradisica Linn.)

The rhizome of *kadalī* promotes strength and it alleviates *vāyu* and *pitta*.

माणकं स्वादु शीतं[90] च गुरु चापि प्रकीर्तितम् ॥६२॥

## *Mānaka* (Alocasia indica Schott.)

Māṇaka is sweet, cooling and heavy.

दीपनः सूरणो रुच्यः कफघ्नो विशदो लघुः ।
'विशेषादर्शसा पथ्यो, भूकन्दस्त्वतिदोषलः ।। ६३ ।।

### *Sūraṇa* and *Bhūkanda*

*Sūraṇa* is digestive stimulant, appetiser, alleviator of *kapha*, *viśada* (non slimy) and light. It is specifically useful for *arśas* (piles).

*Bhū kanda* is exceedingly harmful.

अम्लिकायाः स्मृतः कन्दो ग्रहण्यर्शोहितो[91] लघुः[92] ।
नात्युष्णः कफवातघ्नो ग्राही शस्तो मदात्यये ।।६४।।

### *Amlikā kanda*

The rhizome of *amlikā* is useful in *grahaṇī* (sprue syndrome) and *arśas* (piles). It is light and not very hot. It alleviates *kapha* and *vāyu*. It is constipative and is useful in *madātyaya* (alcoholism).

कुमुदोत्पलपद्मानां कंदा मारुतकोपनाः[93] ।
कषायाः पित्तशमना विपाके[94] मधुरा हिमाः ।। ६५ ।।

### *Kumuda kanda* etc.

The rhizome of *kumuda*, *utpala* and *padma* aggravates *vāyu*. It is astringent, alleviator of *pitta*, sweet in *vipāka* and cooling.

मुसली[95] बृंहणी वृष्या वीर्योष्णा[96]र्शो[97]ऽनिलापहा ।

### *Muśalī* (Chlorophytum tuberosum Baker)

*Muśalī* is nourishing, aphrodisiac and hot in potency. It cures *arśas* (piles) and vitiation of *vāyu*.

[98] वाराहकन्दः श्लेष्मघ्नः कटुको रसपाकतः ॥ ६६ ॥
[99] कुष्ठकृमिहरो वृष्यो [100] बलवर्णविवर्धनः ।

*Vārāha kanda* **(Tacca aspera Roxb.)**

*Vārāha kanda* alleviates *kapha*. It is pungent in taste and *vipāka*. It cures *kuṣṭha* (obstinate skin diseases including leprosy) and *kṛmi* (parasitic infection). It is aphrodisiac and it promotes strength as well as complexion.

[101] तालस्य नालिकेरस्य खर्जूरस्य शिरांसि च ॥ ६७ ॥
कषायस्निग्धमधुरं बृंहणानि गुरूणि च ।
सृष्टमूत्राणि वृष्याणि [102] जीवनीयप्रदानि च ॥ ६८ ॥
बलपुंस्त्वक्षये [103] कासे रक्तपित्तेऽनिले विषे ।
प्रशस्तानि सदा पुंसां शीतानि [104] [105] रुचिराणि च ॥६९॥

*Tāla śiras* **etc.**

The top portion of the trunk of *tāla*, *nārikela* and *kharjūra* is astringent, unctuous, sweet, nourishing and heavy. It helps in the elimination of urine. It is aphrodisiac and vitalising. It is always useful for persons who have lost their strength and potency. It cures *kāsa* (bronchitis), *rakta pitta* (a disease characterised by bleeding from different parts of the body), vitiation of *vāyu* and *viṣa* (poisoning). It is cooling and delicious.

[106] बालं ह्यनार्तवं जीर्णं व्याधितं कृमिभक्षितम् ।
कंदं विवर्जयेत्सर्वं यो वा सम्यक् न रोहति ॥ ७० ॥

**Bad quality**

All rhizomes which are immature, unseasonal, old, diseased, eaten away by parasites and which are not properly grown should not be used.

धान्येषु मांसेषु फलेषु चैव शाकेषु चानुक्तमिह प्रमोहात्[107] ।
आस्वादतो भूतगुणैर्गृहीत्वा[108] तदादिशेद्द्रव्यमनल्पबुद्धिः ॥७१॥

**Miscellaneous**

The description of the properties of different type of *dhānyas* (corns and cereals), *māṁsa* (meat), *phala* (fruits) and *śāka* (vegetables) which is omitted here by mistake should be determind by the Wise by examining the taste and attributes of *mahābhūtas* in them.

॥ इति शाकवर्गः ॥

**Thus ends the group dealing with different types of vegetables.**

## NOTES AND REFERENCES

1. 'श्री गणेशाय नमः' पाठोऽयं चतुर्थपुस्तके उपलभ्यते ।
2. षड्विधं शाकमुद्दिष्टं इति आकरे पाठः ।
3. स्वादुपाकमसृक्पित्तविषनुत् इति आकरे पाठः ।
4. मेधाग्निबलवर्धन· इति आकरे द्वितीयपुस्तके च पाठः ।
5. चिल्ली वास्तूकवज्ज्ञेया इति आकरे पाठः ।
6. पित्तकफापहा इति आकरे पाठः ।
7. मधूरा इति द्वितीयपुस्तके पाठः ।
8. रक्तपित्तविषज्वरान् इति आदर्शपुस्तकेषु पाठः ।
9. सतीनकम् इति आकरे पाठः ।
10. कषायानु हिता इति आकरे पाठः ।
11. चाम्ला इति आकरे पाठः ।
12. संग्राहकं वातकरं इति आकरे पाठः ।
13. स्वादकं इति चतुर्थपुस्तके पाठः ।
14. वर्षाम्भ्वौ इति आदर्शपुस्तकेषु पाठः ।

15. हितौ शोथोदरार्शसाम् इति आकरे पाठः ।
16. कफवातघ्नाश्चिरबिल्वांकुराः सराः इति आकरे पाठः ।
17. रूक्षाः इति आकरे पाठः -
18. करीराः इति आकरे पाठ ।
19. सकषाया इति आकरे पाठः ।
20. नालांकुराश्चान्ये इति आकरे पाठः ।
21. किराततिक्तसहिता· इति आकरे पाठः ।
22 सर्वे पित्तकफापहा. इति आकरे पाठः ।
23. तद्वदेव इति आकरे पाठः ।
24. तु इति आकरे पाठः ।
25. कफमेदोनिलहरमत्यर्थ इति आकरे चतुर्थपुस्तके च पाठः ।
26. तदेकं इति आदर्शपुस्तके पाठः ।
27. मारुतनाशनी इति आकरे पाठः ।
28. बलासकासक्षयनाशनी इति आकरे पाठः ।
29. वार्ताकिरेषां इति आकरे पाठः ।
30. फलीनि इति चतुर्थपुस्तके पाठः ।
31 पाठोऽयं आकरे नोपलभ्यते ।
32 कारवेल्लकवद्ज्ञेयं इति आकरे पाठः ।
33. तद्वद् गुणैस्तत्तु इति आकरे पाठ· ।
34. वंध्यकर्कोट केवुक इति आकरे पाठ. ।
वन्धिकार्कोटि केबु इति द्वितीयपुस्तके पाठ ।
35. कूष्मांडतुम्बकालिंगकर्कोटैर्वारुडिडिसम् इति आकरे पाठ. ।
36 तथा त्रपुसबीज तु रुच्चिदं कफवातजित् इति आकरे पाठ· ।
तथा त्रपुसबानाकचिर्मिट कफवातकृत् इति चतुर्थपुस्तके पाठः ।
37. वर्च्चोभेदीन्यलाबूनि इति चतुर्थपुस्तके पाठ ।
38 त्रपुसैर्वारुक स्वादु इति आकरे पाठ· ।
39. मुखप्रियं च रूक्ष च मूत्रल त्रपुस त्वति इति आकरे चतुर्थपुस्तके च पाठः ।
40. वाल सनील त्रपुसं तेषा पित्तहर स्मृतम् इति आकरे पाठ. ।
41. दाहतृष्णाक्लमार्त्तिनुत् इति आकरे पाठ. ।
42. हृद्यमानाहाष्ठीलनुल्लघु इति आकरे पाठः ।
43. शीर्णवृन्त लघु स्वादु भेद्युक्त वह्निपित्तकृत् ।

सक्षारमधुरा रुच्या वातपित्तकफापहा ॥ इति आकरे पाठः ।
(माधवद्रव्यगुणः शाकवर्ग २२ : ४१-४२)
44. स्थिराविभेदिनी इति द्वितीयपुस्तके पाठः ।
45. 'विड्भेदमधुरास्निग्धा····पटोलिका' पाठोऽय चतुर्थपुस्तके अधिकमुपलभ्यते ।
46. उपोदका इति द्वितीयपुस्तके पाठः ।
47. विषमस्य यवक्षारं सार्षश्लेष्मकर गुरु [?] इति द्वितीयपुस्तके पाठः ।
48. स्वभावपिच्छिलः इति आकरे पाठः ।
49. स्वादुर्नाडीचः इति चतुर्थपुस्तके आकरे च पाठः ।
50. मातुसो इति चतुर्थपुस्तके पाठः ।
51. पित्तनुद् गुरुः इति आकरे पाठः ।
52. रक्तनालादयश्चान्ये इति आकरे पाठः ।
53. स्तन्यवृष्या च गुर्वी च चतुर्थपुस्तके पाठः ।
स्तन्या वृष्या च इति आकरे पाठः ।
54. करबुका इति चतुर्थपुस्तके पाठः ।
55 कटुतिक्ता सरा इति आकरे पाठः ।
कटुतिक्तसहा हृद्या इति द्वितीयपुस्तके पाठः ।
56. सर्वदोपहरी इति आकरे पाठ. ।
57. स्निग्धसिद्धिं इति द्वितीयपुस्तके पाठः ।
58 'तत्फल·······कफवातजित्' पाठोऽय द्वितीयपुस्तके नोपलभ्यते ।
59 त्रिदोपं बह्वभिष्यन्दि इति आकरे पाठः ।
60. तीक्ष्णा तिक्तः इति आकरे पाठः ।
61. मापपर्णन्तु इति आकरे पाठ ।
62. श्रीहस्तिनी इति आकरे चतुर्थतुस्तके च पाठः ।
63. मूत्रलाश्मरीभेदनी इति आकरे चतुर्थपुस्तके च पाठः ।
64 शीता इति आकरे पाठ. ।
65. पलाशेक्षुकरीपक्षितिवेणुजाः इति चतुर्थपुस्तके पाठः ।
66. 'छात्रकास्तु···· ···स्वादुपिच्छिला' पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
67. पलालजाः इति आकरे पाठः ।
68. शुद्धस्थली इति आकरे पाठः ।
69. काष्ठवंशग्रोव्रजसभवाः इति आदर्शपुस्तकेषु पाठ. ।
70. पाठोऽय चतुर्थपुस्तके नोपलभ्यते ।
71. तद्विकल्पोऽल्पदोषाश्च इति आकरे पाठः ।

72. 'नातिदोषकरा···स्थलीगोव्रजसंभवः' पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
73. छत्रका इति आकरे पाठः ।
74. पिण्याकी वातला इति आकरे पाठः।
75. सान्द्रा इति आकरे पाठः ।
76. वृष्या शतावरी बल्या इति आकरे पाठः ।
77. सैव इति आकरे पाठः ।
78. कफपित्तहरास्तिक्तास्तस्या इति आकरे पाठः ।
79. स्मृताः इति आकरे पाठः ।
80. तरूढबिसशालूकक्रौंचादनकसेरुकम् इति आकरे पाठः ।
81. पित्तानिलकरो इति द्वितीयपुस्तके पाठः ।
82. वृष्यः इति आकरे चतुर्थपुस्तके च पाठः ।
83. स्वादुर्मुञ्जातकः इति आकरे पाठः ।
84. शंखहस्तिकरक्तांगमधुपिण्डकशृंगकम् इति आकरे पाठः ।
85. षड्वातपाण्डुकानाह इति आदर्शपुस्तकेषु पाठः ।
86. पिण्डालुकं इति आकरे पाठः ।
87. कटुः इति आकरे पाठः ।
88. वातपित्तहरश्च इति आकरे पाठः ।
89. 'बल्यः····सदा' पाठोऽयं चतुर्थपुस्तके नोपलभ्यते ।
90. पित्तं इति आदर्शपुस्तकेषु पाठः ।
91. लघुः इति आकरे पाठः ।
92. 'विशेषादर्शसां····लघु' पाठोऽय चतुर्थपुस्तके नोपलभ्यते ।
93. मारुतकोपनाः इति आकरे पाठः ।
94. मधुराः इति आकरे पाठः ।
95. मुशली इति आकरे चतुर्थपुस्तके च पाठः ।
96. वीर्योष्णाऽर्शोऽनिलापहा इति आकरे पाठः ।
97. अस्य श्लोकस्यानन्तरम् 'नातिश्लेष्मघ्नः पित्तदूषणः ।' पाठोऽयं द्वितीय-पुस्तके अधिकं उपलभ्यते ।
98. वराहकंदः इति आकरे पाठः ।
99. कुष्ठमेहक्रिमिहरो वृष्योष्णः पित्तवर्द्धनः इति आकरे चतुर्थपुस्तके च पाठः।
100. अस्य श्लोकस्यानन्तरम् 'कंदो हलिन्याः श्लेष्मघ्नः पित्तलो गर्भपातनः' पाठोऽय चतुर्थपुस्तके अधिकमुपलभ्यते ।

101. वालस्य इति द्वितीयपुस्तके पाठः ।
102. जीवन प्रीणनानि च इति आकरे पाठः ।
103. काश्यें इति चतुर्थपुस्तके पाठः ।
104. रुचिदानि इति आकरे पाठः ।
105. द्वितीयचतुर्थपुस्तकयोः अत्रैव "इति शाकवर्गः" इति पठितं । अस्य श्लोकस्यानन्तरम् ''''''परिजीर्णं च कामेजुष्टमदेशजं । वर्ज्जयेत्पत्रशाक च यदकाले प्ररोहि च' पाठोऽयं चतुर्थपुस्तके अधिकं उपलभ्यते ।
106. बालं अनार्त्तवं इति चतुर्थपुस्तके पाठः ।
107. प्रमादात् इति आकरे पाठः ।
108. समादिशेद् द्रव्यमनल्पबुद्धिः इति आकरे पाठ ।

# CHAPTER 21

'षष्टिका यवगोधूमा लोहिता ये च शालयः ।
मुद्गाढकीमसूराश्च धान्येषु प्रवराः स्मृताः ।। १ ।।

*Dhānya* **(Corns and Cereals)**

Among the corns and cereals, *ṣaṣṭika*, *yava*, *godhūma*. red variety of *śāli*, *mudga*, *āḍhakī* and *masūra* are the best.

एणः कुरंगो [1]हरिणस्तित्तिरिर्लाव एव च ।
[2]मयूरवर्गिकूर्माश्च श्रेष्ठा [3]मांसगुणेषु च ।। २ ।।

*Māṁsa* **(Meat)**

Among different types of meat, the meat of *eṇa*, *kuraṅga*, *hariṇa*, *tittiri*, *lāva*, *mayūra*, *vargi* (?) and *kūrma* are the best.

दाडिमामलक द्राक्षा खर्जूरं सपरूषकम् ।
राजादन [4]मातुलुंगफलवर्गे प्रशस्यते ।। ३ ।।

*Phala* **(Fruits)**

Among different types of fruits *dāḍima*, *āmalaka*, *drākṣā*,

*kharjūra*, *paruṣaka*, *rājādana* and *mātuluṅga* are the best.

चंचूसतीनवास्तूकचिल्लमूलकपोतिका[5] ।
मण्डूकपर्णी जीवन्ती शाकवर्गे[6] प्रशस्यते ॥ ४ ॥

### *Śāka* (Vegetables)

Among vegetables, *cañcū*, *satīna*, *vāstūka*, *cilla*, *mūlakapotikā*, *maṇḍūkaparṇī* and *jīvantī* are the best.

गव्यं क्षीरघृतं[7] श्रेष्ठं सैन्धवं लवणेषु च ।

### *Kṣīra*, *Ghṛta* and *Lavaṇa*

Among milk and ghee, those derived from the cow are the best.

Among salts, rock salt is the best.

धात्री दाडिममम्लेषु पिप्पलीनागरे[8] कटौ ॥ ५ ॥

### Sour and Pungent articles

Among sour things, *dhātrī* and *dāḍima* are the best.

Among pungent things *pippalī* and *nāgara* are the best.

तिक्ते पटोलकं[9] श्रेष्ठ मधुरे घृतमुच्यते ।

### Bitter and Sweet articles

Among bitter things *paṭola* is the best.

Among sweet things ghee is the best.

क्षौद्रं[10] पूगफलं श्रेष्ठं कषाये सपरूषकम् ॥ ६ ॥

### Astringent things

Among astringent things, honey, *pūgaphala* and *parūṣaka* are the best.

शर्करेक्षुविकारेषु पानजातौ[11] सुरासवौ ।

**Sugarcane products and Drinks**

Among sugar cane products, *śarkarā* is the best.

Among different types of drinks, *surā* and *āsava* are the best.

परिसंवत्सरं धान्यं मांसं वयसि मध्यमे ॥ ७ ॥
अपर्युषितमन्नं[12] तु संस्कृतं मात्रया शुभम् ।
फलं पर्यागतं शाकमशुष्कं तरुणं नवम् ॥' ८ ॥

[माधवद्रव्यगुण: श्रेष्ठवर्ग २३ : १-८]

**Miscellaneous**

Among different types of *dhānya* (corns and cereals), those preserved for one year are the best. The meat of animals in their middle age is the best. Food which is not stale, which is properly prepared and which is taken in proper quantity is the best. Fruit which is matured is the best. The vegetable which is not dried, which is tender and fresh is the best.

'रसेषु मधुर: श्रेष्ठ: कंदशाकेषु सूरण: ।
जलेषु दिव्यं मत्स्येषु रोहित: प्रवरो मत: ।
तैलेषु तिलजं तैलं श्रेष्ठं प्रोक्तं मनीषिभि:[13] ॥ ९ ॥

Among different types of tastes, the sweet taste is the best. Among the rhizomes *sūraṇa* is the best. Among the different types of water, *divya* (which is directly collected from the sky) is the best. Among different types of fish, *rohita* is the best. Among the different types of oil, *til* oil is the best.

॥ इति श्रेष्ठवर्ग: ॥

**Thus ends the section dealing with different types of best articles.**

## NOTES AND REFERENCES

1. हरिणः तित्तिरार्लाव इति आकरे पाठः ।
2. मयूरर्मिकूर्माश्च इति आकरे पाठः ।
3. मांसगणेषु इति आकरे पाठः ।
4. मातुलुङ्ग फलवर्गे इति आकरे पाठः ।
5. चंचूसतीनवास्तूक-चिल्लीमूलकपोतिकाः इति आकरे पाठः।
6. शाकवर्गेषु शस्यते इति द्वितीयपुस्तके पाठः ।
7. क्षीरं घृतं इति आकरे पाठः ।
8. नागरं इति आकरे पाठः ।
9. पटोलवार्ताके इति आकरे पाठः ।
10. खर्जूर इति द्वितीयपुस्तके पाठः ।
11. पानकादी इति चतुर्थपुस्तके पाठः ।
12. अपर्युषितमम्लं इति आदर्शपुस्तकेषु पाठः ।
13. रसेषु····मनीषिभिः पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।

# CHAPTER 22

'चक्षुष्य. प्रीणनो वृष्यो बृंहणो रक्तपित्तजित् ।

रसायनो गुरुः शीतः स्निग्धश्च मधुरो रसः ।। १ ।।

## Sweet Taste

Sweet taste is a promoter of eyesight, pleasing, aphrodisiac and nourishing. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is rejuvenating, heavy, cooling and unctuous.

[पक्ता][1] हृद्योऽग्निरुचिकृत्क्लेदनस्तर्पणो मृदुः[2] ।

स्निग्धोष्णो[ऽ]म्लो लघु[र्वापि][3] वातहा रक्तनाशनः ।।२।।

क्लेदी तीक्ष्णः सरः शुक्रविबंधानाहृदृष्टिहा[4] ।

## Sour taste

Sour taste is unctuous, hot, light and alleviator of *vāyu* and vitiation of blood. It produces stickiness. It is sharp and laxative. It reduces semen, constipation and eye sight.

भेदी पक्ताग्निरुचिकृत्स्निग्धोष्णो लवणो[5] गुरुः ॥३॥

**Saline taste**

Saline taste is purgative, promoter of digestive power, appetiser, unctuous, hot and heavy.

कर्षणो लघुरूक्षोष्णः कृमिशुक्रकफापहा ।
[6]रुच्योऽग्निपित्तकृच्छेदि तीक्ष्णः शोषप्रदः कटुः ॥४॥

**Pungent taste**

Pungent taste is *karsaṇa* (which eliminates by force), light, un-unctuous and hot. It cures *kṛmi* (parasitic infection) and reduces semen as well as *kapha*. It is an appetiser, stimulant of digestion, aggravator of *pitta*. *chedi* (which has the power to penetrate by incision), sharp and producer of dryness (*śoṣa*).

[7]कफपित्तविषक्लेदकंडूकुष्ठज्वरापहः ।
रूक्षः शीतो[8] लघुस्तिक्तः शोषण कृमिहाऽग्निकृत् ॥५॥

**Bitter taste**

Bitter taste alleviates *kapha* as well as *pitta*. It cures *viṣa* (poisoning), stickiness (*kleda*), *kaṇḍū* (itching), *kuṣṭha* (obstinate skin diseases including leprosy) and *jvara* (fever). It is un-unctuous, cooling, light and drying (*śoṣaṇa*). It cures *kṛmi* (parasitic infection) and stimulates the power of digestion.

कषायः[9] शोषणः स्तम्भी ग्राही रोपणपीडनः[10] ।

कफशोणितपित्तघ्नो रूक्षः शीतो गुरुस्तथा ॥ ६ ॥

[माधवद्रव्यगुणः रसवर्ग २४ : १-६]

**Astringent taste**

Astringent taste is drying, *stambhana* (which causes retention), constipative, healing and *pīḍana* (which causes pain). It

alleviates vitiation of *kapha*, blood and *pitta*. It is un-unctuous, cooling and heavy.

॥ इति षड्रसाः ॥

Thus ends the section dealing with the attributes of the six tastes.

## NOTES AND REFERENCES

1. पक्त्वा इति द्वितीयपुस्तके पाठः ।
2. परः इति द्वितीयपुस्तके पाठः ।
3. लघुर्व्यापी इति द्वितीयपुस्तके पाठः ।
4. शुक्लः विबंधानाहदृष्टिहा इति द्वितीयपुस्तके पाठः ।
5. रसः इति आकरे पाठः ।
6. रुच्योऽग्निपित्तकृच्छेत्ता तीक्ष्णः शोषी कटुः कटुः इति आकरे पाठः ।
7. कफपित्तविषक्लेदिकडूकुष्ठज्वरापहः इति आदर्शपुस्तके पाठः ।
8. शीतो लघुस्तिक्तः इति आकरे पाठ. ।
   शीतलघु स्निग्धः इति चतुर्थपुस्तके पाठः ।
9. स्तम्भनः शोषी ग्राही इति आकरे पाठः ।
10. रोपणप्रीणनः इति चतुर्थपुस्तके पाठ. ।

# CHAPTER 23

'मंडस्तु त्रिविधो ज्ञेय एकद्वित्रिपरिस्रुत[1] ।

### *Maṇḍa*

*Maṇḍa* is prepared by filtering once, twice or three times. Thus, it is of three types.

लाजैर्भृष्टैरभृष्टैश्च तण्डुलै. परिसंस्कृतैः[2] ॥ १ ॥
चतुस्त्रिद्विगुणाम्भः स्यात् पूर्वः[3] पूर्वो लघुर्हितः ।

### *Lāja maṇḍa*

*Lāja maṇḍa* is prepared either after frying or without frying the *lājā* (fried paddy). Before preparing *lājā,* the rice should be made clean. Thereafter, for its preparation water is added four, three or two times. The former varieties are lighter than the latter ones.

लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः ॥ २ ॥

*Lāja maṇḍa* is wholesome for a person whose body is cleaned by the administration of elimination therapy. It is

carminative and a digestive stimulant.

वातानुलोमनो हृद्यः पिप्पलीनागरैर्युतः[4] ।

When added with *pippalī* and *nāgara* it helps in the elimination of *vāyu* through the downward tract. It is a cardiac tonic.

पाचनो दीपनश्चैव पित्तश्लेष्मानिलापहः ॥ ३ ॥
शूलानाहविबन्धघ्नो **धान्यमण्डः**[5] प्रकीर्तितः ।

*Dhānya maṇḍa*

*Dhānya maṇḍa* is carminative, digestive stimulant and alleviator of *pitta, kapha* and *vāyu.* It cures *śūla* (colic pain), *ānāha* (flatulence) and *vibandha* (constipation).

[6]वाते वा सकफे पित्ते सामे वा तरुणज्वरे ॥ ४ ॥

**वाट्यमंडं** प्रशसन्ति पटोलमगधान्वितम् ।
[वाट्यमडो यवैर्भृष्टैर्[7]लाजमडस्तु शालिभिः] ॥ ५ ॥

*Vāṭya maṇḍa*

*Vāṭya maṇḍa* mixed with *paṭola* and *magadhā* is useful in the aggravation of *vāyu, kapha* and *pitta,* in *āma* and in the beginning stage of *jvara* (fever).

*Vāṭya maṇḍa* is prepared by fried barley and *lāja maṇḍa* is prepared by fried *śāli.*

रक्तशाल्यादिभिर्धान्यैर्[8]मण्डो मधुरशीतलः ।
श्रेष्ठो[9] संतर्पणो बल्यो रक्तपित्तप्रसादनः[10] ॥ ६ ॥

***Raktaśāli maṇḍa***

The *maṇḍa* prepared of red variety of *śāli* etc., is sweet and cooling. It is the most wholesome, refreshing and strength

promoting. It alleviates *rakta pitta* (a disease characterised by bleeding from different parts of the body).

सुतण्डुलानां प्रसृतिद्वयं च तदर्द्धमुद्गाः कटुकत्रयं च ।[11]
कुस्तुम्बरीसैन्धवहिंगुतैलमेभिश्च सर्वैः क्रियते च मण्डः ॥७॥

क्षुद्बोधनो बस्तिविशोधनश्च प्राणप्रदः शोणितवर्धनश्च ।

ज्वरापहारी कफपित्तहंता वायुं जयेदष्टगुणो हि **मण्डः** ॥८॥

*Aṣṭaguṇa maṇḍa*

The *maṇḍa* prepared of two *prasṛti* of good quality rice and half in quantity of *mudga* mixed with *kaṭutraya* (*śuṇṭhī, pippalī* and *marica*), *kustumbarī, saindhava, hiṅgu* and oil is called *aṣṭaguṇa maṇḍa*.

It promotes appetite and cleanses the urinary bladder. It promotes vitality and blood formation. It cures *jvara* (fever) and aggravation of *kapha, pitta* as well as *vāyu*.

हस्तवस्त्रकृतो मंड. सैन्धवेनावचूर्णितः ।[12]
रक्तपित्तहरो ग्राही ज्वरातीसारनाशनः ॥ ९ ॥

**Miscellaneous**

The *maṇḍa* prepared with the help of the hands and a piece of cloth and sprinkled with the powder of *saindhava* cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is constipative and cures *jvara* (fever) and *atisāra* (diarrhoea).

मण्डस्तु दीपयत्यग्निं वातं चाप्यनुलोमयेत् ।

मृदुकरोति स्रोतांसि स्वेदं संजनयत्यपि ॥ १० ॥

*Maṇḍa* stimulates the power of digestion and helps in the elimination of *vāyu* through the downward tract. It softens the channels of circulation and produces sweating.

13
लंघितानां विरिक्तानां जीर्णे स्नेहे च तृष्यताम् ।

दीपनत्वाल्लघुत्वाच्च मंड: स्यात्प्राणधारण: ॥११॥'

[माधवद्रव्यगुण· मण्डवर्ग २५ : १-११]

After fasting, purgation, and digestion of the potion given for oleation therapy, if the patient feels thirsty, then *maṇḍa* helps in the sustenance of his life because it is a digestive stimulant as well as light.

॥ इति मण्डवर्गः ॥

Thus ends the group dealing with different types of *maṇḍa*.

## NOTES AND REFERENCES

1. एकद्वित्रिपरिस्रुत इति आकरे चतुर्थपुस्तके च पाठ: ।
2. परिसंस्कृत. इति आकरे पाठ· ।
3. पूर्वपूर्वो इति आकरे पाठ: ।
4. पिप्पलीनागरान्वित· इति आकरे पाठ: ।
5. वाट्यमंड: इति आकरे पाठ· ।
6. वातकफे इति आकरे पाठ: ।
7. 'वाट्यमडो····शालिभि ' पाठोऽयं द्वितीयचतुर्थपुस्तकयोर्नोपलभ्यते ।
8. रक्तशाल्यादिभिर्धान्यैर्मण्डा इति आकरे पाठ: ।
9. श्रेष्ठा: संतर्पणा बल्या रक्तपित्तप्रसादन: इति चतुर्थपुस्तके पाठ. ।
10. रक्तपित्त प्रसादना: इति आकरे पाठ: ।
11. हि इति आकरे पाठ: ।
    स इति चतुर्थपुस्तके पाठ: ।
12. ज्वरातीसारवारण: इति आकरे चतुर्थपुस्तके च पाठ· ।
13. तृष्यती इति आदर्शपुस्तकेषु पाठ: ।

# CHAPTER 24

1
"क्षुत्तृष्णानिलदौर्बल्यकुक्षिरोगविनाशिनी ।

स्वेदाग्निजननी पेया वातवर्चोऽनुलोमनी ॥ १ ॥

*Peyā*

*Peyā* cures *kṣut* (morbid hunger), *tṛṣā* (morbid thirst), vitiation of *vāyu*, weakness and diseases of the pelvic region. It causes sweating, stimulates the power of degestion and helps in the elimination of *vāyu* and stool through the downward tract.

'**विलेपी** तर्पणी हृद्या ग्राहिणी बलवर्धिनी ।

पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा ॥ २ ॥'

[सुश्रुत: सूत्र ४६ : ३४२-३४३]

*Vilepī*

*Vilepī* is refreshing, a cardiac tonic, constipative, strength promoting, wholesome, sweet in taste, light and a digestive stimulant. It cures *kṣut* (morbid hunger) and *tṛṣā* (morbid thirst).

तृष्णापनयनी लघ्वी दीपनी बस्तिशोधनी ।

ज्वरे चैवातिसारे च **यवागूः** सर्वदा हिता ॥" ३ ॥

[माधवद्रव्यगुणः अन्नवर्ग २६ : १-३]

*Yavāgū*

*Yavāgū* cures *tṛṣṇā* (morbid thirst). It is light and a digestive stimulant. It cleanses the urinary bladder. In *jvara* (fever) and *atisāra* (diarrhoea), *yavāgū* is always useful.

यवागूनामपि भेदः [**पायस**][2]**कृशरादयः** ।

**क्षैरेयः पायसः** क्षीरापरमान्नमुदाहृतम् ॥ ४ ॥

**Variety**

*Pāyasa*, *kṛśarā* etc., are the different varieties of *yavāgū*. *Pāyasa* is also called *kṣaireya*, *kṣīrā* and *paramānna*.

"यैर्यैरेवौषधगुणैर्यवागूः साधु साधिता ।

तास्तानेवौषधगुणान्पुष्णाति विधियोजिता ॥ ५ ॥

*Yavāgū* is prepared by adding different drugs and when properly prepared *yavāgū* enhances the properties of these drugs.

विष्टम्भी **पायसो** बल्यो मेदःकफकरो गुरुः ।

*Pāyasa*

*Pāyasa* is wind forming and strength promoting. It increases fat and *kapha*. It is heavy.

कफपित्तकरी बल्या **कृशरा**निलनाशिनी ॥ ६ ॥

*Kṛṣarā*

*Kṛśarā* aggravates *kapha* and *pitta*. It promotes strength and alleviates *vāyu*.

सौमनस्यं बलं पुष्टिमुत्साहं तर्पणं सुखम् ।
3
स्वादु संजनयत्यन्नमस्वादु च विपर्ययम् ॥ ७ ॥

*Anna*

Delicious variety of *anna* promotes pleasure, strength, corpulence, enthusiasm, refreshment and happiness.

The *anna* which is not delicious acts other wise.

4 5
सुधौततण्डुलः स्विन्नः प्रस्रुतो विशदो लघुः ।

If the rice is washed well, boiled and after boiling the residual water is removed then it becomes *viśada* (non-slimy) and light.

सोष्णश्चैवौदनः पथ्यो विपरीतस्तु दोषकृत् ॥ ८ ॥

The *odana*, which is hot, is wholesome; otherwise it is harmful.

6
भृष्टतण्डुलकश्चैकद्वित्रिवारपि परिस्रुतः ।
7 8
यथोत्तरं लघुर्वह्निमोदनो दीपयत्यपि ॥ ९ ॥

If the fried rice is washed once twice or thrice, then the *odana* becomes progressively lighter and more stimulant of digestion.

स्नेहैर्मांसैः फलैः कंदैर्विदलाम्लैश्च संस्कृताः ।

गुर्वो बृंहणा वृष्या ये च क्षीरोपसाधिता. ॥ १० ॥

If the *anna* is prepared with fat, meat, fruit, rhizome, pulse, sour thing or milk, then it becomes heavy, nourishing and aphrodisiac.

9 10
अत्युष्णानि बलं घ्नन्ति शीतं शुष्कं च दुर्जरम् ।

अतिक्लिन्नं ग्लानिकरं दुर्जरं तण्डुलान्वितम् ॥ ११ ॥

*Anna*, which is exceedingly hot, reduces strength. If it is cold or dry then it becomes difficult of digestion. If it is exceedingly sticky, then it produces *glāni* (tiredness). If it contains unboiled rice then it is difficult of digestion.

शीतलं मधुरं साम्लं अर्शोघ्नं दीपनं परम् ।
श्रमघ्नं तर्पणं हृद्यं घोलभक्त रुचिप्रदम् ॥ १२ ॥

*Ghola bhakta*

*Ghola bhakta* (curd mixed rice) is cooling, sweet and sour. It cures *arśas* (piles). It is an excellent stimulant of digestion. It cures *śrama* (physical fatigue). It is refreshing, a cardiac tonic and appetiser.

शीतलं मधुरं रूक्ष श्रमघ्न तर्पणं परम् ।
11
लघु द्रुतविपाक च सद्योन्नं वारिभावितम् ॥ १३ ॥

*Vāryanna*

Freshly prepared rice soaked in water is cooling, sweet, un-unctuous, alleviator of fatigue, refreshing *par excellence*, light and easily digestible.

त्रिदोषकोपन रूक्ष मलकृन्मूत्रलं परम् ।
12
स्वेदमेद:कफोत्क्लेदि वार्यन्नं निशि संस्थितम् ॥१४॥"

[माधवद्रव्यगुण: अन्नवर्ग २६ : ४-१३]

If this prepared rice is soaked in water and kept over night, then it aggravates all the three *doṣas*. It is un-unctuous. It produces more of stool. It is a diuretic *par excellence*. It increases sweating, fat and *kapha*.

13
॥ इति पेयादिवर्ग: ॥

Thus, ends the group dealing with various types of *peyā* and allied preparations.

## NOTES AND REFERENCES

1. क्षुत्तृष्णाग्लानिदौर्बल्यकुक्षिरोगविनाशिनी इति आकरे पाठः ।
2. पाकक्कसरादयः इति द्वितीयपुस्तके पाठः ।
3. संजनयत्यम्लमस्वादु इति आदर्शपुस्तके पाठ. ।
4. विशुद्धतंडुल. इति द्वितीयपुस्तके पाठः ।
5. स्निग्धः इति द्वितीयपुस्तके आकरे च पाठः ।
6. भृष्टतण्डुलश्चैव द्वित्रिर्वापि इति आदर्शपुस्तके पाठः ।
7. यथोत्तरलघुवह्निमोदते इति आदर्शपुस्तकेषु पाठः ।
8. लघुर्बह्निमोदनी इति चतुर्थपुस्तके पाठः ।
9. अत्युष्णान्नं इति चतुर्थपुस्तके आकरे च पाठः ।
10. हन्ति इति चतुर्थपुस्तके आकरे च पाठः ।
11. सद्योऽन्नं इति आकरे पाठः ।
12. स्वेदभेदः इति आदर्शपुस्तकेषु पाठः ।
13 मण्डादिः इति द्वितीयपुस्तके पाठः ।
    इति अन्नवर्गः इति आकरे पाठः ।

# CHAPTER 25

“सुस्विन्नो निस्तुषो भृष्टः ईषत्**सूपो**[1] लघुर्हितः ।

[2]‘स्विन्न निःपीडितं शाकं हितं स्यात्स्नेहसंस्कृतम् ॥१॥”

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७-१]

*Sūpa*

The *sūpa* prepared of corn which is well steamed, dehusked and fried, is light and useful. If it is mixed with the juice extracted from steamed vegetables and with fat then also it is useful.

अस्विन्नस्नेहलवणमपीडितमतोन्यथा

If the *sūpa* is prepared of corn which is not steamed and which is not mixed with fat, salt and juice of vegetables, then it is not useful.

निस्तुषैर्भर्जितै· सम्यक् यवै सचणकैः कृताः ।

**सक्तवः** शर्करासर्पिःयुक्ता ग्रीष्मेतिपूजिता ॥ २ ॥

### *Yava saktu & Caṇaka saktu*

*Saktu* prepared of fried *yava* or *caṇaka* along with their husk is very useful in summer if taken along with sugar and ghee.

**सक्तवः शालिसंभूता** वह्निदा लघवो हिमाः ।
मधु[राः][3] ग्राहिणो हृद्याः कषाया रुचिशुक्रदाः[4] ॥३॥'

### *Śāli saktu*

*Saktu* prepared of *śāli* is digestive stimulant, light, cooling, sweet, constipative, cardiac tonic, astringent, appetiser and promoter of semen.

मधुराः[5] लघव· शीताः सक्तवः शालिसंभवाः ।
ग्राहिणो रक्तपित्तघ्नास्तृष्णाछर्दि[6]ज्वरापहाः ॥ ४ ॥

**Another view**

*Saktu* prepared of *śāli* is sweet, light, cooling and constipative. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) *tṛṣṇā* (morbid thirst), *chardi* (vomiting) and *jvara* (fever).

छर्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहा· ।
**लाजानां सक्तवः** क्षौद्रसितायुक्ता विशेषतः ॥ ५ ॥

### *Lāja saktu*

The *saktu* of *lājā* cures *chardi* (vomiting), *atīsāra* (diarrhoea), *tṛṭ* (morbid thirst), *dāha* (burning syndrome), *viṣa* (poisoning), *mūrchā* (fainting) and *jvara* (fever). It becomes more effective in these conditions when this *saktu* is mixed with honey and sugar.

लेखना दीपना रूक्षा वातला **यवसक्तवः** ।
कफामयप्रशमनाः वातवर्चोनुलोमना· ॥ ६ ॥

*Yava saktu*

The *saktu* of *yava* is depleting, digestive stimulant and un-unctuous. It aggravates *vāyu* and cures diseases caused by *kapha.* It helps in the elimination of *vāyu* and stool through the downward tract.

7
पीताः सतर्पणा हृद्याः सद्यो हि बलवर्धनाः ।
वातातपाध्वव्यायामकर्शितानां श्रमापहा ॥ ७ ॥

When used as a drink, *yava saktu* is refreshing and a cardiac tonic. It promotes strength instantaneously. It alleviates the fatigue of persons who are emaciated by exposure to wind, sun, walking and exercise in excess.

गुर्वी पिंडी खरात्यर्थं लघ्वी सैव विपर्ययात् ।

If it is used in the form of a bolus (*piṇḍī*) then it is very heavy and un-unctuous (*khara*); otherwise it is light.

सक्तूनामाशु जीर्येत मृदुत्वा**दवलेहिका** ॥ ८ ॥

*Avalehikā*

*Avalehikā* prepared of *saktu* gets digested early because of its softness.

सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः ।
8 9
नातिद्रवो नातिसान्द्रो **मंथ** इत्यभिधीयते ॥ ९ ॥

*Mantha*

*Saktu* kneaded with ghee and mixed with water is called *mantha.* It is neither very thick nor very thin.

**मंथः** **सद्योबलकरः** पिपासादाहनाशनः ।
10
साम्लस्नेहगुडो मूत्रकृच्छ्रोदावर्तनाशनः ॥ १० ॥

शर्करेक्षुमधुद्राक्षायुक्तः पित्तविकारनुत् ।

द्राक्षामधुसमायुक्तः कफरोगहरः स्मृतः ॥ ११ ॥
वर्गत्रयेणोपहितो मलदोषानुलोमनः ।

*Mantha* promotes strength instantaneously and cures *pipāsā* (morbid thirst) and *dāha* (burning syndrome). Along with sour things, fat and *guḍa*, it cures *mūtra kṛcchra* (dysuria) and *udāvarta* (flatulence). Along with sugar, sugarcane juice, honey and *drākṣā*, it cures diseases caused by *pitta*. Along with *drākṣā* and honey, it cures diseases caused by *kapha*. Along with the three groups of drugs, it helps in the elimination of stool and *doṣas* through the downward tract.

धानोलंबाः सुलघवः कफमेदोविशोषिणः ॥ १२ ॥

*Dhānolamba*

*Dhānolamba* is very light and it reduces *kapha* as well as fat.

लाजा[11] तृट्छर्द्यतीसारमेदोमेहकफच्छिदः ।
कासपित्तप्रशमना दीपना लघवो हिमाः ॥ १३ ॥

*Lājā*

*Lājā* cures *tṛṭ* (morbid thirst), *chardi* (vomiting), *atīsāra* (diarrhoea), adiposity, *meha* (obstinate urinary disorders including diabetes) and aggravation of *kapha*. It cures *kāsa* (bronchitis) and alleviates *pitta*. It is a digestive stimulant, light and cooling.

पृथुका गुरवः[12] स्निग्धा बृंहणाः कफवर्धनाः ।
बल्या सक्षीरभावित्वाद्वातघ्ना भिन्नवर्चसः ॥ १४ ॥

*Pṛthukā*

*Pṛthukā* is heavy, unctuous and nourishing. It aggravates *kapha* and promotes strength. When impregnated with milk, it alleviates *vāyu* and works as a laxative.

धाना विष्टंभिनी रूक्षा तर्पणी लेखनी गुरुः ।

*Dhānā*

*Dhānā* is wind forming, un-unctuous, refreshing, depleting and heavy.

विष्टंभी दुर्जरं रूक्ष शीतलं वातकोपनम् ।

बद्धवर्चस्करं चैव भृष्टं निष्पावजं फलम् ॥ १५ ॥

*Niṣpāva*

The fried fruit of *niṣpāva* is wind forming, difficult of digestion, un-unctuous, cooling, aggravator of *vāyu* and constipative.

संधानकृत्पिष्टमात्र[13] तंडुलः कृमिमेहकृत् ।

*Taṇḍula piṣṭa*

All types of pastries prepared of *taṇḍula* cause *sandhāna* (union of tissue elements), *kṛmi* (parasitic infection) and *meha* (obstinate urinary disorders including diabetes).

सुदुर्जर.[14] स्वादुरसो बृंहणस्तण्डुलो नवः ॥ १६ ॥

If freshly harvested *taṇḍula* is used for this purpose, then it is extremely difficult of digestion. It is sweet in taste and nourishing.

[इति सूपादिवर्गः]

Thus ends the group dealing with different types of *sūpa* and allied preparations.

## NOTES AND REFERENCES

1. भृष्ट इति आकरे पाठः ।
2. अन्नभि पिष्टितं इति चतुर्थ पुस्तके पाठः ।

3. मधु इति चतुर्थपुस्तके पाठः ।
4. स्विन्नं····रुचि शुक्रदा पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
5. मधुरा लघवः इति आदर्शपुस्तके पाठः ।
6. रक्तपित्तघ्नास्तृष्णाच्छर्दिज्वरापहाः इति आकरे पाठः ।
7. सद्योबलविवर्धनाः इति आकरे पाठः ।
8. नातिद्रवा इति आकरे पाठः ।
9. नातिसान्द्रा इति आकरे पाठः ।
10. सान्द्रस्नेहगुडो इति द्वितीयपुस्तके पाठः ।
11. कासपित्तोपशमना इति आकरे पाठः ।
12. बल्याः सक्षीरभावात्ते वातघ्ना इति आकरे पाठः ।
13. संधानकृत्पिष्टमाष इति चतुर्थपुस्तके पाठः ।
संधानकृत्पिष्टमाषं इति आकरे पाठ. ।
14. स्वादुरच्छो इति आकरे पाठः ।

# CHAPTER 26

स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह ।
सिद्धं[1] मांसं हितं बल्यं बृंहणं रोचनं लघु ॥ १ ॥

*Māṁsa*

Meat boiled with fat, milk, *dhānyāmla*, *phalāmla* and *kaṭuka* (spices having pungent taste) is useful, strength promoting, nourishing, appetiser and light.

तदेव गोरसादानं[2] सुरभिद्रव्यसंस्कृतम् ।
विद्यात्पित्तकफोत्क्लेदि बलमांसाग्निवर्धनम् ॥ २ ॥

If meat is prepared with milk and added with fragrant spices, then it reduces (?) *pitta* as well as *kapha* and increases strength, muscle tissue and the power of digestion.

परिशुष्कं स्थिरं स्निग्धं तर्पणं प्रीणनं गुरु[3] ।
रोचनं बलमेधाग्निमांसौजःशुक्रवर्धनम् ॥ ३ ॥

Dried meat is *sthira* (which produces stability), unctuous,

refreshing, pleasing, heavy and appetiser. It promotes strength, intellect, digestive power, muscle tissue, *ojas* and semen.

[4] तदेव लुप्तभृष्टत्वादुलाप्तमिति पावकाः ।
परिशुष्कं गुणैर्युक्तं वह्नेः पथ्यतमं मतम् ॥ ४ ॥

If the meat is burnt on the fire and then fried, then it is called *ulāpta.* It shares all the properties of dried meat. In addition, it is the most wholesome as a promoter of digestion.

तदेव शूलिकं प्रोक्तमगारपरिपाचितम् ।
ज्ञेयं गुरुतर किञ्चित्प्रदिष्ट[5] गुरुपाकतः ॥ ५ ॥

If the meat is burnt over charcoal then it is called *śūlika.* It is heavier because it gets excessively burnt.

[6] उत्प्लुष्टं भर्जितं पिष्टं प्रतप्तं कटुपाचितम् ।
परिशुष्कं प्रदिग्धं च शूल्य यच्चान्यदीदृशम् ॥ ६ ॥
'दीप्ताग्नीनां सदा पथ्य खानिष्कं तु परं गुरु ।

Different preparations of meat viz., *utpluṣṭa* (burnt), *bharjita* (fried), *piṣṭa* (made to a paste), *pratapta* (heated), *kaṭu-pācita* (boiled with pungent spices), *pariśuṣka* (dried), *pradigdha* (excessively burnt), *śūlya* (burnt over charcoal) and similar other preparations are always wholesome for persons having strong digestive power. *Khaniṣka* type of meat preparation is exceedingly heavy.

मांसं यत्तैलसिद्ध तु वीर्योष्ण पित्तकृद्गुरु[7] ॥ ७ ॥'

Meat prepared in oil is hot in potency, aggravator of *pitta* and heavy.

लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनम् ।
अनुष्णवीर्यं पित्तघ्नं मनोज्ञं घृतसाधितम्[8] ॥ ८ ॥

Meat prepared in ghee is light, digestive stimulant, cardiac tonic, appetiser and promoter of eyesight. It is not hot in potency. It alleviates *pitta* and is pleasing to the mind.

प्रीणनः सर्वधातूनां विशेषान्मुखशोषिणाम् ।
क्षुत्तृष्णापहरः[9] श्रेष्ठः[10] **सौरावः**[11] स्वादुशीतलः ॥ ९ ॥

*Saurāva* type of meat nourishes all the tissue elements. It is specially useful for patients having *mukhaśoṣa* (dryness of mouth). It is an excellent curative for *kṣut* (morbid hunger) and *tṛṣṇā* (morbid thirst). It is delicious and cooling.

प्रीणनः प्राणजननः श्वासकासक्षयापहः[12] ।
वातपित्तश्रमहरो हृद्यो **मांसरसो** मतः ॥ १० ॥

*Māṁsa rasa*

Meat soup is refreshing and vitalizing. It cures *śvāsa* (asthma), *kāsa* (bronchitis) and *kṣaya* (consumption). It alleviates *vāyu*, *pitta* and fatigue. It is cardiac tonic.

स्मृत्योजःस्वरहीनानां ज्वरक्षीणक्षतौजसाम् ।
भग्नविश्लिष्टसन्धीनां कृशानामल्परेतसाम् ॥ ११ ॥
आप्यायनः संहननः शुक्रदो बलवर्धनः ।

It is useful for persons having less of memory and *ojas*, imperfect voice, *jvara* (fever), *kṣīṇa* (emaciation), *kṣata* (phthisis) and broken and dislocated joints. It is also useful for thin persons and those having less of semen. It causes nourishment, *saṁhanana* (joining of tissues) and promotes semen as well as strength.

सदाडिमयुतो वृष्यः संस्कृतो दोषनाशनः ॥ १२ ॥

The meat soup prepared along with *dāḍima* is aphrodisiac and alleviator of *doṣas*.

यन्मांसमुद्धृतरस न तत्पुष्टिबलप्रदम् ।
विष्टम्भि दुर्जरं रूक्षं विरसं मारुतावहम्[13] ॥ १३ ॥

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : २१-२६]

The meat, from which juice is extracted, does not produce nourishment and strength. It is wind forming, difficult of digestion, ununctuous and aggravater of *vāyu.*

दीप्ताग्नीनां सदा शस्तमामिषं[14] परमं गुरु[15] ।

Meat is always useful for persons having a strong power of digestion. It is very heavy.

मांसं निरस्थि[16] सुस्विन्नं[17] पुनर्दृषदि चूर्णितम् ॥ १४ ॥
पिप्पलीमरिचशुण्ठी[18]हिंगुसर्पिःसमन्वितम् ।
ऐकध्यं[19] साधयेत् सम्यक्[20] तत् सोरावमिति स्मृतत् ॥१५॥

*Sorāva*

The meat which is free from bones, which is triturated in a pastle and mortar after proper boiling and which is prepared by boiling together with *pippalī, marica, śuṇṭhī, hiṅgu* and ghee is called *sorāva.*

॥ इति मांसादिप्रकारः ॥

Thus ends the group dealing with various types of meat and their different preparations.

## NOTES AND REFERENCES

1. स्निग्धं इति आकरे पाठः ।
   सिक्तं इति द्वितीयपुस्तके पाठः ।

2. गोरसान्तं तु इति आकरे पाठः ।
3. अस्य श्लोकस्यानन्तरम् 'सुरभिद्रव्यसंस्कृतं विद्यात्पित्तकफोत्क्लेदि बलगुरु' पाठोऽय चतुर्थपुस्तके अधिकं उपलभ्यते ।
4. तदेवोलुप्तपिष्टत्वादुलुप्तमिति इति आकरे पाठः ।
5. किंचित् प्रदिग्धं इति आकरे पाठः ।
6. उलुप्तं इति आकरे पाठः ।
7. दीप्ताग्नीनां···पित्तकृद्गुरु पाठोऽय द्वितीयपुस्तके नोपलभ्यते ।
8. अस्य श्लोकस्यानन्तरं 'अथ मांसप्रकारा :—
तलितं भर्जितं स्विन्न प्रलेहस्रवितं रसः ।
[पोषितं] च तथा शूल्य पूरणं पुटपाकजं ।
अमीप्रकाराः मांसस्य सक्षेपात्परिकीर्तिताः ।
तलितं मासं हि बल्य रुच्य पूरणं पित्तानिलापह ।
सुस्वादु मधुर पाके किंचित्कफकर गुरु ।
भर्जितं तत्सुधातुल्यं [रुच्य] वह्निकरं लघु ।
स्विन्न मांसं बलं वीर्यं विदधाति रुचिमनाक् ।
वातं पित्त कफं हृति प्रदीपयति चानल ।
प्रलेहस्रावितं बल्य रोचनं दीपन गुरु ।
मांसाग्निवर्द्धन पित्तकफोद्रेकि विशेषत. ।
पेषित पाचित मासं सुस्वादु लघु दीपनम् ।
बल्यं सुरुचिकृत्प्राणप्रदं दोषत्रयापहं ।
तत्रापि जांगलं श्रेष्ठ श्रेष्ठं तत्रापि पक्षीणाम् ।
उष्णे स्नेहो निशाहिंगुलवंगकैला [धान्यक-]
जीरार्द्रकनागराणि अम्लोषणं सैंधवचूर्ण युक्तां ।
उपस्कराः संस्कृता ये फलस्य ।
एलालवंगकर्पूरमरिचादि विनिर्मितं ।
[वर्ण] मुद्धलनायोक्तं पाचकर्मविचक्षणैः ।
अस्य वर्णस्य करणे कुंकुम रक्तचन्दनम् ।
चूर्णं च यत्र यद्युक्तं तत्र तत्संप्रयोजयेत् ।
धुयोऽगुरु कृतो यः किंवा रामठशलाकाग्रथित शुद्धं पललं साज्यसैन्धवम् ।
वह्नौ विधूमसे सपक्व शूल्यमुक्तं मनीषिभिः ।
शूल्यं बल्यं सुधातुल्यं पलं वह्निकरं लघु ।

कफपित्तहरं प्रोक्तं विशेषाद्रुचिकारकं ।
मासंस्विन्नं सूक्ष्मकृतं पिष्ट्वा सदुपस्करां धत्ते ।
तप्तेन्धनभृष्टं पूरण प्रोच्यते बुधैः ।
मांसपूरणक रुच्यं बल्य पुष्टिकर परम् ।
वातपित्तहरं वृष्यं वह्निमांद्यकफप्रणुत् ।
सूक्ष्मकृत पल पत्रैः छादित वेष्टित मृदा ।
पक्व सोपस्कर यत्र विज्ञेय पुटपाकजं ।
पुटपाकेन यत्कृत तन्मांसं पाचक पर ।
सोष्मं तद्गुणवद्वेद्य शीतं शूष्क च दुर्ज्जरं ।
समितानिर्मितं पूर्ण पूरणे तद्घृते पुनः ।
भृष्टं श्रृगाटकाकारं तत्स्यात्पूरणपूरित ।
चक्षुष्यं बृंहण वृष्यं वातपित्तहरं गुरु ।
अतीव रुचिकृत् बल्यं भवेत्पूरणपूरितं' ।
वहुप्रमादपूर्णः पाठोऽयं चतुर्थपुस्तके अधिकं उपलभ्यते ।

9. क्षुत्तृष्णापहः इति आकरे पाठः ।
10. शान्तः इति द्वितीयपुस्तके पाठः ।
11. शौरावः इति आदर्शपुस्तके पाठः ।
12. अस्य श्लोकस्यानन्तरम् कफघ्नो दीपनो हृद्यः शुद्धानां व्रणनाशनः पाठोऽयं माधवद्रव्यगुणे अधिकमुपलभ्यते ।
13. मारुतापहम् इति आकरे पाठः ।
14. शस्तास्वाणिस्तु इति द्वितीयपुस्तके पाठः ।
15. दीप्ताग्नीना ·····गुरुः पाठोऽय चतुर्थपुस्तके नोपलभ्यते ।
16. चास्थि च इति द्वितीयपुस्तके पाठः ।
17. सुस्निग्धं इति द्वितीयपुस्तके पाठः ।
18. शुण्ठिहिंगुजीरसमन्वितम् इति द्वितीयपुस्तके पाठः ।
शुण्ठिसैंधवेनसमन्वितम् इति चतुर्थपुस्तके पाठः ।
19. एकत्र इति द्वितीयपुस्तके पाठः ।
एकस्थं इति चतुर्थपुस्तके पाठः ।
20. सौरावमिति इति द्वितीयपुस्तके पाठः ।

# CHAPTER 27

'कफघ्नो दीपनो हृद्यः शुद्धानामपि दोषहृत्[1] ।
उक्तः पथ्यतमश्चापि मुद्गयूषः[2] कृताकृतः ॥ १ ॥

*Mudga yūṣa*

*Mudga yūṣa* alleviates *kapha*, stimulates digestion and tones up the heart. It helps in the elimination of *doṣas* even for persons whose bodies are free from *doṣas* by the administration of elimination therapies (?). It is wholesome par excellence. It is of two types viz., *kṛta* (which is fried with ghee etc.,) and *akṛta* (which is not fried with ghee etc.,).

स तु दाडिममृद्वीकायुक्तः स्याद्रागषाडवः ।
स वृष्यो[3] लघुपाकश्च दोषाणामविरोधकृत्[4] ॥ २ ॥'

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : २९-३१]

*Rāga ṣāḍava*

If *mudga yūṣa* is added with *dāḍima* and *mṛdvīkā* then it is called *rāga ṣāḍava*. It is aphrodisiac and light for digestion. It does not aggravate *doṣas*.

[5] 'मसूरमुद्गगोधूमकुलत्थलवणैः कृतः ।
कफपित्ताविरोधी स्याद्वातव्याधौ प्रशस्यते ॥ ३ ॥

The *rāga ṣāḍava* prepared of ***masūra***, ***mudga***, ***godhūma***, ***kulattha*** and salt does not aggravate *kapha* and *pitta*. It is extremely useful in diseases caused by *vāyu*.

मृद्वीकादाडिमयुतः स चाप्युक्तोऽनिलार्दितः[6] ।
रोचनो दीपनो हृद्यो लघुपाक्युपदिश्यते ॥ ४ ॥

The *rāga ṣāḍava* prepared of *mṛdvīkā* and *dāḍima* also alleviates *vāyu*. It is appetiser, digestive stimulant, cardiac tonic and *laghu pāki* (which is easy for digestion).

**पटोलनिम्बूयूषौ** तु कफमेदोविशधनौ ।
पित्तघ्नौ दीपनौ हृद्यौ क्रिमिकुष्ठज्वरापहौ ॥ ५ ॥

*Paṭola yūṣa* **and** *Nimbū yūṣa*

The *yūṣa* prepared of *paṭola* and *nimbū* cleanses *kapha* and *medas* (fat). It alleviates *pitta*. It is digestive stimulant and cardiac tonic. It cures *krimi* (parasitic infection), *kuṣṭha* (obstinate skin diseases including leprosy) and *jvara* (fever).

श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्ति **मुलकयूषस्तु** कफमेदोगलग्रहान् ॥ ६ ॥

*Mūlaka yūṣa*

The *yūṣa* of *mūlaka* cures *śvāsa* (asthma), *kāsa* (bronchitis), *pratiśyāya* (chronic rhinitis), *praseka* (excessive salivation), *arocaka* (anorexia) and *jvara* (fever). It reduces *kapha* and *medas* (fat). It also cures *gala graha* (obstruction in throat).

**कुलत्थयूषो**ऽनिलहा शर्कराश्मरिनाशनः ।
तूनीप्रतूनीकासार्शोगुल्ममेहकफापहः ॥ ७ ॥

*Kulattha yūṣa*

The *yūṣa* of *kulattha* alleviates *vāyu*. It cures *śarkarā* (gravels in the urine), *aśmari* (stone in urinary tract), *tūnī* (a disease characterised by acute pain in intestine, anus and phallus), *pratūnī* (a variety of *tūnī* in which pain starts from anus and moves to the intestine), *kāsa* (bronchitis), *arśas* (piles), *gulma* (phantom tumour), *meha* (obstinate urinary disorders including diabetes) and aggravation of *kapha*.

यवकोलकुलत्थानां मुद्गमूलकशुंठयोः ।
[7] एकैकमुष्टिमादाय पचेदष्टगुणे जले ॥ ८ ॥
पञ्चमुष्टिक इत्येष वातपित्तकफापहः[8] ।
शस्यते[9] गुल्मशूले सा कासे श्वासे ज्वरे क्षये ॥ ९ ॥

*Pañca muṣṭika yūṣa*

*Pañca muṣṭika yūṣa* is prepared by taking one *muṣṭi* (handful) of each of *yava*, *kola*, *kulattha*, *mudga*, *mūlaka* and *śuṇṭhī* (instead of five, six items are included in the text) and boiling them in eight times of water. It alleviates *vāyu*, *pitta* and *kapha* and is useful in *gulma* (phantom tumour), *śūla* (colic pain), *kāsa* (bronchitis), *śvāsa* (asthma), *jvara* (fever) and *kṣaya* consumption).

मुद्गामलाभ्यां यवदाडिमाभ्यां कर्कन्धुना[10] मूलकशुंठकेन [?] ।
शुण्ठीकणाभ्यां च कुलत्थकेन यूषो नवांगो कफरोगहन्ता ॥ १० ॥

*Navāṅga yūṣa*

*Navāṅga yūsa* is prepared of *mudga*, *āmalaka*, *yava*, *dāḍima*, *karkandhu*, *mūlaka*, *śuṇṭhī*, *kaṇā* and *kulattha*. This cures diseases caused by *kapha*.

दाडिमामलकैर्यूषो हृद्यः संशमनो लघुः ।
प्राणाग्निजननो मूर्च्छा[11]मेदोघ्नः पित्तवातजित् ॥११॥

**Other varieties**

The *yūṣa* prepared of *dāḍima* and *āmalaka* is cardiac tonic, alleviator of *doṣas*, light, vitalising and digestive stimulant. It cures *mūrcchā* (fainting) and *medas* (adiposity). It specifically alleviates *pitta* and *vāta*.

12
मुद्गामलकयूषश्च भेदी पित्तकफापहः ।

The *yūṣa* prepared of *mudga* and *āmalaka* is purgative and it alleviates *pitta* as well as *kapha*.

पंचकोलकुलत्थानां यूषः कंठ्योऽनिलापहः ॥ १२ ॥

The *yūṣa* prepared of *pañcakola* (*pippalī*, *pippalī mūla*, *cavya*, *citraka* and *nāgara*) and *kulattha* is a promoter of good voice and alleviator of *vāyu*.

यवमंडस्तु कथितो वातपित्तकफापहः ।
13
पाचनो दीपनश्चैव शूलानाहविबन्धनुत् ॥ १३ ॥

*Yava maṇḍa*

*Yava maṇḍa* alleviates *vāyu*, *pitta* and *kapha*. It is carminative and digestive stimulant. It cures *śūla* (colic pain), *ānāha* (flatulence) and *vibandha* (constipation).

सर्वधान्यकृतस्तद्वत् बृंहणः प्राणवर्धनः ।

*Sarva dhānya maṇḍa*

The *maṇḍa* prepared of all the types of *dhānya* is nourishing and vitalising.

14
खडकाम्बलिकौ हृद्यौ छर्दिवातकफे हितौ ॥ १४ ॥

*Khaḍa* **and** *Kāmbalika*

*Khaḍa* and *kāmbalika* are cardiac tonic. They are useful in *chardi* (vomiting) and aggravation of *vāyu* as well as *kapha*.

दधिमत्स्याम्लसिद्धस्तु यूष. काम्बलिकः स्मृतः ।

The *yūṣa* which is prepared by adding *dadhi*, *matsya* and articles having sour taste is called *kāmbalika*.

बल्यः कफानिलौ[15] हन्ति दाडिमाम्लोऽग्निदीपनः ॥१५॥

*Dāḍimāmla*

*Dāḍimāmla* promotes strength, alleviates *kapha* and *vāyu* and stimulates digestion.

धान्याम्लो दीपनो हृद्यः पित्तकृद्वातनाशनः ।

*Dhānyāmla*

*Dhānyāmla* is digestive stimulant, cardiac tonic, aggravator of *pitta* and alleviator of *vāyu*.

दध्यम्लः श्लेष्मलो बल्यः स्निग्धो वातहरो गुरुः ॥१६॥

*Dadhyamla*

*Dadhyamla* aggravates *kapha* and promotes strength. It is unctuous, alleviator of *vāyu* and heavy.

तक्राम्लः पित्तकृत्प्रोक्तो विषरक्तप्रदूषणः ।

*Takrāmla*

*Takrāmla* aggravates *pitta* and *viṣa* (poisoning). It vitiates blood.

[16]अस्नेहलवणं सर्वमकृतं कटुकैर्विना ॥ १७ ॥

विज्ञेयं कटुकस्नेहलवणैः [17]संस्कृतं कृतम् ।

*Kṛta* **and** *Akṛta yūṣa*

The *yūṣa* which is not mixed with fat, salt and pungent spices is called *akṛta*. *Kṛta yūṣa*, on the other hand, is prepared of pungent spices, fat and salt.

अथ गोरसधान्याम्लफलाम्लै [18]रचितं च यत् ॥ १८ ॥

यथोत्तरं लघु हितं संस्कृतासंस्कृतं तथा ।

**Other varieties**

The *yūṣas* prepared of milk, *dhānyāmla* and the *yūṣa* of sour fruits are progressively lighter. Whether fried or not they are useful.

तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम् ।
[19] शंडाकीति गुरूणि स्युः पित्तश्लेष्मकराणि च ॥१९॥'

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : ३३-४९]

*Śaṇḍākī*

*Śaṇḍākī* is prepared of oil cake, dry vegetables and germinated corns and cereals. They are heavy and they aggravate *pitta* as well as *kapha*.

लघवो बृंहणा वृष्या हृद्या रोचनदीपनाः ।

भ्रममृत्युतृषाछर्दिश्रमघ्ना रागषाण्डवाः ॥ २० ॥

*Rāga ṣāṇḍava*

*Rāga ṣāṇḍava* is light, nourishing, aphrodisiac, cardiac tonic, appetiser and digestive stimulant. It cures *bhrama* (giddiness), *mṛtyu* (apprehension of death ?), *tṛṣā* (morbid thirst), *chardi* (vomiting) and *śrama* (physical fatigue).

[20] 'रसाला रोचनी बल्या स्निग्धा वृष्या सुबृंहणी ।

*Rasālā*

*Rasālā* is an appetiser, strength promoting, unctuous, aphrodisiac and extremely nourishing. It causes oleation of the body.

[21] स्नेहनं गुडसंयुक्तं हृद्यं दध्यनिलापहम् ॥ २१ ॥

If prepared by adding *guḍa* and curd, then it is cardiac tonic and alleviator of *vāyu*.

गौडमम्लमनम्लं [22] च पानकं गुरु मूत्रलम् ।

*Pānaka*

*Pānaka* of *guḍa* (whether added with sour things or not) is heavy and diuretic.

तदेव खण्डमृद्वीकाशर्करासहितं पुनः ॥ २२ ॥
साम्लं सुतीक्ष्णं [23] सहिम पानक स्यान्निरत्ययम् ।

*Pānaka* prepared of *khaṇḍa, mṛdvīkā, śarkarā* and sour things is extremely sharp and cooling. It is not harmful.

मार्द्वीक तु श्रमहर मूर्च्छादाहज्वरापहम् ॥ २३ ॥

*Pānaka* prepared of *mṛdvīkā* alleviates *śrama* (physical fatigue) and cures *mūrchā* (fainting), *dāha* (burning syndrome) and *jvara* (fever).

परूषकाणां कोलानां हृद्य विष्टम्भि पानकम् ।

The *pānaka* prepared of *parūṣaka* and *kola* is cardiac tonic and wind forming.

द्रव्यसंयोगसंस्कारान् [24] ज्ञात्वा मात्रां च सर्वशः ।
पानकानां [25] यथायोग्यं गुरुलाघवमादिशेत् ॥ २४ ॥

Depending upon the ingredients and the method of preparation, the heaviness and lightness of a *pānaka* should be ascertained and their dose should be determined accordingly.

भक्ष्याः क्षीरकृता बल्या वृष्या [26] [हृद्याः] सुगन्धिनः ।
अदाहिनः [27] पुष्टिकरा [28] दीपना [29] वातनाशनाः ॥ २५ ॥

*Bhakṣya*

Different types of *bhakṣya* prepared of milk is strength promoting, aphrodisiac, cardiac tonic, fragrant, *adāhin* (which

does not produce burning sensation), digestive stimulant and alleviator of *vāyu*.

सद्यःप्राणकराः हृद्याः **घृतपूराः** कफावहाः[30] ।
वातपित्तहरा वृष्या गुरवो रक्तमांसदाः[31] ॥ २६ ॥'

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : ५०-५५]

*Ghṛta pūra*

*Ghṛta pūra* is instantaneously vitalising and a cardiac tonic. It aggravates *kapha* and alleviates *vāyu* as well as *pitta*. It is aphrodisiac, heavy and promoter of blood as well as muscle tissue.

[32]'वृष्यास्ते **गौडिका** भक्ष्या गुरवोऽनिलनाशनाः ।
विदाहिनः पित्तकरा[33] बृंहणाः कफवर्द्धनाः ॥ २७ ॥

*Guḍa bhakṣya*

The *bhakṣya* prepared of *guḍa* is aphrodisiac, heavy and alleviator of *vāyu*. It causes burning sensation and aggravates *pitta*. It is nourishing and aggravator of *kapha*.

**मधुशीर्षकसंयावाः**[34] **पूपा** ह्येते विशेषतः ।
गुरवो बृंहणाश्चैव **मोदकाश्**[35]चापि दुर्जराः[36] ॥ २८ ॥

*Madhu śīrṣaka* etc.

*Madhu śīrṣaka, saṁyāva* and *pūpa* are specially heavy and nourishing.

*Modaka* is difficult for digestion.

रोचनो दीपनः स्वर्यः पित्तघ्नः[37] पवनापहः ।
गुरुर्मिष्टतमश्चैव **सट्टकः** प्राणवर्धनः ॥ २९ ॥

## *Saṭṭaka*

*Saṭṭaka* is appetiser, digestive stimulant, promoter of good voice, alleviator of *pitta* as well as *vāyu*, heavy, extremely delicious and vitalising.

हृद्यः सुगन्धिर्मधुरः स्निग्धः श्लेष्मकरो गुरुः ।
पित्तापहस्तृप्तिकरो[38] बल्योऽभिष्यन्द उच्यते ॥ ३० ॥'
[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : ५७-६०]

## *Abhiṣyanda*

*Abhiṣyanda* is cardiac tonic, fragrant, sweet, unctuous, aggravator of *kapha*, heavy, alleviator of *pitta*, *tṛptikara* (which causes satisfaction) and promoter of strength.

'बृंहणा वातपित्तघ्नाः[39] बल्याः वृष्यास्तु[40] शालिजाः[41] ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥ ३१ ॥'
[सुश्रुतः सूत्र ४६ : ३९८-३९९]

## *Phenaka*

*Phenka* ètc. prepared of *śāli* rice are nourishing, alleviator of *vāyu* as well as *pitta*, strength promoting, aphrodisiac, cardiac tonic, extremely wholesome and light.

'मुद्गादिवेसवारैस्तु पूर्णा विष्टम्भिनो मताः ।
वेसवारैस्तु पिशितैः सम्पूर्णा[42] गुरुबृंहणाः ॥ ३२ ॥'

*Phenaka* prepared by filling with *vesavāra* of *mudga* etc. is wind forming. If it is filled with the *vesavāra* of meat, then it is heavy and nourishing,

·वेसवारो गुरु स्निग्धो[43] बलोपचयवर्धनः[44] ।

## *Vesavāra*

*Vesavāra* is heavy, unctuous and promoter of strength as

well as plumpness.

पललाः श्लेष्मजनना [45] शष्कुल्यः कफपित्तलाः ॥ ३३ ॥

*Palala* **and** *Śaṣkulī*

*Palala* aggravates *kapha*. *Śaṣkulī* aggravates *kapha* as well as *pitta*.

**पर्पटा** लघवो [46] रुच्याः लघिष्ठाः **क्षीरपर्पटी** ।

*Parpaṭa* **and** *Kṣīra parpaṭī*

*Parpaṭa* is light and appetiser. *Kṣīra parpaṭī* is light par excellence.

वीर्योष्णाः पैष्टिका [47] **भक्ष्याः** कषाया मृष्टमारुताः ॥३४॥'

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : ६३-६६]

'विष्टम्भिनः पित्तकराः श्लेष्मघ्ना भिन्नवर्चसः ।

*Paiṣṭika bhakṣya*

The *bhakṣya* prepared of pastes is hot in potency and astringent. It produces more of wind and causes flatulence. It aggravates *pitta* and alleviates *kapha*. It is laxative.

[48] **विरूढककृता भक्ष्या** गुरवो[49]ऽनिलपित्तलाः ॥ ३५ ॥'

विदाहोत्क्लेदजनना [50] रूक्षा दृष्टिप्रदूषणाः ।

*Virūḍhaka bhakṣya*

The *bhakṣya* prepared of germinated grains is heavy. It aggravates *vāyu* as well as *pitta* and produces a burning sensation as well as stickiness in the body. It is ununctuous and it vitiates eyesight.

फलमांसवसा[51]शाकपललक्षौद्रसंयुताः ॥ ३६ ॥

[52]भक्ष्या हृद्याश्च बल्याश्च गुरवो [53]बृंहणात्मकाः ।

**Another variety**

The *bhakṣya* prepared of fruit, meat, *vasā* (muscle fat), vegetables, oil cake and honey is a cardiac tonic, strength promoting, heavy and nourishing.

[54]गुरवस्तर्पणा हृद्याः [55]क्षीरेक्षुरसपूपकाः ।। ३७ ।।

*Pūpaka*

*Pūpaka* prepared of milk and sugar cane juice is heavy, refreshing and cardiac tonic.

सगुडाः [56]सतिलाश्चैव [57]सक्षीरक्षौद्रशर्कराः ।
भक्ष्या बल्याश्च वृष्याश्च परं तु गुरवः [58]स्मृताः ।।३८।।

**Other varieties of *bhakṣya***

The *bhakṣya* prepared of *guḍa*, *tila*, milk, honey and sugar is strength promoting, aphrodisiac and extremely heavy.

हृद्याः सुगन्धिनो [59]वृष्या लघवो घृतपाचिताः ।
वातपित्तहरा *बल्या वर्णदृष्टिप्रसादनाः ।। ३९ ।।

The *bhakṣya* prepared by frying with ghee is cardiac tonic, fragrant, aphrodisiac, light, alleviator of *vāyu* as well as *pitta* and promoter of strength, complexion as well as eyesight.

विदाहिनस्तैलकृताः गुरवः कटुपाकिनः ।
[60]उष्णा मारुतदृष्टिघ्नाः [61]पित्तरक्तप्रदूषणाः ।। ४० ।।

The *bhakṣya* prepared by frying with oil produces burning sensation. It is heavy, pungent in *vipāka* and hot. It reduces *vāyu* and eyesight and vitiates *pitta* as well as *rakta*.

फलमांसेक्षुविकृतितिलमाषेण [62]सस्कृताः ।

भक्ष्या बल्यास्तु गुरवो बृंहणा हृदयप्रियाः ॥ ४१ ॥

The *bhakṣya* prepared by adding fruit, meat, sugarcane products, *tila* and *māṣa* is strength promoting, heavy, nourishing and pleasing to the heart.

खर्परांगारपक्वास्तु[63] लघवो वातकोपनाः ।

The *bhakṣya* prepared by frying on a piece of earthen pot over charcoal is light and aggravator of *vāyu.*

सकिलाटादयो[64] भक्ष्या[65] गुरवः कफवर्धना ॥ ४२ ॥

The *bhakṣya* prepared of *kilāṭa* (a milk product) is heavy and aggravator of *kapha.*

कुल्माषा वातला रूक्षाः[66] गुरवो भिन्नवर्चसः[67] ।

*Kulmāṣa*

*Kulmāsa* aggravates *vāyu.* It is ununctuous, heavy and laxative.

द्रव्येण यद्गुणेनेह[68] यद्वीर्येणेह[69] साधिताः ।
तद्वीर्यास्तद्गुणाश्चैव भक्ष्याः ज्ञेयाः[70] चिकित्सकैः ॥४३॥'

[माधवद्रव्यगुणः पानभक्ष्यवर्ग २७ : ६७-७६]

**Miscellaneous**

A physician should know that the attributes and the potency of a type of *bhakṣya* is based on the attributes and potency of the ingredients by which it is prepared.

॥ इति यूषादिकः[71] ॥

Thus ends the group dealing with various types of *yūṣa* and allied food preparations.

## NOTES AND REFERENCES

1. शुष्कानामपि इति द्वितीयपुस्तके पाठः ।
   शुद्धाना व्रणिनामपि इति आकरे पाठः ।
2. अस्य श्लोकस्यानन्तरम् 'प्रीणनः प्राणजननः श्वासकासक्षयापहः' पाठोऽयं माधवद्रव्यगुणे अधिकमुपलभ्यते ।
3. रुचिष्यो इति आकरे पाठः ।
4. दोषाणामपि रोधकृद् इति आदर्शपुस्तकेषु पाठः ।
5. मसूरमुद्गगोधूमकुलत्थचणकैः इति आकरे पाठः ।
6. चाप्युक्तोऽनिलार्दिते इति आकरे पाठ. ।
7. एकैकां इति आकरे पाठः ।
8. वातपित्तकफे हितः इति आकरे पाठः ।
9. गुल्मशूलेषु इति आकरे पाठः ।
10. नवागः इति आकरे पाठः ।
11. कफवातजित् इति आकरे पाठः ।
12. मुद्गामलकयूषस्तु इति आकरे पाठः ।
13. शूलाध्मानविबंधनुत् इति चतुर्थपुस्तके पाठ. ।
14. खलकाम्बलिकौ आकरे चतुर्थपुस्तके च पाठः ।
15. कफानलौ इति आकरे पाठः ।
16. सस्नेहलवणं इति आदर्शपुस्तकेषु पाठः ।
17. संयुतं इति आकरे पाठः ।
18. रधितं इति आकरे पाठः ।
19. संडकिन्नी इति चतुर्थपुस्तके पाठः ।
20. च बृंहणी इति आकरे चतुर्थपुस्तके च पाठः ।
21. स्नेहं इति आकरे पाठः ।
22. वा इति आकरे पाठः ।
23. सुहिमं इति आकरे पाठः ।
24. द्रव्यसंयोगसंस्कारात् इति आकरे पाठः ।
25. यथायोगं इति आकरे पाठः ।
26. वृष्यावल्याः इति द्वितीयपुस्तके पाठः ।
27. पुष्टिकराः इति आकरे पाठः ।

28. दीपना: इति आकरे पाठः ।
29. पित्तनाशना इति आकरे पाठः ।
30. कफावहा इति आदर्शपुस्तकेषु पाठ. ।
31. रक्तमासला इति आकरे चतुर्थपुस्तके च पाठ· ।
32. बृंहणा गौडिका: भक्ष्या: गुरवोऽनिलनाशना: इति आकरे पाठः ।
33. पित्तवहा इति आकरे पाठः ।
34. मधुशीर्षकसंयाव इति आकरे पाठ ।
35. मोदकास्तु इति आकरे पाठः ।
36. सुदुर्जरा: इति आकरे पाठः ।
37. कफघ्न: इति द्वितीयपुस्तके पाठः ।
38. पित्तप्लीहातृप्तिकरो इति द्वितीयपुस्तके पाठः ।
39. भक्ष्यास्तु इति आकरे पाठः ।
40. सामिता: इति आकरे चतुर्थपुस्तके च पाठ. ।
41. बृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिता· इति आकरे पाठः ।
42. 'मुद्गादिवेशवारैस्तु·······गुरुबृंहणा:' पाठोऽयं द्वितीयपुस्तके नोपलभ्यते ।
43. बलोपचयबृंहण: इति आदर्शपुस्तकेषु पाठः ।
44. अस्य श्लोकस्यानन्तरम् 'मांसनिरस्थिमुस्विन्नं पुनर्दृषदिचूर्णितं ।
पिप्पलीमरिचशुण्ठीगुडसर्पि· समन्वितं ।
एवं विपाचयेत्सम्यक् वेसवार इति स्मृत: ।' पाठोऽयं चतुर्थपुस्तके अधिक-मुपलभ्यते ।
45. श्लेष्मजनना: इति आकरे पाठ ।
46 रुच्या विशेया· शालिसंभवा: इति आकरे पाठः ।
47. पौष्टिका भक्ष्या: कफपित्तप्रकोपणा. इति आकरे पाठ ।
48 विरूढकक्कृता: इति आकरे पाठ ।
49. विष्टम्भिन:·······गुरवोऽनिलपित्तला पाठोऽय चतुर्थपुस्तके नोपलभ्यते ।
50. रूक्षा: इति आकरे पाठ· ।
51. फलमासवसाशाकपटोलक्षौद्रसंयुता: इति आदर्शपुस्तकेषु पाठः ।
52. भक्ष्या: इति आकरे पाठः ।
53. बृंहणास्तथा इति आकरे पाठः ।
बृंहणात्मता इति चतुर्थपुस्तके पाठ· ।

54. गुरवस्तर्पणाः इति आकरे पाठः ।
55. क्षीरेक्षुरसपयसा इति चतुर्थपुस्तके पाठः ।
56. खलिलाश्चैव इति द्वितीयपुस्तके पाठः ।
57. सक्षारक्षौद्रशर्कराः इति आकरे पाठः ।
58. गुरवो मताः इति आकरे पाठः ।
59. वृष्याः इति आकरे पाठः।
60. उष्णाः इति आकरे पाठः ।
61. पित्तलासृक्प्रदूषणाः इति माधवद्रव्यगुणे पाठः ।
62. मासेक्षुवसाचैव तिलमाषेणसंस्कृताः इति द्वितीयपुस्तके पाठः, फलमांसेक्षु-विकृतितिलमाषोपसंस्कृताः इति आकरे पाठः ।
63. कर्पराङ्गारपक्वास्तु इति द्वितीयपुस्तके पाठः ।
64. सकिलाटादयो इति आकरे पाठः ।
65. भक्ष्याः इति आकरे पाठः ।
66 रूक्षाः इति आकरे पाठः ।
67. अस्यश्लोकस्यानन्तरम् 'लोहचक्रेसु प्रतप्रेयाचिताचक्रचतुला.।
भूयाः संस्वेदितांगारे गोधूमान्योनिका भवेत् ।
पोलिका कफकृद्बल्यापित्तला वातनुद्गुरुः ।
सात्युष्णारुचिकृत्पथ्या शीता सुगुरुरुच्यते ।
समिता निर्मितः ख्यातो मंडको विस्तृतस्तनुः ।
हस्तलालनयासिद्धः खर्प्परे मृदुवह्निना ।
मंडका शुक्रलो ग्राही लघुर्दोषत्रयापहः ।
शुद्धगोधूमचूर्णस्य स्थूला जलविनिर्मिता ।
एतद् धूमानले पक्वा विज्ञेयांगारकर्कटी ।
अगारकर्कटी बल्या बृंहणी शुक्रला लघुः ।
दीपनी कफहृद्रोगपीनसश्वासकासजित् ।
माषादी पिष्टिका मध्या पोलिका वेष्टनी मता ।
वेष्टनिका वृष्या स्वादुः स्निग्धा [पित्ता] निलापहः ।
'उष्णा संतर्पणी बल्या शुक्रला बृंहणी परम् ।
भिन्नमूत्रमलास्तन्यमेदःपित्तकफप्रदाः ।
गुदकीलार्दितश्वासयकृच्छूलविनाशिनी ।'

[भावप्रकाशः कृतान्नवर्ग १२ : ४२-४३]

चमसीनवितापोली कथिता बलमद्रिका ।
किंचिद् हीनगुणा प्रोक्ता वेष्टनी गुणतो बुधैः ।
धूमसी रचिता सैव ख्याता कर्करिका बुधैः ।
कर्करीकातु पित्तघ्नी किंचिद्वातहरी मता ।
पूरिका तैलसंपक्वता रुच्या बलकरी गुरु ।
चक्षुस्तेजोहरा चोष्णा वातहृत् पित्तरक्तकृत् ।
घृतपक्वाऽपि तद्वत्स्यात् चक्षुष्या रक्तपित्तहृत ।
प्रोक्ता मुहुवटी रुच्या बलकृद्वे गिणे हिता ।
मुद्गसूपगुणाः ये तु तष्टवात्राधिका मताः ।
माषस्य वटिका हृद्या बल्या पुष्टिप्रदायिनी ।
वातहृत् शुक्रला मोक्षा तलितापि प्रलेहिता ।
वटी कुष्मांडसंयुक्तमाषपिष्टिकया कृता ।
अम्लपित्तकरी ज्ञेया यकृद्वातविनाशिनी ।
चणकस्यापि वटिका व्यंजनेषु वरा भवेत् ।
रुच्या विष्टम्भजननी बल्या पुष्टिविवर्द्धिनी ।
तक्रादिक्वाथसंसिद्धा क्वथिका कथिता बुधैः ।
क्वथिका पाचनी हृद्या रुच्या वह्निप्रदा लघु ।
कफानिल विबंधघ्नी किंचित्पित्तप्रकोपिणी ।
जीरैर्हिंगु द्रवेणोषणलवणयुतै राईकैः ।
पूर्णगर्भश्चक्राकारः सुपुष्टः प्रचुरपरिमल कोमलः ।
कुकुमाभः प्राप्ते दंतान्तरालं मुरूमुरूः खणः स्वच्छा ।
तैले सुपक्वो धन्यानामास्यदेश प्रविशति ।
चठको भीमभोगायसिद्धाः ।
वटः शुष्को वातहरो बल्यो विष्टम्भपित्तकृत् ।
आह्लादजनकः प्रोक्तो दाहकरी तृषाकरः ।
सष्टवद्योलमग्रश्वेद्रुव्यः शुक्रकरो गुरुः ।
बल्यो विष्टंभकारी च विदाही पवनापहः ।
कांजिके वटको रुच्यो वातजित्कफकारकः ।
पित्तरक्तकरश्चोक्तो न हितो नेत्ररोगिणा ।
सामेतावत्तिर्काः कृत्वा सुसूक्ष्मा यवसनिभाः ।
शुष्का पायसवत्साध्या भोज्याः खडघृतान्विताः ।

सेविका तृप्ति जननी रुचिपित्तानिलापहा ।
सधानकृद्ग्राहिणी च सा सेव्या स्तोकमात्रया ।
शुभ्रेऽर्धसाधिते दुग्धे घृताक्तांस्तदुलान्क्षिपेत् ।
सुसिद्धा खंडसंयुक्ता चद्राभा क्षीरिका भवेत् ।
क्षीरिकादुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरु ।
विष्टम्भिनी हरेत्पित्त रक्तपित्ताग्निमारुतान् ।
गोसिका गुरवो भक्ष्या वातघ्ना कफशुक्रला: ।
पोलिका घृतसंपक्वा सूक्ष्मा सोहालिका मता ।
सौहाली शुक्रला रुच्या वातपित्तहरा गुरु: ।
पुटैरनेकैः सयुक्ता सोमाली फेनिका भवेत् ।
फेनिकं मधुरा शीता वृष्या गुर्वी मनोहरा ।
वातपित्तहरी बल्या किञ्चित्कफकरी सरा ।
चक्राकारा: सुपुष्टाश्चमसर्पिसम्मिता कृता: ।
घृते सिद्धा: पक्वखडमडिता मधुशीर्षका: ।
समिता सर्पिषा भृष्टा सितामरिचमिश्रिता ।
एलालवगकर्पूरचूर्णादि परिसस्कृता ।
क्षिप्ताऽन्यसमिता तपुटे सर्पिषि सपचेत् ।
तरु. खडेतिपक्वेन सयावोऽयमुदाहृत ।
सयावमपि जानीयान्मधुशीर्षकवद्गुणं ।
समिता सेविका: कृत्वा वर्त्तिवत्पाचिता घृते ।
मिश्रिता: पक्वखण्डेन ताभिर्भवति मोदक ।
सेविका लड्डुका बल्या गुरवो मधुरा हिमा: ।
वातपित्तहरा: स्निग्धा शुक्रला श्लेष्मकारिण. ।
कृताकर्करपात्रेण पिष्टिका बिन्दवो घृते मर्दिना ।
पक्वखडेन लड्डुकर्विधायते ।
मोदको मुद्गसिद्ध. प्रणिनो वातपित्तहृत् ।
रुचिकृद्बलकृत्सद्य: किञ्चित्कफकरो हिम ।
स चेच्चणकससिद्धो विशेषाद्वातलो मन: ।
समिता सधिता क्षिप्ता सछिद्रे भाजनातरे ।
परिभ्राम्यपरिभ्राम्य पतिता तप्तसर्पिषि ।
द्विश: वृत्या त्रिरावृत्या विहिता ककणा कृति: ।

सिताद्रवे मज्जिता च रसगर्भेति सोच्यते ।
रसगर्भा परं रुच्या पुष्टिकाऽतिबलप्रदा ।
धातुवृद्धिकरी गुर्वी तर्पणी वातपित्तहृत् ।
आममाम्रफलं खंड इव पक्व घृतान्वित ।
एलामरिचसंयुक्तं ज्ञातव्यं स च खाडवः ।
खंडाम्रखाडवः स्निग्धो मधुरोऽष्णो गुरुस्तथा ।
परं रुचिकरो बल्यस्तुष्टिपुष्टिप्रदो मतः ।
समिता सर्पिषा भृष्टा शुभ्रशर्करया युता ।
युता क्षीरेण संपक्वा लप्सिका मरिचान्विता ।
लप्सिका बृहणी वृष्या वातपित्तहरा गुरुः ।
मेहः कफकरी स्निग्धा रुच्या तृप्तिप्रदायिनी ।
एलालंवगकर्पूरमरिचैः सहशर्करा ।
अम्लीका फलसंभूतं पानकं वातनाशन ।
कफपित्तकर किंचित्सुरुच्य वह्निबोधन ।
अपक्वाम्लफलोद्भुत पानक वातनाशनं ।
कफपित्तकर चाम्लं रुच्य पक्वाम्रसंभवं ।
तत्तु स्वाद्रष्ट च गुरुपित्तहृत् ।
विदंश्लेष्मलबल्य चूर्णं वृष्यवमे नाशयेत् ।
निबूज पान पाचनं वातनाशनं ।
धान्यकल्कसिताजात पानकं शशिवासितम् ।
शीतं परं पित्तहरं मूत्रकृच्छ्रविनाशन ।
अपक्वभृष्टो गोधूमो वुधैरुवीति कथ्यते ।
उंदी कफप्रदा बल्या लघ्वी पित्तानिलापहा ।
शिबीधान्यैर्वृद्धपक्वैसुंभृष्टैर्होलको मतः ।
होलको वातलो मेदकफदोषश्रमापहः ।' वहुप्रमादपर्णः पाठोऽयं चतुर्थपुस्तके अधिकमुपलभ्यते ।

68. यद्गुणेनेह इति आकरे पाठ. ।

69. यद्वीर्येण च इति आकरे पाठ. ।

70. भक्ष्याश्चिकित्सकै इति आकरे पाठः ।

71. इति पानभक्ष्यवर्गः इति आकरे पाठ ।
इति यूपादिक्रमः इति चतुर्थपुस्तके पाठ ।

# CHAPTER 28

'शीतोष्णतोयासवमद्ययूषफलाम्लधान्याम्लपयोरसानाम् ।

यस्यानुपानं तु हित[1] भवेद्यत्तस्मै[2] प्रदेय तु हि मात्रया[3] वै ॥१॥

व्याधि[4] काल च विभाव्य[5] धीरैर्द्रव्याणि[6] योज्यानि च तानि तानि ।

*Anupāna*

Cold water, hot water, *āsava*, alcohols, *yūṣa, phalāmla, dhānyāmla,* milk and juice—these are generally used as *anupāna* and these should be used in proper quantity after ascertaining their utility, the nature of the disease and its stage of manifestation.

सर्वानुपानेषु वर वदन्ति मेध्यं यदम्भः शुचिभाजनस्थम् ॥ २ ॥'

[माधवद्रव्यगुणः अनुपानविधि २८: १-२]

Among all the *anupānas* the water which is kept in a clean pot is the best. It promotes intellect.

'स्निग्धोष्ण मारुते शस्तं पित्ते मधुरशीतलम् ।

कफेऽनुपान रूक्षोष्ण क्षये मांसरसः परम् ॥ ३ ॥

उष्णोदकानुपानं तु स्नेहानामथ शस्यते ।

ऋते भल्लातकस्नेहात्तत्र तोयं[7] सुशीतलम् ॥ ४ ॥

If there is aggravation of *vāyu*, *anupānas* which are unctuous and hot are useful; in *pitta* sweet and cooling *anupānas* are useful and in *kapha* ununctuous and hot *anupānas* are useful. If there is *kṣaya* (consumption) meat soup is the best *anupāna*.

After taking oil, ghee etc. hot water should be used as *anupāna*. The oil of *bhallātaka* is an exception to this rule and cold water should be used after this oil.

अनुपानं च दातव्यं[8] तैलयूषाम्लकांजिकम्[9] ।

शीतोदकं माक्षिकस्य पिष्टान्नस्य च सर्वशः ॥ ५ ॥

दधिपायसमद्यार्त्तिविषयुष्टेस्तथैव[10] ये ।

After honey and pastries (*piṣṭānna*) the *anupāna* should invariably be oil, *yūṣa*, *amla kāñjika* or cold water. Similar types of *anupāna* are useful after the intake of *dadhi*, *pāyasa* and alcohol and in *viṣa* (poisoning).

केचित्पिष्टमये[11] प्राहुरनुपानं सुखोदकम् ॥ ६ ॥

According to some scholars ordinary water should be used as *anupāna* after taking pastries (*piṣṭa*).

पयो मांसरसो[12] वापि शालिमुद्गादिभोजिनाम्[13] ।

Milk and meat soup should be used as *anupāna* for persons taking *śāli*, *mudga* etc.

मापादेरनुपानं तु धान्याम्ल दधिमस्तु वा ॥ ७ ॥

*Dhānyāmla* or *dadhi mastu* is useful as *anupāna* for persons taking *māṣa* etc.

अल्पाग्नीनामनिद्राणां तन्द्राशोषभ्रमक्लमे[14] ।

मद्यमांसोचितानां च मद्यमेवानुशस्यते ॥ ८ ॥

Alcohol is useful as *anupāna* for persons suffering from weak digestive power, sleeplessness, drowsiness, *śoṣa* (consumption), *bhrama* (giddiness) and *klama* (physical fatigue) and also for persons who are habituated to alcohol and meat.

अमद्यपानामुदक फलाम्लं वा प्रशस्यते ।

Persons who are not accustomed to drinking should use water or *phalāmla* as *anupāna.*

उपवासाध्वभाष्यस्त्रीमारुतातपकर्मभिः[15] ॥ ९ ॥
क्लान्तानामनुपानार्थं पयः पथ्यं परं[16] स्मृतम् ।

Milk is extremely wholesome for persons who are fatigued because of fast, excessive walking, talking or sexual intercourse and exposure to wind, sun ray or excessive exercise.

सुराकृशाणा स्थूलानामनुपान मधूदकम् ॥ १० ॥

*Madhūdaka* should be used as *anupāna* by persons who are emaciated because of excessive drinking and also for persons who are obese.

निरामयाणा चित्त[17] [?] तु भुक्तमध्ये प्रकीर्तितम्[18] ।

For healthy persons *anupāna* should be used in the middle the food.

हितं शोणितपित्तेभ्यः क्षीरमिक्षुरसस्तथा ॥ ११ ॥

Patients suffering from *śoṇita pitta* (a disease characterised by bleeding from different parts of the body) should use milk sugar cane juice as *anupāna.*

अक्ष[19]शेलुशिरीषाणामासवास्तु विषार्तिषु ।

Patients suffering from poisoning should use the *āsava* of *aksa*, *śelu* and *śirīṣa* as *anupāna.*

दोषवत्[20] गुरु वा युक्तमतिमात्रमथापि वा ।
यथोक्तेनानुपानेन सुखमन्नं हि जीर्य्यति[21] ॥ १२ ॥

When *anupāna* is used in excess quantity, then it is injurious and heavy. If *anupāna* is used according to the prescription, then it helps in easy digestion of food.

'रोचनं बृंहणं वृष्यं दोषसंघातभेदनम्'[22] ।
तर्पण मार्दवकरं श्रमक्लमहरं[23] सुखम् ॥ १३ ॥
दीपन दोषशमन पिपासाछेदनं परम् ।
बल्य वर्णकर चापि अनुपानं सदोच्यते[24] ॥ १४ ॥

*Anupāna* is invariably appetiser, nourishing and aphrodisiac. It helps in the detachment of all the *doṣas* from the tissue elements. It is refreshing. It produces softness and cures physical as well as mental fatigue. It produces happiness, stimulates digestion, alleviates *dosas*, reduces thirst and promotes strength as well as complexion.

तदादौ कर्शयेत्पीतं[25] स्थापयेन्मध्यसेवितम् ।
पश्चात्पीतं बृंहयति तत्समीक्ष्य प्रयोजयेत् ॥ १५ ॥

If *anupāna* is used before food, then it causes emaciation. If it is used in the middle of the food, then it keeps the *doṣas* in their proper positions. If it is used after food, then it produces a nourishing effect. Keeping these facts in view one should administer *anupāna*.

स्थिर[26]रतांगतमक्लिन्नमन्नमद्रवपायिनाम ।
भवत्या[27]वाधाजननमनुपानमतः पिवेत् ॥ १६ ॥
न पिबेच्छ्वासकासार्त्तो रोगे[28] वाप्यूर्ध्वजत्रुगे ।
क्षतो[29]रस्तु प्रसेकी च यस्य [ह्य]पहतः[30] स्वरः ॥१७॥

If food is taken without any drink, then it remains there without undergoing the process of softening. Therefore one should use *anupāna*. It should not be used by patients suffering from *śvāsa* (asthma), *kāsa* (bronchitis), diseases of the head and neck, *uraḥ kṣata* (phthisis), *praseka* (excessive slivation) and impairment of voice.

31
पानाध्वभाष्याध्ययन स्वप्नमेतान्न शीलयेत् ।
32
प्रदूष्यामाशयं तद्धि तस्य कंठोरसि स्थितम् ॥ १८ ॥
33
स्यादग्निसादछर्द्यादीन् जनयेदामयान्बहून् ।

One should not indulge in drinking, walking, talking, reading and sleeping in excess. By doing so the stomach gets vitiated and the *doṣas* situated in the throat and chest produce indigestion, vomiting and many such diseases.

34 35
अनुपाने प्रयोक्तव्य व्याधौ श्लेष्मभवे पलम् ।

पलद्वय त्वनिलजे पित्तजे च पलत्रयम् ॥ १९ ॥'

[माधवद्रव्यगुण: अनुपानविधि २८ : ४-२१]

In diseases caused by *kapha* the *anupāna* should be administered in a dose of one *pala* (48 ml.). In diseases caused by *vāyu* its dose is two *palas* (96 ml.). In diseases caused by *pitta* the dose of *anupāna* is three *palas* (144 ml.).

॥ इत्यनुपानविधि: ॥

Thus end the section dealing with the method of administration of different types of *anupāna*.

## NOTES AND REFERENCES

1. भवेद्धितं यत्तस्मै प्रदेयं त्विह मात्रया तत् इति भाकरे पाठः ।
2. भवेत्सत्तस्मै इति द्वितीयपुस्तके पाठः ।

3. च इति चतुर्थपुस्तके पाठः ।
4. द्रव्याणि इति द्वितीयपुस्तके पाठः ।
5. विभज्य इति आकरे पाठः ।
6. योग्यानि इति द्वितीयपुस्तके पाठः ।
7. नोष्णं इति द्वितीयपुस्तके पाठः ।
8. अनुपानं वदन्त्येके इति आकरे पाठः ।
9. तैले इति आकरे पाठः ।
10. दधिपायसमद्यार्त्तिविषयुक्ते तथैव च इति आकरे पाठः ।
    दधिपायसमद्यानां विषयुक्तास्तथैव ये इति द्वितीयपुस्तके पाठः ।
11. केचिदिष्टतम इति द्वितीयपुस्तके पाठः ।
12. यूषो मांसरसो इति आकरे चतुर्थपुस्तके च पाठः ।
13. शालिमुद्गादियोजितम् इति आदर्शपुस्तके पाठः ।
    शालिमुद्गादिभोजने इति चतुर्थपुस्तके पाठः ।
14. तंद्राशोकभ्रमक्लमैः इति आकरे पाठः ।
15. उपवासाध्वकार्श्यस्त्री इति द्वितीयपुस्तके पाठः ।
16. तथाऽमृतम् इति आकरे पाठः ।
17. चित्रं इति आकरे पाठः ।
18. प्रशस्यते इति आकरे चतुर्थपुस्तके च पाठः ।
19. अर्कशेलुशिरीषाणां मांसमस्तु विषार्त्तिषु इति आदर्शपुस्तके पाठः ।
20 दोष च इति आदर्शपुस्तके पाठः ।
21. प्रजीर्यति इति आकरे पाठः ।
22. 'रोचनं·······दोषसंघातभेदनम्' पाठोऽयं चतुर्थपुस्तके नोपलभ्यते ।
23. सर्वक्लमहरं इति द्वितीयपुस्तके पाठः ।
24. त्वनुपानं इति आकरे पाठः ।
25. तर्पयेत्पीत इति द्वितीयपुस्तके पाठः ।
26. भवत्यबोधजननमनुपानमतः इति आदर्शपुस्तके पाठः ।
27. न रोगे तूर्ध्वजत्रुगे इति आकरे पाठः ।
28. क्षतोरस्कः इति आकरे पाठः ।
29. यः स्याच्चोपहतस्वरः इति आकरे पाठः ।

यस्य ह्यापहृत: स्वरम् इति द्वितीयपुस्तके पाठ: ।

30. पीत्वाध्वभाष्याध्ययनगेयस्वप्नान्न इति आकरे चतुर्थपुस्तके च पाठः।

31. प्रदूष्यामाशये इति आदर्शपुस्तके पाठः ।

32. मंदाग्निसादछर्द्यादीन् इति आकरे पाठः ।

अग्निमान्द्यछर्द्यादीन् इति द्वितीयपुस्तके पाठ. ।

33. अनुपान इति आकरे पाठः ।

34. फलम् इति द्वितीयपुस्तके पाठः ।

35. अनुपानाधिकारः इति चतुर्थपुस्तके पाठः ।

# CHAPTER 29

चित्रकाऽभावतो दन्ती क्षारशिखरिजोऽथवा ।

If *citraka* is not available, then in its place *dantī* or the *kṣāra* of *śikhari* should be used.

अभावे पृष्णिपर्ण्यश्च सिंहपुच्छी प्रदीयते ॥ १ ॥

In the case of non-availability of *pṛṣṇī parṇī*, one should use *siṁha pucchī*.

भार्ङ्ग्यऽभावे तु तालीसं कंटकारीजटाऽथवा ।

If *bhārṅgī* is not available, then *tālīsa* or the root of *kaṇṭakārī* should be used in its place.

अभावे धन्वयासस्य प्रक्षेप्या च दुरालभा ॥ २ ॥

If *dhanvayāsa* is not available, then *durālabhā* should be added in its place.

पुंजातः [मुंजातः?] पश्चिमे ख्यातस्तस्याभावे तु तालविट् ।

In the place of the drug which is known in the western

regions as *puṁjāta*, one should use *tālaviṭ*.

नततगरपाद्याश्च अभावे वेणु निक्षिपेत् ॥ ३ ॥

If *nata* or *tagara pādi* is not available, then in its place *veṇu* should be added.

अभावे तगरस्यापि कुष्ठं तु प्रक्षिपेत्सदा ।

If *tagara* is not available, then *kuṣṭha* should always be added in its place.

क्षिपेत् करिकणाभावादपि कुक्कुटमस्तकम् ॥ ४ ॥

If *karikaṇā* is not available, then one should use in its place *kukkuṭa mastaka.*

अभावेऽभ्रकसत्त्वस्य कांतलौहं प्रयोजयेत् ।

If the *sattva* (essence) of *abhraka* is not available, then in its place *kānta lauha* should be used.

कान्ताभावे तीक्ष्णलौह् योजयेत् वैद्यसत्तमः ॥ ५ ॥

If *kānṭa lauha* is not available, then an expert physician should used *tīkṣṇa lauha* in its place.

मूर्वाभावे त्वचो ग्राह्या ततो जिगिनिसम्भवा ।

If *mūrvā* is not available, then in its place the bark of *jiṅgini* should be used.

अर्कपर्णादिपयसो ह्यभावे तद्रसो मतः ॥ ६ ॥

If the latex of *arka parṇī* etc. is not available, then in its place the *yūṣa* of these plants is recommended.

लाङ्गल्यभावतो वह्नीपत्रं दद्यात् विचक्षणः ।

An expert should use *vahnī patra* in the place of *lāṅgalī* if the latter is not available.

अहिंस्रायाः अभावे तु मानकदः प्रकीर्त्तितः ॥ ७ ॥

If *ahimsrā* is not available, then in its place *māna kanda* is to be used,

लक्ष्मणाया अभावे तु नीलीकंदशिफा मता ।

If *lakṣmaṇā* is not available, then the root of *nīlī kanda* should be used.

यदा न पौष्कर मूल कुष्ठ योज्यं तदा बुधैः ॥ ८ ॥

If *puskara mūla* is not available, then in its place *kuṣṭha* should be used by the Wise.

चविकागजपिप्पल्यौ पिप्पलीमूलवत् स्मृतौ ।

*Cavikā* and *gaja pippalī* have effects like *pippalī mūla*.

भल्लातकासहत्वे तु रक्तचंदनमिष्यते ॥ ९ ॥

If a person is not able to tolerate *bhallātaka*, then he should be given *rakta candana*.

अभावे सोमराज्यास्तु प्रपुन्नाडफलं मतम् ।

If *somarāji* is not available, then in its place the fruit of *prapunnāḍa* is recommended.

यदा न स्यात् दारुनिशा तदा देया निशा बुधैः ॥१०॥

When *dāru niśā* is not available, then the Wise should use *niśā*.

रसांजनस्याभावे तु सम्यक् दार्वीं प्रयोजयेत् ।

If *rasāñjana* is not available, then in its place *dārvī* is used.

सौराष्ट्र्यभावतो देया कटिभी तद्गुणा जनैः ॥११॥

If *saurāṣṭri* is not available, then in its place *kaṭibhī* which has similar properties should be used.

अम्लवेतसकाभावे चुक्र दातव्यमीरितम् ।

If *amla vetasa* is not available, then in its place *cukra*

should be used.

रुचकाभावतो दद्यात् लवण पांशुपूर्वकम् ॥ १२ ॥

If *rucaka* is not available, then in its place *pāṁśu lavaṇa* should be added.

सुवर्णमथवा रूप्यं मृत यत्र न विद्यते ।

तत्र लोहेन कर्माणि भिषक् कुर्याद् विचक्षणः ॥१३॥

If the *bhasma* of *suvarṇa* or *rūpya* is not available, then in its place an expert physician should give *lauha*.

सुवर्णाभावतो वैद्यो माक्षिकं वापि निःक्षिपेत् ।

माक्षिकस्याप्यभावे तु प्रदद्यात् स्वर्णगैरिकम् ॥ १४ ॥

If *suvarṇa* is not available, then in its place the physician should add *mākṣika*. If, however, *mākṣika* is not available, in its place *svarṇa gairika* should be used.

हेममाक्षिकजं सत्त्वं मृतहेमसमं गुणैः ।

The *sattva* (essence) of *hema mākṣika* is similar to *svarṇa bhasma* in properties.

श्वेतं तु माक्षिकं ज्ञेयं ध्रुव रजतवद् गुणैः ॥ १५ ॥

The white variety of *mākṣika* is certainly like *rajata* in property.

वज्राभावे तु वैक्रान्तं मुनयः प्रक्षिपंति च ।

If *vajra* is not available, then the sages use *vaikrānta* in its place.

कर्पूराभावतो देयं ग्रन्थिपर्णं विशेषतः ॥ १६ ॥

If *karpūra* is not available, then *granthi parṇa* is used in its place.

श्रीखण्डचंदनाभावे कर्पूरं देयमिष्यते ।

अलाभे त्वेतयोर्वैद्यः प्रक्षिपेद्रक्तचन्दनम् ॥ १७ ॥

रक्तचन्दनकाभावे नवोशीरं विदुर्बुधाः ।

If *śrīkhanḍa candana* is not available, then in its place *karpūra* should be added. If both of them are not available, then the Wise should use *rakta candana* in their place. If *rakta candana* is not available, then the freshly collected *uśīra* is used in its place.

तालीसपत्रकाभावे स्वर्णताली प्रशस्यते ॥ १८ ॥

If *tālīsa patra* is not available, then in its place *svarṇa tālī* is useful.

अभावे नागपुष्पस्य पद्मकेसरमुच्यते ।

If *nāga puṣpa* is not available, then *padma keśara* is to be used.

कस्तूर्यभावे कक्कोलं प्रक्षेप्यं तु विदुर्बुधाः ॥ १९ ॥

कक्कोलस्याप्यभावे तु जातीपुष्पं प्रशस्यते ।

If *kastūrī* is not available, then the Wise should add *kakkola* in its place. If *kakkola* is not available, then the flower of *jāti* is useful in its place.

नीलोत्पलस्याभावे तु कुमुदं देयमिष्यते ॥ ३० ॥

If *nīlotpala* is not available, then in its place *kumuda* should be used.

जातीपुष्पं न यत्रास्ति लवगं तत्र दीयते ।

If the flower of *jāti* is not available, then in its place *lavaṅga* is added.

वंधूकाभावतो देयं पुष्पं पुन्नागनामकम् ॥ २१ ॥

If *vandhūka* is not available, then in its place the flower called *punnāga* should be added,

बकुलाभावतो देयं कल्हारोत्पलपंकजम् ।

If *bakula* is not available, then in its place *kalhāra*, *utpala* and *paṅkaja* can be used.

द्राक्षा यदि न लभ्येत प्रदेयं काश्मरीफलम् ॥ २२ ॥

तयोरभावे कुसुमं मधूकस्य मतं बुधैः ।

If *drākṣā* is not available, then in its place the fruit of *kāśmarī* should be added. If both of them are not available, then the flower of *madhūka* should be used.

मेदाजीवककाकोलीऋद्धिद्वन्द्वेऽपि वाऽसति ॥ २३ ॥

यष्टीविदार्यश्वगंधावाराही च क्रमात् क्षिपेत् ।

If both the types of each of *medā*, *jīvaka*, *kākolī* and *ṛddhi* are not available, then in their places *yaṣṭī*, *vidāri*, *aśvagandhā* and *vārāhī* should be added respectively.

वाराह्याश्च तथाभावे चर्मकारालुको मतः ॥ २४ ॥

If *vārāhī* is not available, then in its place *carmakārāluka* should be used.

न भवेत् दाडिम यत्र वृक्षाम्ल तत्र योजयेत् ।

If *dāḍima* is not available, then in its place *vṛkṣāmla* should be used.

क्षीराभावे रसो मौद्ग. मासूरो वा प्रदीयते ॥ २५ ॥

If milk is not available, then the juice of *mudga* or *masūra* should be used.

रूचकतैलाभावे तु हितमारुष्कर विदुः ।

If the oil of *rūcaka* is not available, then in its place the oil of *aruṣkara* should be used.

मुक्ताभावे क्षिपेन्नित्यं मुक्ताशुक्ति न सशय: ॥ २६ ॥

If *muktā* is not available, one can undoubtedly use *muktā-śukti* in its place.

मधु यत्र न लभ्येत तत्र जीर्णगुडो मतः ।
अनर्हत्वादभावाद्वा मधुनः शस्यते बुधैः ॥ २७ ॥
रम्भापुष्परसश्चापि खांडजलमथापि वा ।

If honey is not available, then in its place old *guḍa* is recommended. If honey is either not available or not suitable for the patient, then in its place the Wise should use the juice of *rambhā puṣpa* or water mixed with *khaṇḍa.*

मत्स्याण्ड्यभावतो दद्यात् भिषग्भि सितशर्करा ॥२८॥

If *matsyāṇḍi* is not available, then in its place a physician can give white variety of *śarkarā.*

सिद्धार्थ· सर्षपे योज्याद्वैद्यविद्याविशारदैः ।

A person proficient in medical science should use *siddhārtha* in the place of *sarṣapa.*

असंभवे सितायाश्च बुधैः खडं प्रयुज्यते ॥ २६ ॥

If *sitā* is not available, then the Wise should use *khaṇḍa.*

अभावे वेतसाम्लस्य चणकाम्लमपि क्षिपेत् ।
एतयोश्च अभावेऽपि हेमंताम्लं समादिशेत् ॥ ३० ॥

If *vetasāmla* is not available, then in its place *caṇakāmla* may be used. If both of them are not available, then in their place, the use of *hemantāmla* is advised.

मुस्ता चातिविषाऽभावे शिवाऽभावे शिव भवेत् ॥३१॥

If *ativiṣā* is not available, then in its place *mustā* should be used. If *śivā* (*harītakī*) is not available, then in its place *śiva* (*āmalaka*) should be used.

अभावे सति पत्राणां रसादौ भावनाविधिः ।
विषमुष्टिकषायेण षड्गुणा भावना भवेत् ॥ ३२ ॥

If it is prescribed in the text to give *bhāvanā* (impregnation) by the juice of the leaf *viṣamuṣṭi*, and if it is not available, then in its place the decoction of this drug six times in quantity can be used.

अभावे शालिधान्यस्य षष्टिकादि न्यसेत् बुधैः ।

If *śāli dhānya* is not available, then in its place *ṣaṣṭika* etc. should be added.

मसूराभावतो दद्यात् शशहंसाखुकानपि ॥ ३३ ॥

If *masūra* is not available, then in its place the juice of the meat of *śaśa, haṁsa* and *ākhu* can be used.

अत्र प्रोक्तानि वस्तूनि यानि यानि च तेषु च ।
योज्यमेकतराभावे परं वैद्येन जानता ॥ ३४ ॥

The substitute drugs described in this chapter can be used by a wise physician when the original drugs are not available.

रसवीर्यविपाकाद्यैः समद्रव्य विचिन्त्य च ।
युञ्ज्यादेवंविधमन्यद्द्रव्यज्ञानविशारदः ॥ ३५ ॥

A physician well versed in materia medica should decide substitutes of similar other drugs by taking into consideration their *rasa* (taste), *vīrya* (potency), *vipāka* (taste after digestion) etc.

अन्तःसम्मार्जने मोदास्थाने योज्या यवानिका ।
बहिःसम्मार्जने मोदास्वजमोदैव गृह्यते ॥ ३६ ॥

In the place of *modā*, *yavānikā* should be used if the formula is meant for internal cleansing and *ajamodā* should be used if the formula is meant for external cleansing.

अन्त.सम्मार्जने योज्यं वचास्थाने कुलिंजनम् ।
वहि सम्मार्जने सैव प्रयोज्यात् [?] मरगिर्षिभि: [?] ॥ ३७ ॥

In the place of *vacā, kuliñjana* is used if the formula is meant for internal cleansing. For external cleansing, however, *vacā* as such can be used in the formula.

कृष्णजीरकयोगेन कर्तव्ये भक्ष्यभेषजे ।
तस्य स्थाने विधातव्यो जीरक: कुशलो [भिषक्] ॥ ३८ ॥

If any food preparation or medicine is described to be prepared by adding *kṛṣṇa jīraka*, then in its place white variety of *jīraka* should be used by an expert physician.

॥इति अनुकल्पवर्ग:॥

Thus ends the chapter dealing with various types of substitutes and allied topics.

# CHAPTER 30

दानशीलदया — सत्यब्रह्मचर्यकृतज्ञता ।

रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणाः ॥ १ ॥

Charity, good conduct, compassion, truthfulness, celibacy, gratefulness, rejuvenation therapy and friendship—these constitute the group which promotes virtue and longevity.

सुश्रुताद्गणान् वक्ष्यामः

उद्देशमात्रमपि लक्षणं प्राग्यदुक्तं व्यक्तं व्यनक्ति

पवनादिगदातुराणां । नृणामदृष्टचरकादि

जडात्मनोऽपि प्रज्ञावतः किमुत कायचिकित्सकस्य ॥२॥

**Description of groups of drugs according to *Suśruta***

What has been described in brief before clearly shows the way for the treatment of patients suffering from diseases caused by *vāyu* etc. even to a less intelligent person who is not acquainted with *Caraka* etc. It is not necessary to describe the

usage to which these drugs can be put by an intelligent physician who is specialised in the treatment of internal diseases.

दोषधातुमलमूलमिद रुग्युक्तमुक्तमृषिभिर्न् शरीरम् ।
तद्विकारमुपलभ्य भिषग्भिर्भेषजैरुपशमः करणीयः ॥ ३ ॥

इतीदमुक्तं यदुदीरितं पुरा समुच्चये सूत्रमविस्तरौषधम् ।
कि[2]यद्भिरप्यौषधसग्रहैर्गणैर्निगद्यते चान्यदतश्चिकित्सितम् ॥ ४ ॥
[3]स्यात्सप्तत्रिंशमेभिर्गणैर्वीक्ष्यवातपित्तकफान् ।
योगा रोगार्त्तानां विभज्य [4]भिषजा प्रकल्पन्ते ॥ ५ ॥

It has been stated by the sages that the human body which suffers from diseases is a conglomeration of *doṣas*, *dhātus* (tissue elements) and *malas* (waste products). If there is morbidity in this body, the physician should alleviate these ailments by the administration of drugs. This has already been stated before in brief. Now some of these drugs are being described by putting them into different groups for the convenience of treatment. These groups are thirty-seven in number. After ascertaining the predominance of either *vāyu*, *pitta* or *kapha* and the nature of the compound, disease and the patient, the physician should administer these drugs after proper selection.

घृततैलचूर्णकल्कप्रलेपसेकावगाहपानानि ।
आस्थापनमनुवासननस्यांजनवर्तिविधा यश्च ॥ ६ ॥

These drugs can be used in the form of medicated ghee, medicated oil, powder, paste, unguent, spray, bath, drink, *āsthāpana* type of enema, *anuvāsana* type of enema, inhalation, collyrium and suppository.

**सुश्रुतः**

समीक्ष्य दोषभेदांश्च [5]गणान्भिन्नान्प्रयोजयेत् ।
पथग्मिश्रान्समस्तान्वा गणान्वाच्यस्तु संहतान् ॥७॥

[सुश्रुतः सूत्र ३८ :८२]

*Suśruta*

Depending upon the nature of the *doṣas* involved in the manifestation of the disease, the physician should prescribe drugs described in these groups either separately or jointly. Even drugs of all the groups can be used together.

'तद्यथा—

१. विदारीगन्धा विदारी विश्वदेवा सहदेवा श्वदंष्ट्रा पृथक्पर्णी शृगालविन्ना शतावरी सारिवा जीवकर्षभकौ महासहा क्षुद्रसहा बृहत्यौ पुनर्नवैरण्डो हंसपादी वृश्चिकाल्यृषभश्चेति ॥ ८ ॥

(1) *Vidārigandhādi gaṇa*

This group includes *vidāri gandhā, vidārī, viśvadevā, sahadevā, śvadaṁṣṭrā, pṛthakparnī, sṛgāla vinnā, śatāvarī, sārivā, jivaka, ṛṣabhaka, mahā sahā, kṣudra sahā, bṛhatī, kaṇṭakārī, punarnavā, eraṇḍa, haṁsa pādī, vṛścikālī* and *ṛṣabha.*

विदारीगन्धादिरयं गणः पित्तानिलापहः ।

शोषगुल्माङ्गमर्दोर्ध्वश्वासकासविनाशनः ॥ ९ ॥

Drugs of this group alleviate *pitta* and *vāyu*, and cure *śoṣa* (consumption), *gulma* (phantom tumour), *anga marda* (malaise), *urdhva śvāsa* (dyspnoea) and *kasā* (bronchitis).

२. आरग्वधमदनगोपघोण्टाकण्टकीकुटजपाठापाटलामूर्वेन्द्रयवसप्तपर्णनिम्बकुरण्टकदासीकुरण्टकगुडूचीचित्रकशार्ङ्गष्ठापरूषकरंजद्वयपटोलकिराततिक्तकानि सुषवी चेति ॥ १० ॥

(2) *Āragvadhādi gaṇa*

This group includes *āragvadha, madana, gopa ghoṇṭā, kaṇṭakī, kuṭaja, pāṭhā, pāṭalā, mūrvā, indrayava, saptaparna, niṁba, kurantaka, guḍūcī, citraka, śārṅgiṣṭhā, parūṣaka,* both the types of *karañja, paṭola, kirāta tikta* and *suṣavī.*

आरग्वधादिरित्येष गणः श्लेष्मविषापहः ।

मेहकुष्ठज्वरवमीकण्डूघ्नो व्रणशोधनः ॥ ११ ॥

Drugs of this group alleviate *kapha* and poisoning, and cure *meha* (obstinate urinary disorders including diabetes), *kuṣṭha* (obstinate skin diseases including leprosy), *jvara* (fever), *vamī* (vomiting) and *kaṇḍū* (itching). They also help in the cleansing of ulcers.

३. सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचंदन-कुचंदनशिंशिपाशिरीषासनधवार्जुननक्तमालाश्वकर्णशाकगुडूचीकालीय-कश्चेति ॥ १२ ॥

(3) *Sālasāraādi gana*

This group includes *sālasāra*, *ajakarṇa*, *khadira*, *kadara*, *kāla skandha*, *kramuka*, *bhūrja*, *meṣa śṛṅgī*, *tiniśa*, *candana*, *kucandana*, *śiṁśipā*, *śirīṣa*, *asana*, *dhava*, *arjuna*, *naktamāla*, *aśvakarṇa*, *śāka*, *guḍūcī* and *kālīyaka*.

सालसारादिरित्येष गणः कुष्ठविनाशनः ।
मेहपाण्डवामयहरः कफमेदो विशोधनः ॥ १३ ॥

Drugs of this group cure *kuṣṭha* (obstinate skin diseases including leprosy), *meha* (obstinate urinary disorders including diabetes) and *pāṇḍu* (anemia). They also cleanse *kapha* and *medas* (fat).

४ वरुणार्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृङ्गीपूतीकनक्तमालमोरटाग्निमन्थसैरे-
7
यकद्वयबिम्बीवसुकवसिरचित्रकशतावरीबिल्वाजशृङ्गीदर्भाः बृहतीद्वयं चेति ॥ १४ ॥

(4) *Varuṇādi gaṇa*

This group includes *varuṇa*, *ārtagala*, *śigru*, *madhu śigru*, *tarkārī*, *meṣaśṛṅgī*, *pūtīka*, *naktamāla*, *moraṭa*, *agnimantha*, both the types of *saireyaka*, *bimbī*, *vasuka*, *vasira*, *citraka*, *śatāvarī*, *bilva*, *ajaśṛṅgī*, *darbha* and both the types of *bṛhatī*.

वरुणादिर्गणो ह्येष कफमेदोनिवारणः ।
विनिहन्ति शिरःशूलगुल्माभ्यन्तरविद्रधीन् ॥ १५ ॥

Drugs of this group alleviate *kapha* and reduce *medas* (fat). They cure *śiraḥśūla* (headache), *gulma* (phantom tumour) and *ābhyantara vidradhi* (internal abscess).

५. वीरतरुसहचरद्वयदर्भ[8]वृक्षादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटा-
वसुकवसिरभल्लूककुरण्टिकेन्दीवरकपोतवङ्काः श्वदंष्ट्रा चेति ॥ १६ ॥

(5) *Vīratarvādi gaṇa*

This group includes *vīrataru,* both the types of *sahacara, darbha, vṛkṣādanī, gundrā, nala, kuśa, kāśa aśmabhedaka, agnimantha, moraṭā, vasuka, vasira, bhallūka, kuraṇṭika, indīvara, kapota vaṅkā* and *svadaṁṣṭrā.*

वीरतर्वादिरित्येष गणो वातविकारनुत् ।
अश्मरीशर्करा[9]मूत्रकृच्छ्राघातरुजापहः ॥ १७ ॥

Drugs of this group cure diseases caused by *vāyu, aśmarī* (stone in urinary tract), *śarkarā* (gravels in the urinary tract), *mūtra kṛcchra* (dysuria) and *mūtrāghāta* (anuria).

६. [10]रोध्रसावररोध्रपलाशकुटन्नटाशोकफंजीकट्फलैलवालुकसल्लकीजिंगिनी-
कदम्बसालाः कदली चेति ॥ १८ ॥

(6) *Rodhrādi gaṇa*

This group includes *rodhra, sāvararodhra, palāśa, kuṭannaṭa, aṣoka, phañjī, kaṭphala, ela vāluka, sallakī, jiṅginī, kadamba, sāla* and *kadalī.*

एष रोध्रादिरित्युक्तो मेदःकफहरो गणः ।
योनिदोषहरः स्तम्भी वर्ण्यो विषविनाशनः ॥ १९ ॥

Drugs of this group reduce *medas* (fat) and *kapha.* They cure *yonī doṣa* (ailments of female genital tract). They promote the power of retention (*stambhana*) and complexion. They cure *viṣa* (poisoning).

७. अर्कालर्ककरंजद्वयनागदन्तीमयूरकभार्गीरासनेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणास्तापसवृक्षश्चेति ॥ २० ॥

(7) *Arkādi gaṇa*

This group includes *arka, alraka,* both the types of *karañja, nāgadantī, mayūraka, bhārgī, rāsanā, indrapuṣpī, ksudraśvetā, mahā śvetā, vṛścikāli, alavaṇā* and *tāpasa vṛkṣa.*

अर्कादिको गणो ह्येष कफमेदोविषापहः ।
कृमिकुष्ठप्रशमनो विशेषात् व्रणशोधनः ॥ २१ ॥

Drugs of this group reduce *kapha* and *medas* (fat). They cure *viṣa* (poisoning), *kṛmi* (parasitic infection) and *kuṣṭha* (obstinate skin diseases including leprosy). They specially help in the cleansing of ulcers.

८ सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणसुगन्धकसुमुखकालमालकासमर्दक्षवककखरपुष्पविडङ्गकट्फलसुरभीनिर्गुण्डीकुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीगलकाकमाच्यो विषमुष्टिकश्चेति ॥ २२ ॥

(8) *Śurasādi gaṇa*

This group includes *surasā, śveta, surasā, phaṇijjhaka, arjaka, bhūstṛṇa, sugandhaka, sūmukha, kālmāla, kāsamarda, kṣavaka, kharapuṣpa, viḍaṅga, kaṭphala, surabhī, nirguṇḍī, kulāhala, unduru karnikā, phañjī, prācībala, kākamācī* and *viṣamuṣṭi.*

सुरसादिर्गणो ह्येष कफहृत् कृमिसूदनः ।
प्रतिश्यायारुचिश्वासकासघ्नो व्रणशोधनः ॥ २३ ॥

Drugs of this group alleviate *kapha* and cure *kṛmi* (parasitic infection), *pratiśyāya* (rhinitis), *arucī* (anorexia), *śvāsa* (asthma) and *kāsa.* They help in the cleansing of ulcers.

९. मुष्ककपलाशधवचित्रकमदनवृक्षकशिंशपावज्रवृक्षास्त्रिफला चेति ॥२४॥

### (9) *Muśkakādi gaṇa*

The group includes *muṣkaka*, *palāśa*, *dhava*, *citraka*, *madama*, *vṛkṣaka*, *śiṁśapā*, *vajra vṛkṣa* and *triphalā*.

मुष्ककादिर्गणो ह्येष मेदोघ्नः शुक्रदोषहृत् ।
मेहार्शः पाण्डुरोगघ्नः शर्कराशन. परः' ॥ २५ ॥

[सुश्रुत: सूत्र: ३८ ८-२१]

Drugs of this group reduce *medas* (adiposity) and correct the vitiation of *śukra* (semen). They cure *meha* (obstinate urinary disorders including diabetes), *arśas* (piles), *pāṇḍu* (anemia), and *śarkarā* (gravels in the urinary tract).

१०. कृष्णाग्रन्थिकचव्यचित्रकविषाविश्वौषधाजाजिभिः ।
पाठारामरेणुकामधुरसासिद्धार्थतिक्तोषणै. ॥ २६ ॥
द्रेक्का शक्रयवाजमोदत्रुटिभिर्भार्गीविडङ्गान्वितैः ।

### (10) *Kṛṣṇādi gaṇa*

This group consists of *kṛṣṇā*, *granthika*, *cavya*, *citraka*, *viṣā*, *viśvauṣadha*, *ajāji*, *pāṭhā*, *rāmaṭha*, *reṇukā*, *madhurasā*, *siddhārtha*, *tiktā*, *uṣaṇa*, *drekkā*, *śakra yava*, *ajamoda*, *tṛti*, *bhārgī* and *viḍaṅga*.

एभिर्दीप्तकरश्च गुल्मशमनः शूलाममुत्पाचनः ।
11
श्लेष्मघ्नो रुचिकारको ज्वरहरः कृष्णादि रुक्तो गणः' ॥२७॥

Drugs of this group stimulate the power of digestion. They cure *gulma* (phantom tumour) and *śūla* (colic pain). They help in the *pācana* (metabolic transformation) of *āma*. They alleviate *kapha*, produce appetite and cure *jvara* (fever).

११. 'एलातगरकुष्ठमासीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशु-
क्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालुकगुग्गुलुसर्जरसतुरुष्ककुन्दुरुका-
गुरुस्पृक्कोशीरभद्रदारुकुंकुमानि पुन्नागकेशरं चेति ॥ २८ ॥

(11) *Elādi gaṇa*

This group consists of *elā, tagara, kuṣṭha, māṁsī, dhyāmaka, tvak, patra, nāga puṣpa, priyaṅgu, hareṇukā, vyāghra nakha, śukti, caṇḍā, sthauṇeyaka, śrīveṣṭaka, coca, coraka, vāluka, guggulu, sarja rasa, turuṣka, kunduruka, aguru, spṛkkā, uśīra, bhadra dāru, kuṁkuma* and *punnāga keśara.*

एलादिको वातकफौ निहन्याद्विषमेव च ।
वर्णप्रसादन. कण्डूपिडकाकोठनाशन: ॥ २९ ॥

Drugs of this group alleviate *vāyu* and *kapha*, cure *visa* (poisoning) and promote complexion. They also cure *kaṇḍū* (itching), *piḍakā* (pimples) and *koṭha* (urticarial rashes).

१२ वचातिविषजीमूतजपादारुसनागरै: ।
१३. हरिद्रे कलशीयष्टि तथा कुटजबीजकै: ॥ ३० ॥

(12) (13) *Vacādi* **and** *Haridrādi gana*

*Vacādi gaṇa* consists of *vacā. ativiṣa, jīmūta, japā, dāru* and *śuṇṭhī.*

*Haridrādi gaṇa* consists of *haridrā, dāru haridrā, kalaśī, yaṣti* and the seed of *kuṭaja.*

एतौ वचाहरिद्रादिगणौ स्तन्यविशोधनौ ।
आमातिसारशमनौ विशेषाद्दोषपाचनौ ॥ ३१ ॥'

[सुश्रुत: सूत्र ३८ : २४-२८]

Drugs belonging of both these groups help in the purification of the milk and alleviate *āma* as well as *atisāra* (diarrhoea). They specially help in the *pācana* (metabolic transformation) of *doṣas.*

१४. 'काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाछिन्नरुहा-कर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकऋद्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकं चेति ॥ ३२ ॥

## (14) *Kākolyādi gaṇa*

The group consists of *kākolī, kṣīra kākolī, jīvaka, ṛṣabhaka, mudgaparṇī, māṣaparṇī, medā, mahā medā, chinnaruhā, karkaṭa śṛṅgī, tugākṣīrī, padmaka, prapauṇḍarika, ṛddhi, vṛddhi, mṛdvīkā, jīvantī* and *madhuka.*

काकोल्यादिरयं पित्तशोणितानिलनाशनः ।
जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा ॥३३॥

Drugs belonging to this group alleviate *pitta*, blood and *vāyu.* They are vitalizing, nourishing and aphrodisiac. They produce more of milk and *kapha.*

१५. ऊषकसैन्धवशिलाजतुगुग्गुलुकासीसद्वयहिङ्गुतुत्थकं चेति ॥ ३४ ॥

## (15) *Ūṣakādi gaṇa*

This group consists of *ūṣaka, saindhava, śilājatu, guggulu,* both the types of *kāsīsa, hiṅgu* and *tutthaka.*

ऊषकादि कफं हन्ति गणो मेदोविशोषणः ।
अश्मरीशर्करामूत्रकृच्छ्रशूलकगुल्मनुत् ॥ ३५ ॥

Drugs belonging to this group alleviate *kapha* and help in the depletion of fat. They cure *aśmarī* (stone in urinary tract), *śarkarā* (gravels in the urinary tract), *mūtra kṛcchra* (dysuria), *śūlā* (colic pain) and *gulma* (phantom tumour).

१६. सारिवामधुकचन्दनकुचन्दनपद्मककाश्मरीफलमधूकपुष्पाण्युशीरं चेति ॥ ३६ ॥

## (16) *Sārivādi gaṇa*

This group consists of *sārivā, madhuka, candana, kucandana, padmaka, kāśmarī phala, madhuka puṣpa* and *uśīra.*

सारिवादिः पिपासाघ्नो रक्तपित्तहरो गणः ।
पित्तज्वरप्रशमनो विशेषात् दाहनाशनः ॥ ३७ ॥

Drugs belonging to this group cure *pipāsā* (morbid thirst), *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *pitta jvara* (fever caused by *pitta*). They specifically cure *dāha* (burning syndrome).

१७. अञ्जनरसाञ्जननागपुष्पप्रियङ्गुनीलोत्पलनलदनलिनकेशराणि मधुक चेति ॥ ३८ ॥

(17) *Añjanādi gaṇa*

This group consists of *añjana, rasāñjana, nāga puṣpa, priyaṅgu, nīlotpala, nalada, nalina, kesara* and *madhuka.*

अञ्जनादिर्गणो ह्येष रक्तपित्तनिबर्हणः ।
विषोपशमन दाहं निहन्त्याभ्यन्तरं भृशम् ॥ ३९ ॥

Drugs belonging to this group cure *rakta pitta* (a disease characterised by bleeding from different parts of the body) They cure *viṣa* (poisoning), and acute form of *ābhyantara dāha* (burning sensation inside the body).

१८. परूषकद्राक्षाकट्फलदाडिमराजादनकतकफलशाकफलानि त्रिफला चेति ॥ ४० ॥

(18) *Parūṣakādi gaṇa*

This group consists of *parūṣaka, drākṣā, kaṭphala dāḍima, rājādana, kataka phala, śāka phala* and *triphalā.*

परूषकादिरित्येष गणोऽनिलविनाशनः ।
12
मूत्रदोषहरो हृद्यः पिपासाघ्नो रुचिप्रदः ॥ ४१ ॥'

[सुश्रुतः सूत्र ३८ : ३५-४४]

Drugs belonging to this group alleviate *vāyu* and cure *mūtra doṣa* (urinary disorders). They are cardiac tonic. They cure *pipāsā* (morbid thirst) and produce appetite.

१९. 'बृहतीकण्टकारिकाकुटजफलपाठामधुक चेति ॥ ४२ ॥

(19) *Bṛhatyādi gaṇa*

This group consists of *bṛhatī, kaṇṭakārikā, kuṭaja phala, pāṭhā* and *madhuka.*

पाचनीयो बृहत्यादिर्गणः पित्तानिलापहः ।
कफारोचकहृद्रोगमूत्रकृच्छ्ररुजापहः ॥' ४३ ॥
[सुश्रुतः सूत्र ३८ : ३१-३२]

Drugs belonging to this group are carminative. They alleviate *pitta, vāyu* and *kapha.* They cure *arocaka* (anorexia), *hṛdroga* (heart disease) and *mūtra kṛcchra* (dysuria).

**आरोग्यचिन्तामणित:**

२०. 'गुडूची निम्बधान्यकं पद्मकं रक्तचन्दनम् ।

(20) *Guḍūcyādi gaṇa*

**According to** *Ārogya cintāmaṇi*

This group consists of *guḍūcī, nimba, dhānyaka, padmaka* and *rakta candana.*

तृष्णादाहारुचिच्छर्दि पिपासा [?] ज्वरनाशनः ।
13
गुडूच्यादिर्गणो ह्येष दीपनः प्राह सुश्रुतः ॥ ४४ ॥'

According to *Suśruta* drugs belonging to this group cure *tṛṣṇā* (morbid thirst), *dāha* (burning syndrome), *aruci* (anorexia), *chardi* (vomiting) and *jvara* (fever). They also stimulate the power of digestion.

२१. वत्सकातिविषामूर्वभार्ग्यैला कटुकोषणैः ।
वचाश्योनाक चोग्रा च पञ्चकोलाजमोदकैः ।
वेल्लाजगन्धासिद्धार्थजीरकद्वयहिङ्गुभिः ॥ ४५ ॥

(21) *Vatsakādi gana*

This group includes *vatsaka, ativiṣā, mūrvā, bhārgī, elā,*

*kaṭukā, uṣaṇa, vacā, śyonāka, ugrā, pañca kola, ajamodā, vella, ajagandhā, siddhārtha*, both the types *jīraka* and *hiṅgu*.

वत्सकाद्यो मरुत्श्लेष्मगुल्मार्शोज्वरशूलनुत् ।

Drugs belonging to this group alleviate *vāyu* and *kapha*, and cure *gulma* (phantom tumour), *arśas* (piles), *jvara* (fever) and *śūla* (colic pain).

२२. 'मुस्तापाठानिशेतिक्तावचैलारुग्विषाचरा: ॥ ४६ ॥

चापेला वाथ शार्ङ्गीष्ठा गणो मुस्तादिको स्मृत: ।

(22) *Mustādı gaṇa*

The group consists of *mustā, pāṭhā*, both the types of *niśā, tiktā, vacā, elā, ruk, viṣā, cara, āp, elā* and *śārṅgiṣṭhā.*

शोधन: पाचन· स्तन्य: स्तनरोगज्वरापह:[14] ॥ ४७ ॥

Drugs belonging to this group help in cleansing (*śodhana*). They are carminative and galactogogue. They cure *stana roga* (diseases of the breast) and *jvara* (fever),

२३. 'उत्पलं कुमुदं पद्म कल्हारं लोहितोत्पलम् ।

मधुकं चेति पित्तासृक्विपच्छर्दिहरोगण:[15] ॥ ४८ ॥'

(23) *Utpalādi gaṇa*

This group consists of *utpala, kumuda, padma. kalhāra* red variety of *utpala* and *madhuka.*

Drugs belonging to this group alleviate *pitta* and blood and cure *vıṣa* (poisoning) and *chardı* (vomiting).

२४. 'हरीतकी चामलकं विभीतक फलत्रयम् ।

**त्रिफला** फलमित्युक्त' सैव ज्ञेय फलत्रिकम् ॥ ४९ ॥

एकभागो हरीतक्यात् द्विगुणश्च विभीतक: ।

चतुर्गुणा चामलकी त्रिफलेय प्रकीर्तिता[16] ॥ ५० ॥'

## (24) *Triphalā*

Fruits of three drugs viz., *harītakī*, *āmalakī* and *vibhītakī* taken together are called *triphalā* or *phala trika*. For this purpose, one part of *harītakī*, two parts of *vibhītaka* and four parts of *āmalakī* should be taken.

'त्रिफला कफपित्तघ्नी मेहकुष्ठहरी सरा ।
चक्षुष्या दीपनी चैव विषमज्वरनाशिनी ॥ ५१ ॥'

[सुश्रुत : सूत्र ३८ : ५७]

*Triphalā* alleviates *kapha* as well as *pitta* and cures *meha* (obstinate urinary disorders including diabetes) as well as *kuṣṭha* (obstinate skin diseases including leprosy). It is laxative, promoter of eye sight and digestive stimulant. It cures *viṣama jvara* (irregular fever).

द्राक्षाखर्जूरकाश्मर्यफलानीति **फलत्रिकम्** ।
इय प्रोक्ता द्वितीया च त्रिफला चरकादिभिः ॥५२॥
रक्तपित्तादिदोषेषु त्रिफलेयं मता सदा ।

According to some, the fruits of *drākṣā*, *kharjūra* and *kāśmarya* taken together are also called *phala trika*. This second variety of *triphalā* is described by Caraka etc ,. This type of *triphalā* is useful in the treatment of diseases like *rakta pitta* (a disease characterised by bleeding from different parts of the body).

17

२५. 'पिप्पली मरिचं शुण्ठी त्रयमेतच्च मिश्रितम् ॥ ५३ ॥'

'**त्र्यूषणं** कफमेदोघ्नं मेहकुष्ठत्वगामयान् ।
निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि ॥ ५४ ॥'

[सुश्रुत : सूत्र ३८ : ५९]

## (25) *Tryūṣaṇa*

*Pippalī*, *marica* and *śuṇṭhī*—these three drugs mixed to-

gether are called *tryūṣaṇa*. It reduces *kapha* and *medas* and cures *meha* (obstinate urinary diseases including diabetes), *kuṣṭha* (obstinate skin diseases including leprosy) and *tvagāmaya* (skin diseases). It is digestive stimulant. It also cures *gulma* (phantom tumour), *pīnasa* (chronic rhinitis) and *mandāgni* (suppression of the power of digestion).

२६. 'नागरातिविषामुस्तं त्रयमेतत्त्रिकार्षितम् ।
कफपित्तानिलहरं ज्वरघ्नं ग्राहि दीपनम् ॥ ५५ ॥

(26) *Tri karṣita*

*Nāgara, ativiṣā* and *musta*—these three drugs taken together are called *tri karṣita*. It alleviates *kapha, pitta* and *vāyu* and cures *jvara* (fever). It is constipative and digestive stimulant.

२७. 'आमलक्यभयाकृष्णाचित्रकश्चेत्ययं गणः ।

(27) *Āmalakyādi gaṇa*

This group consists of *āmalakī, abhayā, kṛṣṇā* and *citraka*.

18

ज्वरघ्नश्चाक्षुषो वृष्यो भेदी चाग्निप्रदीपनः ॥५६॥

Drugs belonging to this group cure *jvara* (fever). They are promoter of eye sight, aphrodisiac, purgative and digestive stimulant.

२८. 'त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहमलम् ॥५७॥

(28) *Trapvādi gaṇa*

This group consists of *trapu, sīsa, tāmra, rajata, kṛṣṇa loha, svarṇa* and *loha mala*.

गणस्त्रप्वादिरित्येष रक्तकृमिहरः परः ।
पिपासाविषहृद्रोगपाण्डुमेहहरस्तथा ॥ ५८ ॥

Drugs belonging to this group cure vitiation of blood, *kṛmi* (parasitic infection), *pipāsā* (morbid thirst), *viṣa* (poison-

ing), *hṛdroga* (heart disease), *pāṇḍu* (anemia) and *meha* (obstinate urinary disorders including diabetes).

२६. लाक्षारेवतकुटजाश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छ-
दमालत्यस्त्रायमाणा चेति ॥ ५६ ॥

(29) *Lākṣādi gaṇa*

This group consists of *lākṣā, ārevata, kuṭaja, aśvamāra, kaṭphala,* both the types of *haridrā, nimba, saptacchada, mālatī* and *trāyamāṇā.*

कषायतिक्तमधुरः कफपित्तार्तिनाशनः ।
कुष्ठकृमिहरश्चैव दुष्टव्रणविशोधनः ॥ ६० ॥'

[सुश्रुतः सूत्र ३८ : ६२-६५]

Drugs belonging to this group are astringent, bitter and sweet. They alleviate vitiation of *kapha* and *pitta.* They cure *kuṣṭha* (obstinate skin diseases including leprosy) and *kṛmi* (parasitic infection) They help in the cleansing of *duṣṭa vraṇa* (suppurated ulcer).

**पंचकान्वक्ष्यामः**

३०. 'पृश्निपर्णी शालिपर्णी बृहतीद्वयगोक्षुरैः ।
बृंहणं वातपित्तघ्नं **कनीयः पञ्चमूलकम्** ॥
कषायतिक्तमधुरं सन्निपातशिरोर्तिनुत ॥ ६१ ॥

(30) *Kṣudra pañcamūla*

**Groups having five ingredients**

*Pṛśni parṇī, śāla parṇī,* both the varieties of *bṛhatī* and *gokṣura*—all these drugs taken together are called *kanīyas pañca mūla.* It is nourishing, alleviator of *vāyu* and *pitta* and astringent, bitter as well as sweet in taste. It cures diseases caused by the simultaneous vitiation of all the three *doṣas* (*sannipāta*) and *śirorti* (headache).

३१. बिल्वोऽग्निमन्थः श्योनाकः काश्मरी पाटला महत ।

दीपन कफवातघ्नं **पञ्चमूलमिद महत्** ॥ ६२ ॥

(31) *Mahat pañca mūla*

*Bilva, agnimantha, śyonāka, kāśmarī* and *pāṭalā*—these five drugs taken together, constitute *mahat pañca mūla.* It stimulates digestion and alleviates *kapha* as well as *vāyu,*

प्रायस्त्रिदोषशमनं पवनामयेषु,
श्लेष्मोल्वणेषु च गदेषु भिषग्भिरुक्तम् ।
कासेसु सन्निपतितेषु शिरोरुजायां,[19]
श्वासेषु हिक्केषु हितं **दशमूलमेतत्** ॥ ६३ ॥'

*Daśa mūla*

Drugs of both *kṣudra pañca mūla* and *mahat pañca mūla* groups, taken together, constitute *daśa mūla.* It generally alleviates all the three *doṣas* and is effective specially when *vāyu* and *kapha* are aggravated in excess. It is also useful in *kāsa* (bronchitis) caused by the simultaneous aggravation of all the three *doṣas*, *śiroruk* (headache), *śvāsa* (asthma) and *kikkā* (hiccup).

३२. 'विदारी सारिवा छागशृंगी वत्सादनी निशा ।

वृष्यं पित्तानिलं हन्याद्वल्लिजं **पञ्चमूलकम** ॥६४॥

(32) *Vallıja pañca mūla*

*Vidārī, sārivā, chāga śṛṅgī, vatsādanī* and *nıśā*—these five drugs taken together are called *vallıja pañca mūla.*

It is aphrodisiac and it alleviates *pitta* as well as *vāyu.*

३३. करमर्दकसैरीयत्रिकंटकशतावरी ।

तथा गृध्रनखी चेति **पञ्चकंटकसञ्ज्ञकः** ॥ ६५ ॥

रक्तपित्तहरो ह्येष शोफरोगविनाशनः ।

शुक्रमेहहरश्चैव शुक्रदोषहरः परः ॥ ६६ ॥

(33) *Pañca kaṇṭaka*

*Kara mardaka, sairīya, tri kaṇṭaka, śatāvarī* and *gṛdhra nakhī*—these five drugs taken together are called *pañca kaṇṭaka.* It cures *rakta pitta* (a diseases characterised by bleeding from different parts of the body), *śopha* (oedema), *śukra meha* (spermaturia) and *śukra doṣa* (vitiation of semen).

३४. कुशः काशो नलो दर्भः कांडेक्षुरिति तद्विदः ।

तृणपञ्चमूलं ज्ञेय दाहप्रशमने हितम् ॥

20

पित्तमूत्रविषार्तानां प्रशस्तं वस्तिशोधनम् ॥ ६७ ॥'

(34) *Tṛṇa pañca mūla*

*Kuśa, kāśa, nala, darbha* and *kāṇḍekṣu*—the roots of these five drugs taken together are called *tṛṇa pañca mūla.* It is useful in the treatment of *dāha* (burning syndrome), vitiation of *pitta* as well as urine and *viṣa* (poisoning). It cleanses the urinary bladder.

३५. कदम्बवाजिकर्णश्च करंजः क्षवको गुडः ।

वर्गोऽयं कफपाण्डुत्वक्कुष्ठमेहविषापहः ॥ ६८ ॥

(35) *Kadambādi gaṇa*

The group consists of *kadaṁba, vāji karṇa, karañja, kṣavaka* and *guḍa.* They cure vitiated *kapha, pāṇḍu* (anemia), *tvak roga* (ordinary skin diseases), *kuṣṭha* (obstinate skin diseases including leprosy), *meha* (obstinate urinary disorders including diabetes) and *viṣa* (poisoning).

३६. करंजो वत्ससैरीयसुषवीसप्तपर्णकाः ।

मेहकुष्ठज्वरच्छर्दिविषश्लेष्महरो गणः ॥ ६९ ॥

(36) *Karañjādi gaṇa*

This group consists of *karañja, vatsa, sairīya, suṣavī* and

*sapta parṇa*. They cure *meha* (obstinate urinary disorders including diabetes), *kuṣṭha* (obstinate skin diseases including leprosy), *jvara* (fever), *chardi* (vomiting), *viṣa* (poisoning) and vitiation of *kapha*.

३७. पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः ।
**दीपनीयः** स्मृतो वर्गः कफानिलगदापहः ॥ ७० ॥

[पञ्चकोलम्]

(37) *Pañca kola*

This group consists of *pippalī, pippalī mūla, cavya, citraka* and *nāgara*. They stimulate the power of digestion and cure diseases caused by *kapha* and *vāyu*.

समासेन गणाह्येते प्रोक्तास्तेषां च विस्तरम् ।
चिकित्सितेषु वक्ष्यामि ज्ञात्वा दोषबलाबलम् ॥७१॥

In brief these are the various groups of drugs. Keeping in view the strength and otherwise of the *doṣas*, their details will be described in the section dealing with the treatment of diseases.

॥ इति सप्तत्रिंशद्गणोद्देशः सुश्रुतात् ॥

Thus ends the 37 groups of drugs as described in *Suśruta*.

शणमूलकशिग्रूणि फलानि तिलसर्षपाः ।
सक्तवः किण्वमतसी द्रव्याण्युक्तानि **पाचनं** ॥ ७२ ॥

*Pācana gaṇa*

The fruits of *śaṇa*, *mūlaka* and *śigru*, *tila*, *sarṣapa*, *saktu*, *kiṇva* and *atasī*—these drugs help in suppuration (*pācana*).

चिरबिल्वोऽग्निको दन्ती चित्रको हयमारकः ।
कपोतकंकगृध्राणां पुरीषाणि च **दारणम्** ॥ ७३ ॥

### *Dāraṇa gaṇa*

*Cirabilva, agnika, dantī, citraka, haya māraka* and the stool of *kapota, kaṅka* and *gṛdhra*—these drugs help in the incission of the abscess.

द्रव्याणां पिच्छिलानां च त्वङ्मूलानि **प्रपीडनं** ।
यवगोधूममाषाणां चूर्णानि च समासतः ॥ ७४ ॥

### *Prapīḍāna gaṇa*

The bark and root of drugs which are slimy and the powder of *yava, godhūma* and *māṣa* help in *prapīḍana* (which takes out pus by exerting pressure).

शंखिनी कोद सुमनः करवीर सुवर्चला ।
**शोधनानि** कषायाणि वर्गश्चारग्वधादिकः ॥ ७५ ॥

### *Śodhana kasāya*

*Śaṅkhinī, koda, sumanas, karavīra suvarcalā* and drugs belonging to *āragvadhādi* group—their decoctions help in the cleansing of wounds.

अजगन्धा च शृङ्गी च गवाक्षी लागलाह्वया ।
पूतीकचित्रकपाठाविडङ्गैलाहरेणवः ॥ ७६ ॥
कटुत्रयं यवक्षारो लवणानि मनःशिला ।
21
कासीसं त्रिफला दन्ती हरिताल सुराष्ट्रजा ॥ ७७ ॥
सशोधनीनां **वर्तीनां** द्रव्याणि तानि निर्दिशेत् ।

### *Saṁśodhana varti*

*Ajagandhā, śṛṅgī, gavakṣī, lāṅgala, pūtīka, citraka, pāṭhā, viḍaṅga, elā, hareṇu, trikaṭu, yava kṣāra,* various types of salt, *manaḥśila, kāsīśa, triphalā, dantī, haritāla* and *suraṣṭrajā*—these are the ingredients of the potion of suppository for cleansing of wounds.

एतैरप्यौषधैः कुर्यात्कल्पनापि च शोधने ॥ ७८ ॥

These drugs can also be used through different other pharmaceutical processes for the cleansing of wounds.

गोमूत्रं गोमयं क्षीरं दधि सर्पिस्तथैव च ।

समं संयोजितं ज्ञेयं पञ्चगव्यमिद बुधैः ॥ ७९ ॥

*Pañca gavya*

The urine, dung, milk, curd and ghee of cow taken together (in equal quantity ?) is called *pañca gavya.*

एवं संयोजयेत्प्राज्ञो पञ्चाजं पञ्चमाहिषम् ।

If these are collected from goat (*ajā*) then the collective term used for them is *pañcāja* and if collected from buffalo (*mahiṣa*) then they are called *pañca māhiṣa.*

कासीसकटुरोहिण्याः जातीकन्दहरिद्रयोः ॥ ८० ॥

पूर्वोद्दिष्टे तु पञ्चाङ्गे कुर्यात्तैलघृतानि वै ।

**Medicated oil & Ghee**

Medicated oil and ghee should be prepared of either *pañca gavya* or *pañcāja* or *pañca māhiṣa* by adding *kāsīsa, katu rohiṇī,* root of *jāti* and *haridrā.*

अर्कोत्तमास्नुहीक्षीरं पिष्ट्वा क्षारोत्तमान्यपि ॥८१॥

जातीमूलंहरिद्रे द्वे कासीसं कटुरोहिणी ।

पूर्वोद्दिष्टानि चांगानि कुर्यात् संशोधनं घृतम् ॥८२॥

*Saṁśodhana ghṛta*

The best variety of *arka* should be made to a paste by adding the latex of *snuhī.* To this, the best of alkalies and the root of *jātī,* both the varieties of *haridrā, kāsīsa, kaṭu rohinī* and

*pañca gavya* or *pañcāja* or *pañca māhiṣa* should be added. With these drugs the medicated ghee which is useful in cleansing of ulcers should be prepared.

मयूरको राजवृक्षो निंबकोशातकी तिलाः ।
बृहत्यौ च शिलाले च शोधनानि च शोधने ॥ ८३ ॥

*Śodhana taila*

The medicated oil which is prepared of *mayūraka*, *rāja-vṛkṣa*, *nimba*, *kośātakī*, *tila*, both the types of *bṛhatī*, *śilā* and *āla* is useful for cleansing of ulcers.

तैले द्रव्याणि योज्यानि शेषाणि च तथा शृणु ।
कासीसं सैन्धवं किण्वं वचा च रजनीद्वयम् ।
संशोधनेषु चान्येषु चूर्णं कुर्वीत शोधनम् ॥ ८४ ॥

*Śodhana cūrṇa*

The potion prepared by adding powders of *kāsīsa*, *sain-dhava*, *kiṇva*, *vacā* and both the varieties of *rajanī* is useful for cleansing ulcers.

सालसारादि सारेषु पटोली त्रिफलासु च ।
रसक्रिया विधातव्या शोधनं शोधनेषु च ॥ ८५ ॥

*Śodhana rasakriyā*

The *rasakriyā* prepared of the drugs belonging to *sāla-sārādi* group, *paṭolī* and *triphalā* is useful for cleansing ulcers.

कषायाणामनुष्णातिरूक्षाणां[22] त्वक्षु[23] साधितम् ।
शृतशीतं कषायं तु रोपणार्थं प्रशस्यते ॥ ८६ ॥

*Ropaṇa kaṣāya*

The boiled and cooled decoction of astringent barks

which are not very hot in potency and which are exceedingly ununctuous is useful for healing ulcers.

सोमामृताश्वगन्धा च काकोल्यादौ गणे तथा ।

क्षीरिप्ररोहेष्वपि च **वर्तयो रोपणाः** स्मृताः ॥ ८७ ॥

*Ropaṇa varti*

The suppository prepared of *soma, amṛtā, aśva gandhā,* drugs belonging to *kākolyādi* group, *praroha* (adventitious root) of *kṣiri vṛkṣas* helps in the healing of ulcers.

समगा सोमसरला सोमवल्का सचन्दना ।

काकोल्यादिश्च **कल्कः** स्यात्प्रशस्तो **व्रणरोपणे** ॥८८॥

*Ropaṇa kalka*

The paste prepared of *samangā, soma, saralā, soma valkā, candana* and the drugs belonging to the *kākolyādi* group is useful in the healing of ulcers.

पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता ।

काकोल्यादिश्च योज्यः स्याद्भिषजा **रोपणे घृते** ॥८९॥

*Ropaṇa ghṛta*

The medicated ghee for healing of ulcers is prepared of *pṛthak parṇī, ātma guptā,* both the varieties of *haridrā, mālatī, sitā* and drugs belonging to *kākolyādi* group.

कालानुसार्यगुरुणि हरिद्रे भद्रदारु च ।

प्रियङ्गवश्च लोध्र च **तैले** योज्यानि **रोपणे** ॥ ९० ॥

*Ropana taila*

The medicated oil for healing of ulcers is prepared of *kālānusārī, aguru,* both the types of *haridrā, bhadra dāru, priyaṅgu* and *lodhra*.

किंशुका त्रिफला लोध्रं कासीसं श्रवणाह्वया ।
धवाश्वकर्णयोस्त्वक्च रोपणं चूर्णमिष्यते ।
रसक्रिया रोपणार्थे विदधीत यथाक्रमम् ॥ ९१ ॥

*Ropaṇa cūrṇa & Rasa kriyā*

The powder of *kiṁśukā, triphalā, lodhra, kāsīsa, śravaṇā* and the bark of *dhava* as well as *aśva karṇa* is useful in the healing of ulcers. *Rasa kriyā* of these drugs also helps in the healing of ulcers.

अपामार्गाश्वगन्धा च तालपत्री सुवर्चला ।
उत्सादने प्रशस्यन्ते काकोल्यादिश्च यो गणः ॥९२॥

*Utsādana*

*Apāmārga, aśva gandhā, tāla patrī, suvarcalā* and drugs of *kākolyādi gaṇa* help in the filling up of ulcers by granulation tissue.

कासीसं सैंधवं किष्कं [?] कुरुविन्दो मनःशिला ।
कुक्कुटाण्डकपालानि सुमनो मुकुलानि च ॥ ९३ ॥
फले शैरीषकारञ्जे धातुचूर्णानि यानि च ।
व्रणेषूत्सन्नमांसेषु प्रशस्तान्यवसादने ॥ ९४ ॥

*Avasādana*

When there is granulation tissue in excess, then to bring it to proper level, drugs like *kāsīsa, saindhava, kiṣka, kuruvinda, manaḥśilā, kukkuṭāṇḍa kapāla,* buds of *sumana*, fruits of *sirīṣa* and *karañja* and powder of metals are useful.

समस्तवर्गमर्धं वा यथालाभमथापि वा ।
प्रयुञ्जीतभिषक् प्रायो यथोद्दिष्टेषु कर्मसु ॥ ९५ ॥

**Selection of drugs**

The physician should select either the whole group or half of it or whatever is readily available out of these drugs and use them in therapy.

अथ चिकित्साकलिकात:

'वटीवटोदुम्बरवेतसानामश्वत्थवृक्षेण समन्वितानाम् ।
24
त्वक्पंचकं पंचमहीरुहाणामिति व्रणघ्नं श्वयथुघ्नमेतत् ॥' ९६ ॥

॥ इति पञ्चवल्कलम् ॥

**According to** *Cikitsā kalikā*

Barks of five trees viz., *vaṭī, vaṭa, udumbara, vetasa* and *aśvattha* cure ulcers and inflammation. These are called *pañca valkala*.

'द्वौ काकोल्यौ जीवकः सार्षभः स्या—
न्मेदायुग्मं सार्द्धि [?] ऋद्धिश्च वृद्धया ।

इत्युद्दिष्टैरष्टवर्गः प्रदिष्टः
पित्तघ्नोऽयं गर्भदो बृंहणश्च ॥ ९७ ॥

॥ अष्टवर्गः ॥

*Aṣṭa varga*

Two varieties of *kākolī, jīvaka, ṛṣabhaka,* both the varieties of *medā, ṛddhi* and *vṛddhi*—these eight drugs taken together are called *aṣṭa varga.* It alleviates *pitta,* promotes conception and nourishment.

रसोनकन्दवत्कन्दं निःसारं सूक्ष्मपत्रकम् ।
जीवकर्षभकावेतौ हेमाद्रिशिखरोद्भवौ ॥ ९८ ॥

॥ इत्यष्टवर्गलक्षणम् ॥

**Description**

*Jīvaka* and *ṛṣabhaka* grow in the peaks of the Himalayas.

Its *kanda* (underground stem) is like that of the garlic. Its leaves are thin and fine.

**ग्रन्थान्तरात्**

जीवकः कूर्चकाकारो ऋषभो वृषशृङ्गवत् ।

**According to another text**

*Jivaka* has the shape of a *kūrcaka* (brush). *Ṛṣabhaka* is like the horn of a bull in shape.

श्वेतलोमान्वितं कन्दं लताजातं सरं ध्रुवम् ।

ऋद्धि वृद्धीति विज्ञेया विख्याता कोशयामले ॥९९॥

*Ṛddhi* and *vṛddhi* which are well known in *koṣayāmala* are the roots of creepers. These roots are covered with white hairs. They are certainly laxative.

मूलग्रन्थिसमं ऋद्धिर्वामावर्त्तफला तथा ।

'वृद्धिस्तु दीक्षणावर्त्तफलालक्ष्मकियत्कृतं ॥ १०० ॥

*Ṛddhi* is like a knot in the root and its fruit takes an anti-clock wise turn. On the other hand, *vṛddhi* has fruits which take a clock-wise turn.

25

शुष्कार्द्रकनिभ कद स्निग्धं मधुरशीतलं ।"

महामेदेति विख्यातो दुर्गन्धो मेद उच्यते ॥१०१॥

*Mahā medā*, which is a root, looks like a piece of dried ginger. It is unctuous, sweet and cooling. It has a foul smell of fat.

मेदा शुक्ला नखछेद्या मेदोधातुवदादिशेत् ।

*Medā* is white. It can be cut with the help of finger nail. Itlooks like fat tissue.

पीवरीव[?]निभस्कंदः सक्षीरं ससुगन्धिकम् ॥१०२॥

काकोली क्षीरकाकोली अधोर्ध्वं तं विनिर्दिशेत् ।

*Kākolī* and *kṣīra kākolī* have roots like those of *pīvarī.* They contains milky latex and they are fragrant. The lower part of it is known as *kākolī* where as the upper part is called *kṣīra kākolī.*

26

ईषच्छुक्ला तु काकोली क्षीरवत्पाण्डुराऽपरा ॥१०३॥

॥ इत्यष्टवर्गलक्षणम् ॥

*Kākolī* is slightly white in colour where as *kṣīra kākolī* is yellowish white like milk.

Thus ends the description of drugs belonging the group of *aṣṭavarga.*

**ग्रन्थान्तरात्**

कुष्ठमासी हरिद्राभिर्मुराशैलेयचंपकैः ।
वचा कर्पूरमुस्तैश्च सर्वौषधिकमुच्यते ॥ १०४ ॥
भूतप्रेतग्रहहरा ज्वरघ्नी श्रीप्रदायिनी ।
सर्वौषधिस्तु विज्ञेया पामाप्रस्वेदनाशिनी ॥१०५॥

॥ इति सर्वौषधी ॥

*Sarvauṣadhi*

**From another Text**

*Kuṣṭha, māṁsī, haridrā, murā, saileya, campaka, vacā, karpūra* and *mustā*—these drugs taken together are called *sarvauṣadhi.* It alleviates the afflictions of *bhūta* (evil spirits), *pretas* and *graha.* It cures *jvara* (fever). It endows the person with auspiciousness. It also cures *pāmā* (eczema) and *prasveda* (excessive sweating).

सर्वौषधिक संमिश्रा संशुष्कामलकत्वचा ।

सुगन्धामलकानीति पित्तकृद्रुग्जयेत्तथा ॥ १०६ ॥

॥ इति सुगन्धामलकम् ॥

*Sugandhāmalaka*

If the fruit pulp of *āmalakī* is added to the group of drugs called *sarvauṣadhi* then it is called *sugandhāmalaka.* It cures diseases caused by the vitiation of *pitta.*

**धूर्जटिः**

शालूकतुत्थश्रीपुष्पैस्त्रिसुगन्धिभवेत्तथा ।

शालूकपत्री संयुक्तं चातुर्जातकमीरितम् ॥ १०७ ॥

कफपित्तास्यगन्धघ्नं सूदविज्ञैः प्रपूजितम् ।

*Tri sugandhi & Cātur jātaka*

**According to** *Dhūrjaṭi*

*Śāluka, tuttha* and *śrī puṣpa*—these three drugs taken together are called *tri sugandhi* If *śāluka patrī* is added to it then it is called *cātur jātaka.* It alleviates *kapha* as well as *pitta* and removes foul smell of mouth. It is highly praised by persons who are well versed in the science of cooking.

**अन्यच्च**

त्वगेलापत्रकैस्तुल्यं त्रिसुगन्धि त्रिजातकम् ॥ १०८ ॥

नागकेशरसंयुक्तं चातुर्जातकमीरितम् ।

हृल्लासविषदुर्गन्धिवातश्लेष्महरे मते ॥ १०९ ॥

॥ इति त्रिसुगन्धिचातुर्जातके ॥

**Another view**

*Tvak, elā* and *patra*—these three drugs taken in equal quantity are called *tri sugandhi* or *tri jātaka.* If *nāga keśara* is added to it, then it is called *cātur jātaka.* Both of them cure *hṛllāsa* (nausea), *viṣa* (poisoning), *durgandhi* (foul smell) and vitiation of *vāyu* and *kapha.*

कंकोलकं पूगफलं लवङ्गकुसुमानि च ।
जातिफलानि कर्चूरमेतत्पञ्चसुगन्धिकम् ॥ ११० ॥

[योगरत्नाकर: पृष्ठ ६६]

*Pañca sugandhi*

*Kaṅkola, pūga phala, lavaṅga, jāti phala* and *karcūra*—these five drugs taken together are called *pañca sugandhika.*

चन्दनं कुंकुमं तुल्ये वरार्धमभिधीयते ।
त्रिभागं कुंकुमं यत्र तदुक्तं चाद्यपुष्पकम् ॥ १११ ॥

*Varārdha & Ādya puṣpaka*

*Candana* and *kuṁkuma* taken together in equal quantity are called *varārdha.* If three parts of *kuṁkuma* is added then it is called *ādya puṣpaka.*

कुंकुमागुरुकर्पूरकस्तूरीचन्दनानि च ।
महासुगन्धिमित्युक्तं नामतो यक्षकर्दमम् ॥ ११२ ॥

[योगरत्नाकर: पृष्ठ ६६]

*Mahā sugandhi*

*Kuṁkuma, aguru, karpūra, kastūrī* and *candana*—these drugs taken together are called *mahā sugandhi* and named as *yakṣa kardama.*

द्राक्षादाडिमखर्जूरमृदितं स्यात्सशर्करम् ।
27
लाजाचूर्णं समध्वाज्यं सतर्पणमुदाहृतम् ॥ ११३ ॥

[योगरत्नाकर: पृष्ठ ६८]

*Saṁtarpaṇa*

The potion prepared of *drākṣā, dāḍima* and *kharjūra* mixed with sugar and powder of *lājā* along with honey and ghee is called *saṁtarpaṇa* or refreshing drink.

**अथ षड्रसानि द्रव्याण्युपदेक्ष्याम:**

घृतक्षीरवसामज्जा शालिगोधूमषष्टिका: ।
कशेरुक च शृङ्गाट गिलोड्यैर्वारुमूत्रला: ॥ ११४ ॥
काकोल्यादिर्गणोऽलाबुकालक कतकाश्मरी ।
भक्षखर्जूरकद्राक्षापद्मकर्कटिका तथा ॥ ११५ ॥
मधूकेक्षुविकाराणि राजादनबलात्रयम् ।
पयस्विनी तालजया पयस्या गोक्षुरस्तथा ॥ ११६ ॥
कूष्मांड कदलीमांसं मौक्तिकं क्षीरमोरट: ।
प्रियालमज्जावातामैर्वर्गोऽयं **मधुरो** मत: ॥ ११७ ॥
जया कपिकच्छू ।

**Classification of drugs according to their taste**

**Group of Sweet Drugs**

Ghee, milk, muscle fat, marrow, *śāli, godhūma, ṣaṣṭika, kaśeruka, śṛṅgāṭa, gilodya, ervāru, mūtrala* drugs, drugs belonging to *kākolyādi* group, *alābu, kālaka, kataka, kāśmarī, bhakṣa, kharjūraka, drākṣā, padma, karkaṭikā, madhūka,* sugar cane products, *rājādana,* three varieties of *balā, payasvinī, tāla, jayā, payasyā, gokṣura, kūṣmāṇḍa, kadalī,* meat, *muktā, kṣira morața, priyāla majjā* and *vātāma*—these belong to the group of sweet drugs.

*Jayā* is popularly called *kapi kacchū.*

दाडिमं मातुलुंग च प्राचीनामलकं तथा ।
दधित्थामलकं चिचा नीपकोशाम्रनिंबुकम् ॥ ११८ ॥
भव्यपालेवत कोललकुच वेत्रज फलम् ।
बदरं चाथ जंबीरं करुणं चाम्लवेतसम् ॥ ११९ ॥
रजताम्रातकं चैव चणकाम्ल सकांजिकम् ।

चांगेरीतक्रदध्यम्लं सुरासौवीरशुक्तकम् ॥ १२० ॥

तुषोदक च धान्याम्ल प्रभृतिश्चाम्लवर्गकः ।

**Group of sour drugs**

*Dāḍima, mātuluṅga, prācīnāmalaka, dadhittha, āmalaka, ciñcā, nīpa, kośāmra, nimbuka, bhavya, pālevata, kola, lakuca,* fruit of *vetra, badara, jambīra, karuṇa, amla vetasa, rajata, āmrātaka, caṇakāmla, kāñjika, cāngerī, takra, dadhyamla, surā, sauvīra. śuktaka, tuṣodaka, dhānyāmla* etc., belong to the group of sour drugs.

सैन्धवाक्षविडंपाक्यं रोमकं सागरोद्भवम् ॥ १२१ ॥

यवक्षारो खप्रसूतं स्वर्जिका नवसारकः ।

एव लवणवर्गः स्यात्,

**Group of saline drugs**

*Saindhava, akṣa, viḍa, pākya, romaka, sāmudra, yava kṣāra, kha prasūta, svarjikā* and *navasāraka*—these belong to the group of saline drugs.

कटुवर्गमथो शृणु ॥ १२२ ॥

शिग्रुश्च सुरसादिश्च पिप्पल्यादिस्तथागणः ।

व्योषामयरसोनं च चंडा सुमुखमूलकम् ॥ १२३ ॥

सुराह्वाबल्गुजफलं कालनिर्यासलाङ्गली ।

पीलूकशुकनासाह्वलवगादिभिरुत्तमः ।

28

ज्ञेयः कटुकवर्गोऽय कर्पूरेणसमन्वितः ॥ १२४ ॥

व्योषा शतपुष्पी ।

**Group of pungent drugs**

*Śigru,* drugs of *surasādi* and *pippalyādi* groups, *vyoṣā, āmaya, rasona, caṇḍā, sumukha, mūlaka, surāhvā,* fruit of *abalguja,* extract of *kāla, lāṅgalī, pīluka, śuka nasāhva, lavaṅga* etc.,—these belong to the group of pungent drugs.

*Vyoṣā* is popularly called *śata puṣpī,*

व्याधिघ्नादि गुडूच्यादि माण्डूकी वैजयन्तिका ।
हरिद्राद्वयशक्राह्ववरुणेक्षुरशंखिनी ॥ १२५ ॥
दन्तीद्रवन्ती बृहतीश्यामासप्तच्छदस्तथा ।
व्याघ्री कोशफला तिक्ता कर्कोटी कारवेल्लिका ॥१२६॥
वार्ताकुकारवीगोपाकटभीशशिवाटिका ।
तथा वेत्रकरीराणि सुमना करवीरकौ ॥ १२७ ॥
त्रायमाणा वृश्चिकाली कुमारी पाटिका वृषा ।
शंखपुष्पी मेषशृङ्गी तथा मर्कटपिप्पली ॥ १२८ ॥
स्वादुकंटककस्तूरी बिम्बनिर्गुण्डिका तथा ।
द्रव्यैरेवंविधैश्चान्यैस्तिक्तवर्ग उदाहृत: ॥ १२९ ॥
स्वादुकंटको विकंकतवृक्ष: । शंखिनी यवतिक्ता ॥१३०॥

**Group of bitter drugs**

Drugs of *vyādhighnādi* and *guḍūcyādi* groups, *māṇḍūkī, vaijayantikā,* both the varieties of *haridrā, śakrāhva, varuṇa, ikṣura, śaṁkhinī, dantī, dravantī, bṛhatī, śyāmā, saptacchada, vyāghrī, kośaphalā, tiktā, karkoṭī, kāravellikā, vārtāku, kāravī, gopā, kaṭabhī, śaśī, vāṭikā, vetra, karīra, sumanā, karavīra, trāyamāṇā, vṛścikālī, kumārī, paṭikā, vṛṣā, śaṁkha puṣpī, meṣa-śṛṅgī, markaṭa, pippalī, svādu kaṇṭaka, kastūrī, bimba, nirguṇḍī*—these and such other drugs belong to the group of bitter drugs.

*Svādu kaṇṭaka,* is called *vikaṅkata vṛkṣa. Śaṅkhinī* is known as *yava tiktā.*

न्यग्रोधादि: प्रियंग्वादि: काककोलादिकस्तथा ।
अम्बष्ठादिश्च त्रिफला जम्बाम्रवकुलोद्भव: ।
स्फूर्जनागवधूशाकवनस्पतिफलानि च ॥ १३१ ॥



"सालसारादिकं चैव कतकस्य फलानि च ॥१३२॥"

झिण्टो सुकुण्डली चिल्ली जीवन्ती सुनिषण्णकः ।

कलम्बुषा निपालङ्कीप्रभृतीनि तथैव च ।

मुद्गनीवारकाद्याश्च कषायो वर्गसंज्ञितः ॥ १३३ ॥

काककोलादिकः लोध्रादिकः ॥ कुण्डली कांचनारः ॥

स्फूर्जस्तिन्दुकः ॥ नागवधू सल्लकीत्यर्थः ॥ १३४ ॥

**Group of astringent drugs**

Drugs of *nyagrodhādi, priyaṅgvādi, kākakolādi,* and *ambaṣṭhādi* groups, fruits of *triphalā, jambu, āmra, vakula, sphūrja, nāga vadhū, śāka* and *vanaspati,* drugs of *sālasārādi* group, fruits of *kataka, jhiṇṭa, sukuṇḍalī, cillī, jīvantī, sunisaṇṇaka, kalambuṣā, nipālaṅkī* etc., *mudga, nīvāra* etc.,—these belong to the group of astringent drugs.

*Kākakolādi* group is the same as *lodhrādi* group. *Kuṇḍalī* is called *kāñcanāra. Sphūrja* is called *tinduka. Nāga vadhu* is known as *sallakī.*

॥ इति षड्रसानि द्रव्याणि ॥

Thus ends, the description of drugs classified according to their tastes.

मूर्वाम्लिकादहनसूरणसैन्धवानां योगो भवेत्पञ्चहुताशनाख्यः ।

दुर्नामसन्दाग्नियकृद्ग्रहामयं लीढ्वाढ्यवातदलनेष्वयमेवशस्तः ॥१३५॥

[पञ्चाग्निः]

*Pañcāgni*

*Mūrvā, amlikā, dahana, sūraṇa* and *saindhava*—these drugs taken together are called *pañca hutāśana.* It cures *durnāman* (piles), *mandāgni* (loss of the power of digestion), *yakṛdroga* (diseases of liver) and *grahāmaya* (diseases caused by the affliction of *grahas*). When taken in the form of a linctus, it cures *āḍhya vāta* (gout) successfully.

अथातः संप्रवक्ष्यामि द्रव्यं संशोधनादिकम् ।
यथा संशोधनादौ तु न मोहं गच्छति क्वचित् ॥ १३६॥

**Groups of drugs for** ***saṁśodhana*** **etc.,**

Now groups of drugs used for elimination of *doṣas* are being described so that no mistake is committed in the administration of therapies.

'मदनकुटजजीमूतकेक्ष्वाकुधामार्गवलोध्रकृवेतधनसर्षप-
विडङ्गपिप्पलीकरञ्जप्रपुन्नाटकोविदारकर्बुदारारिष्टा-
श्वगन्धामधूकसारविदुलबन्धुजीवकश्वेताशणपुष्पीबिंबी-
वचेन्द्रवारुणीद्वयं चेत्यूर्ध्वभागहराणि ॥ १३७ ॥

**Drugs for Emesis**

*Madana, kuṭaja, jīmūtaka, ikṣvāku, dhāmārgava, lodhra, kṛtavedhana, sarṣapa, viḍaṅga, pippalī, karañja, prapunnāṭa, kovidāra, karbudāra, ariṣṭa, aśva gandhā, madhūka sāra, vidula, bandhu jīvaka, śvetā, śaṇa puṣpī, bımbī, vaca* and both the varieties of *indra vāruṇī*—these drugs help in the elimination of *doṣas* through the upward tract.

30

त्रिवृद्दन्तीद्रवन्तीसप्तलाशङ्खिनीविषाणिका गवाक्षी-
छागलान्त्रीनीलिनीफलस्नुक्सुवर्णक्षीरीचित्रककिणिही-
तिल्वककंपिल्लकचम्पकरम्यकपाटलापूगहरीतक्यामल-
विभीतकलिंगीकनकफलगुडैरण्डपूतीकमहावृक्ष-
सप्तच्छदार्कारग्वधपत्रज्योतिष्मतीचेत्यधोभागहराणि
॥ १३८ ॥

**Drugs for purgation**

*Trivṛt, dantī, dravantī, saptalā, śaṁkhinī, viṣāṇikā, gavākṣī, chāgalāntrī, nīlinī, phala, snuk, suvarṇa kṣīrī, citraka, kiṇihī, tilvaka, kaṁpillaka, campaka, ramyaka, pāṭalā, pūga, harītakī, āmala, vibhītaka, liṅgī, kanaka phala, guḍa, eraṇḍa, pūtīka, mahā vṛkṣa, sapta cchada, arka, āragvadha, patra, jyotiṣmatī*—these drugs help in the elimination of *doṣas* through the downward tract.

अत्र[31] तिल्वकादीनां मूलानि ।। पूगादीनामेरण्डान्तानां
फलानि ।। पूतीकारग्वधयोः पत्राणि ।। क्षीरिणां[32]
क्षीराणीति ।। १३९ ।।

Of drugs from *tilvaka* upto *pāṭalā*, roots are to be used, from *pūga* upto *eraṇḍa*, fruits are to be used, of *pūtīka* and *āragvadha*, leaves are to be used and of other milky plants the latex is to be used.

कोशातकी – सप्तला — शङ्खिनी— देवदाली— हेमाह्वा —
कारवेल्लीत्युभयतोभागहराणि ।। एषां स्वरसा इति ।।१४०।।

**Drugs which are both Emetic & Purgative**

*Kośātākī, saptalā, śaṁkhinī, devadālī, hemāhvā and kāravelli*—these drugs help in the elimination of *doṣas* through both the upward and downward tracts.

The juice of these plants is to be used.

पिप्पलीमरिचविडङ्गमधुशिग्रुसिद्धार्थकशिरीषकरवीर-
बिम्बीगिरिकर्णीकिणिहीवचाज्योतिष्मतीकरंजार्कालर्क-
लशुनातिविषाशृंगवेरतालीसतमालसुरसार्जकेङ्गुदीमे-
षशृङ्गीमातुलुंगीमुरङ्गीपीलुतिनिशशालतालमधूकला-
क्षाहिंगुलवणमद्यशकृद्रसमूत्राणीति **शिरोविरेचनानीति** ।।१४१।।

**Errhlnes**

*Pippalī, marica, viḍaṅga, madhu śigru, siddhārthaka, śirīṣa, karavīra, bimbī, girikarṇī, kiṇihī, vacā, jyotismatī, karañja, arka, alarka, laśuna, ativiṣā, sṛṅgavera, tālīsa, tamāla, surasā, arjaka, iṅgudī, meṣa sṛṅgī, mātuluṅgī, pīlu, tiniśa, śāla, tāla, madhūka, lākṣā, hiṅgu, lavaṇa, madya, śakṛt rasa* and urine—these help in the elimination of *doṣas* from the head.

करवीरादीनामर्कान्तानां मूलानि मातुलुङ्गीमुरङ्गीपी-
लुजातीना पुष्पाणि ।। १४२ ।।

Of the drugs from *karavīra* upto *arka*, roots are to be used and the flowers of *mātuluṅgī, muraṅgī, pīlu* and *jātī* are to be used.

भद्रदारुकुष्ठनिशामेषलश्रृङ्गी बातिबलार्तगलकालकक-
च्छुराशल्लकीकुबेराक्षीवीरतरुसहचराग्निमन्थवत्सादनी
श्वदंष्ट्रैरंडाश्मभेदकार्कालर्कशतावरीपुनर्नवावसुकव-
शिरकर्चूरभार्गीकार्पासीवृश्चिकालीधत्तूरबदरयवकोल-
कुलत्थप्रभृतीनि विदारिगन्धादिश्च द्वे पञ्चमूल्यौ-
समासेन वातसंशमनो वर्गः ॥ १४३ ॥

**Group of drugs for alleviation of** *vāyu*

*Bhadra dāru, kuṣṭha, niśā, meṣa śṛṅgī, balā, atibalā, ārtagala, kālaka, kacchura, śallakī, kuberakṣī, vīrataru, sahacara, agni mantha, vatsādanī, śvadaṁṣṭrā, eraṇḍa, aśma bhedaka, arka, alarka, śatāvarī, punarnavā, vasuka, vaśira, karcūra, bhārgī, kārpāsī, vṛścikali, dhattūra, badara, yava, kola, kulattha* etc., drugs belonging to the *vidārigandhādi* group and both the varieties of *pañca mūla*—these, in brief, are the alleviators of *vāyu.*

चन्दनकुचन्दनह्रीबेरोशीरमंजिष्ठापयस्याविदारिका-
शतावरीगुन्द्राशैवालककल्हारकोकन्दोत्पलकदलीमूर्वा-
प्रभृतीनिकाकोल्यादिसारिवादिन्यग्रोधादिरुत्पलादितृण-
पञ्चमूलमिति समासेन पित्तसंशमनो वर्गः ॥ १४४ ॥

**Group of drugs for alleviation of** *pitta.*

*Candana, kucandana, hrībera, uśīra. mañjiṣṭhā, payasyā, vidārikā, śatāvarī, gundrā, śaivālaka, kalhāra, kokanda, utpala, kadalī, mūrvā* etc. and drugs of *kākolyādi, sārivādi, nyagrodhādi, utpalādi* and *triṇa pañca mūla* groups these, in brief, are the alleviators of *pitta.*

कालेयकागरुतिलपर्णीकुष्ठहरिद्राशीतशिवशतपुष्पासर-
लरास्नाप्रकीर्योदकीर्येङ्गुदीसुमनसःकाकादनीलाङ्गल-
कीहस्तिकर्णमुञ्जातकलामज्जकप्रभृतीनि वल्लीकण्टक-
पञ्चमूल्यौ पिप्पल्यादिमुष्ककादिर्वचादिः
सुरसादिरारग्वधादिरिति समासेन श्लेष्मसंशमनो
वर्गः ॥ १४५ ॥

**Group of drugs for alleviation of** *kapha*

*Kāleyaka, agaru, tila parṇī, kuṣṭha, haridrā, śīta, śiva, śata-*

*puṣpā, sarala, rāsnā, prakīryā, udakīryā, iṅgudī, sumanas, kākādanī, lāṅgalakī, hasti karṇa, muñjātaka, lāmajjaka* etc. and drugs belonging to *valli pañca mūla, kaṇṭaka pañca mūla, pippalyādi, muṣkakādi, vacādi, surasādi, āragvadhādi* groups—these, in brief, are the alleviators of *kapha.*

तत्र सर्वाण्यौषधानि व्याधिबलादधिकमौषधमुपयुक्त
तमुपशम्यव्याधिमन्यमावहन्ति । अग्निबलादधिकमजीर्णं
विष्टभ्य वा पच्यते । पुरुषबलादधिकं ग्लानिमूर्छाम-
दानावहति । तस्मात्सममेव विदध्यात् ॥ १४६ ॥'

[सुश्रुत: सूत्र ३९ : ३-१०]

**Proper dosage**

If all these drugs are used in excess of the strength of the disease, then after curing the disease, they produce other ailments. If these are used in excess of the digestive power then they, being undigested, cause flatulence. If they are used in excess of the strength of the individual then they cause mental fatigue, fainting and intoxication. Therefore, these should be administered in appropriate dosage.

नवधान्यमाषतिलकुल्माषकुलत्थनिष्पावहरितशाका-
म्ललवणकटुगुडपिष्टविकृतिवल्लूरशुष्कशाकाजाविका-
नूपोदकमांसवसाशीतोदककृशरापायसदधिदुग्धतक्रमद्य-
प्रभृतीनि परिहरेत् ॥ १४७ ॥

**Unwholesome food for a patient**

Freshly harvested corns, *māṣa, tila, kulmāṣa, kulattha, niṣpāva,* green vegetables, ingredients having sour, saline and pungent tastes, pastries, dried fish, dry vegetables, meat as well as musale fat of goat, sheep and animals inhabiting marshy land and water, cold water, *kṛśarā, pāyasa,* curd, milk, butter milk, alcoholic drinks etc., should be avoided by a patient.

तक्रान्तो नवधान्यादिर्योऽयं वर्ग उदाहृत: ॥

दोषसंजननो ह्येष विज्ञेय: पूयवर्धन

कुठेरकशिग्रुसुरससुमुखासुरिभूस्तृणा:

शुक्तं च चुक्रिकं चेति वर्गं हरितकं विदुः ॥ १४६ ॥

Ingredients enumerated above from freshly harvested corns upto butter milk aggravate *doṣas* and they cause pus formation. *Kuṭheraka, śigru, surasā, sumukha, suci, bhūstṛṇa, śukta* and *cukrika*—these are called *haritaka.*

अतः सर्वप्राणिनामाहारार्थं वर्गं उपदिश्यते ।

रक्तशालिषष्टिककंगुककुमुदकपाण्डुककरमर्दकसुगन्ध-
ककलमशात्तपुटी कुमोदकनीवारकोद्रवोद्दालक-
श्यामाकनन्दीमुखीवेणुयवाः, एणहरिणमृगकुरङ्ग-
मातृकाः श्वदंष्ट्राकरालविष्किरहारीततित्तिरलावका
कपिंजलवर्तीरकाश्च, मुद्गमकुष्ठवर्तुकलायमसूरम-
ङ्गल्याचणकाढ़कीसतीनमाषाश्च, चिल्लीवास्तुक-
निषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः, गव्यं घृत
सैन्धवं दाडिमामलकतंडुलवर्गः [?], ब्रह्मचर्य-
निर्वातशयनोष्णोदकनिद्रास्वप्नः [?] व्यायामश्चैष
वर्ग सर्वप्राणिना सामान्यतः पथ्यतमः ॥ १५० ॥

**Wholesome food & regimens**

(*a*) *Rakta śālı, ṣaṣṭika, kanguka, kumudaka, pāṇḍuka, karamardaka, sugandhaka, kalama, śāttapuṭṭi, kumodaka, nīvāra, kodrava, uddālaka, śyāmāka, nandīmukhī venuyava,* (b) *ena, hariṇa, mṛga, kuranga, mātṛkā, śvadamṣṭra, karāla, viṣkira, hārīta, tittira, lāvaka, kapiñjala, vartiraka,* (c) *mudga, makuṣṭha, vartula kalāya, masūra, maṅgalyā, canaka, āḍdhakī, satīna, māṣa* (d) *cillī, vāstuka, niṣannaka, jīvantī, tanḍulīyaka, manḍūka parṇī,* (e) cow's milk, ghee, rock salt, *dāḍima, āmalaka,* (e) celibacy, sleep in a non-airy place, hot water, sleep and exercise—these are, in general, most wholesome for all living creatures.

कृष्णात्रेय·

अपुट विद्यमानेषु भ्रमः कोप गतञ्जलेः । [?]

शमी धान्येषु माषान्नमपथ्यत्वं प्रभाषते ॥ १५१ ॥

वातव्याधिप्रशमना शूलाध्माननिकृन्तनाः ।

बल्या वाजीकरा माषाः स्युरपथ्यतमाः कथम् ॥१५२॥

Among the *śamī dhānyas* (grains), *māṣa* is considered to be the most unwholesome. This view is not correct because *māṣa* cures diseases caused by the vitiation of *vāyu*, *śūla* (colic pain) and *ādhmāna* (flatulence). It promotes strength as well as virility. Why should it be treated as unwholesome ?

अवस्थान्तरबाहुल्याद्रोगादीनां व्यवस्थितम् ।
द्रव्यं नेच्छन्ति भिषजद्रष्टरि स्वस्थरक्षणम् ॥१५३॥
द्वयोरन्यतरादाने वदन्ति विषदुग्धयोः ।
दुग्धस्यैकान्ततो हितं विषस्यैकान्ततोऽहित ॥१५४॥
33
स्वस्थरोगिणाम् ।

Disease have different varieties and stages. Therefore, physicians who aim at preservation of health do not fix a particular drug for a particular ailment. There are however things which are extremely good or extremely bad. For example, milk is always useful whereas poison is always harmful both for healthy persons as well as patients.

## NOTES AND REFERENCES

1. This is the 12th Chapter of *Ayurveda Saukhyaṁ* in Toḍarānanda and the opening invocation reads below :—

"गोपालिकाना करताडनेन कलसनृत्यं प्रचकार बालः ।
सामस्वरो विश्वविनर्तको यस्तनोतु शं टोडरमल्लभूपे ॥"

2. 'कियद्भिरौष्यौषधसंग्रहैर्गणैर्निगद्यते' इति पंचमपुस्तके पाठः ।
3. 'स्यात्सप्तत्रिंशदमांभिर्गणैर्वीक्ष्यवातपित्तकफात्' इति प्रथमपुस्तके पाठः ।
4. 'भिषजः' इति द्वितीयपुस्तके पाठः ।
5. 'भिन्नान् मिश्रान् प्रयोजयेत्' इति आकरे पाठः ।

6. 'द्वय' इति प्रथमद्वितीयपुस्तकयोः पाठः ।
7. 'चिरविल्व' इति प्रथमपंचमपुस्तकयोः पाठः ।
8. 'त्रय' इति प्रथमपंचमपुस्तकयोः पाठः ।
9. 'वातरुजापहः इति प्रथमपंचमपुस्तकयोः पाठः ।
10. 'लोध्र' इति प्रथमपंचमपुस्तकयोः पाठः ।
11. द्रष्टव्यम् सुश्रुतः सूत्रः ३८ : २२-२३ ।
12. 'मूत्रदोषहरो·······रुचिप्रदः' पाठोऽयं प्रथमपंचमपुस्तकयोः नोपलभ्यते ।
13. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ५०-५१ ।
14. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ५४-५५ ।
15. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ५३ ।
16. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ५६, योगरत्नाकरः पृष्ठ ६७ ।
17. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ५८ ।
18 द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ६०-६१ ।
19. द्रष्टव्यम् सुश्रुतः सूत्र ३८ : ६६-७० ।
20 द्रष्टव्यम् सुश्रुत सूत्र ३८ : ७२-७६ ।
21. 'तृवृता' इति प्रथमपंचमपुस्तकयोः पाठः ।
22. 'वृष्याणां इति द्वितीयपुस्तके पाठः ।
वृक्षाणां इति प्रथमपंचमपुस्तकयोः पाठः ।
23. 'यत्तु' इति द्वितीयपुस्तके पाठः ।
24. द्रष्टव्यम् योगरत्नाकरः पृष्ठ ६८ ।
25. "वृद्धिस्तु·······मधुरशीतलं" इति प्रथमपंचमपुस्तकयोः पाठः ।
26. द्रष्टव्यम् भावप्रकाशः हरीतक्यादिवर्ग. १२२ ।
27. 'सुगन्ध्वाढच ' इति आकरे पाठः ।
28. तद्यनेन इति द्वियीयतृतीयचतुर्थपुस्तकेषु पाठः ।
29. "सालसारादिक·······फलानिच" इति प्रथमद्वितीयपुस्तकयोः पाठः ।
30. 'त्रिवृत्श्यामादन्ती' इति प्रथमपंचमपुस्तकयोः पाठः ।
'त्रिवृताश्यामदन्ती' इति आकरे पाठः ।
31. 'त्रिवृत्तादीनां' इति द्वितीयपुस्तके पाठः ।
32. 'शेषाणां' इति आकरे पाठः ।

33. This is the end of the 12th chapter in *Ayurveda Saukhyaṁ* of Toḍarānanda and the colophon reads as below :

इति श्रीमहाराजाधिराजटोडरमल्लविरचिते टोडरानन्दे आयुर्वेदसौख्ये गणोद्देशकथनं नाम द्वादशो हर्षः ।

# CHAPTER 31

द्रव्यनामगुणान् ज्ञात्वा भिषजः कर्म्म कुर्व्वते ।
तस्मादगदनामानि[1] वक्ष्यन्ते कर्म्मसिद्धये ॥ १ ॥

Physicians resort to therapeutic measures only after obtaining the knowledge of the names and properties of medicinal substances. Therefore, for successful accomplishment of the treatment of diseases names (synonyms) of therapeutically useful substances are being described

**हरीतकी**

शिवा हरीतकी पथ्या चेतकी विजया जया ।
प्रपथ्या[2] प्रमथामोघा कायस्था प्राणदामृता[3] ॥ २ ॥
जीवनीया हैमवती पूतनामृतलाभया ।
वयस्था नदि विज्ञेया श्रेयसी रोहिणी तथा ॥ ३ ॥

***Harītakī***

*Śivā, harītakī, pathyā, cetakī, vijayā, jayā, prapathyā,*

*pramathā, amoghā, kāyasthā, prāṇadā, amṛtā, jīvanīyā, haimavatī, pūtanā, amṛtalā, abhayā, vayasthā, nandi, śreyasī* and *rohiṇī*—these are synonymous.

**आमलक**

धात्रीफलामृतफलामलकं श्रीफलं शिवम् ।

*Āmalaka*

*Dhatrī phala, amṛta phala, āmalaka, śrī phala* and *śiva*—these are synonymous.

**विभीतक**

विभीतकः कर्षफलो भूतवासः कलिद्रुमः ॥ ४ ॥
वासंतोऽक्षो विंध्यजातः संवर्तस्तिलपुष्पकः ।

*Vibhītaka*

*Vibhītaka, karṣa phala, bhūta vāsa, kali druma, vāsanta, akṣa, vındhya jāta, saṁvarta* and *tila puspaka*—these are synonymous.

**त्रिफला**

त्रिफला तत्त्रयेण स्याद्वरा श्रेष्ठा फलोत्तमा ॥५॥

*Triphalā*

*Harītakī, āmalaka* and *vibhītaka* are called *triphalā*, when taken together. *Varā, śreṣṭhā* and *phalottamā*—these are the synonyms of *triphalā*.

**भूम्यामलकी**

5

भूधात्री वहुपत्रा स्याज्जटा तामलकी शिवा ।

*Bhūmyāmalakī*

*Bhū dhātrī, vahu patrā, jaṭā, tāmalakī* and *śivā*—these are the synonyms of *bhūmyāmalakī*.

**प्राचीनामलक**

प्राचीनामलकं प्राचीनागर रक्तक मतम् ॥ ६ ॥

*Prācīnāmalaka*

*Prācīnāmalaka, prācī nāgara* and *raktaka*—these are synonymous.

**वासा**

वासा वृषः सिंहमुखी भिषङ्मातादरूषकः ।

शुक्ल हैमवती चैव सिंहास्यो वाजिदंतक. ॥ ७ ॥

*Vāsā*

*Vāsā, vṛṣa, simha mukhī, bhiṣanmātā, āṭaruṣaka, śukla, haimavatī, simhāsya* and *vāji dantaka*—these are synonymous.

**गुडूची**

गुडूची कुंडली छिन्ना वयस्थामृतवल्लरी ।

छिन्नोद्भवा छिन्नरुहामृता ज्वरविनाशिनी ॥ ८ ॥

वत्सादनी चंद्रहासा जीवंती चक्रलक्ष्यणा ।

*Guḍūcī*

*Guḍūcī, kuṇḍalī, chinnā, vayasthā, amṛta vallarī, chinnodbhavā, chinna ruhā amṛtā, jvara vināśinī, vatsādanī, candra hāsā, jīvantī, cakra lakṣaṇā*—these are synonymous.

**बिल्व**

बिल्वः शलाटु शैलुषो मालूरश्च सदाफलः ॥ ९ ॥

लक्ष्मीफलो गंधगर्भः शांडिल्यः कंटकी मतः ।

*Bilva*

*Bilva, śalāṭu, śailūṣa, mālūra, sadā phala, lakṣmī phala, gandha garbha, śāṅdilya, kaṇṭakī*—these are synonymous.

**अरणि**

अग्निमंथो जयः केशी अरणिर्वैजयंतिका ॥ १० ॥

*Araṇī*

*Agni mantha, jaya, keśī, araṇi* and *vaijayantikā*—these are synonymous.

**पाटलाकाष्ठपाटला**

पाटला कामदूती स्यात् कुम्भिका कालवृंतिका ।
स्थाल्यामोघा मधोर्दूती ताम्रपुष्पांबुवासिनी ।
अन्या फलेरुहा श्वेतकुम्भीका काष्ठपाटला ॥११॥

*Paṭalā & Kāṣṭhapāṭālā*

*Paṭalā, kāma dūtī, kumbhikā, kālavṛntikā, sthālyā, amoghā, madhordūtī, tāmra puṣpā* and *ambu vāsinī*—these are the synonyms of *pāṭalā.* Another variety of it which is called *kāṣṭhapāṭalā* has two synonyms viz., *phale ruhā* and *śveta kumbhīkā.*

**गंभारि**

कास्मरी सर्वतोभद्रा श्रीपर्णी कृष्णवृंतिका ।
कभारी काश्मरी हीराकाश्मरी भद्रपर्णिका ॥ १२ ॥

*Gambhāri*

*Kāsmasī, sarvatobhadrā, śrī parṇī, kṛṣṇa vṛntikā, kaṁbhārī, kāśmarī, hīrā kāśmarī* and *bhadra parṇikā*—these are synonymous.

**स्योनाक**

**अक्षोट**

अक्षोडको वृंतफलो कंदरालः पृथुच्छदः ।
[36] अक्षोटं मधुरं बल्यं गुरूष्ण वातहृत्सरम् ॥ ६३ ॥

*Akṣoṭa*

*Akṣoḍaka, vṛnta phala, kandarāla* and *pṛthu chada*—these are synonymous.

*Akṣoṭa* is sweet, strength promoting, heavy, hot, alleviater of *vāta* and laxative.

**पालेवक, मालवक**

पालेवतं सितपुष्पं तिंदुकाभफलं मतम् ।
अन्यत् मालवक ज्ञेयं महापालेवतं तथा ॥ ६४ ॥
पालेवतं हिमं स्वादु गुरुष्णं वह्निवातजित् ।
तद्वत् मालवक हृद्य तृष्णाघ्नमिष्टमस्तकम् ॥ ६५ ॥

*Pālevaka & Mālavaka*

*Pālevata, sita puspa* and *tindukābha phala*—these are synonymous.

Another variety of it is called *mālavaka* and *mahā pālevata phala.*

*Pālevata* is cooling, sweet, heavy and hot. It suppresses digestive power and alleviates *vāyu.*

*Mālavaka* is *hṛdya* (cardiac tonic). It cures *tṛsṇā* (morbid thirst). It is useful for brain (*mastaka*).

**तूत**

37
तूदं भूद ब्रह्मकाष्ठं ब्रह्मण्य ब्रह्मदारु च ।
39
तूदं गुरु हिमं पक्वं स्वादुपित्तानिलापहम् ॥ ६६ ॥

*Tūta*

*Tūda, bhūda, brahma kāṣtha, brahmaṇya* and *brhma dāru*—these are synonymous.

Ripe *tūda* is heavy, cooling and sweet. It alleviates *pitta* and *anila.*

**गांगेरुक, तोदन**

गांगेरुकं कर्क्कटकं ककर्टं मृगलेंडकम् ।
तोदनं क्रंदनं धान्य मृगपिच्छदृश तथा ॥ ६७ ॥

गागेरु रुचन पक्व गुरु वातास्रपित्तजित् ।। ६८ ।।

तोदन ग्राहि मधुरं वातपित्तहर लघु ।

तूतादि त्रितयं चाममम्लं गुरु तु पित्तलम् ।। ६९ ।।

*Gāṅgerūka & Todana'*

*Gāṅgeruka, karkaṭaka, karkaṭa* and *mṛga leṇḍaka*—these are the synonyms of *gāṅgeruka.*

*Todana, krandana, dhānya* and *mṛga picha dṛśa*—these are synonymous.

Ripe *gāṅgeru* is purgative and heavy. It alleviates *vāta,* blood and *pitta.*

*Todana* is constipative and sweet. It alleviates *vāta* and *pitta.* It is light.

Unripe *tūta, gāṅgeruka* and *todana* are sour and heavy. They aggravate *pitta.*

**तुवरक**

वृक्षस्तुवरको ज्ञेयोभल्लातकसमो गुणैः ।

कषाय तत्फलं पत्रैः[40] केसराभः[41] समुद्रजः ।। ७० ।।

तौवरं कफजित्पाके कटूष्ण व्रणमेहजित् ।

*Tuvaraka*

*Tuvaraka* tree has properties like those of *bhallātaka.* Its fruit is astringent in taste. Its leaves are like *kesara* and it grows near sea.

The fruit of *tuvara* alleviates *kapha.* In *vipāka* (taste after digestion) it is pungent.

It is hot and it cures ulcer and *meha* (obstinate urinary disorders including diabetes).

**बीजपूरक**

बीजपूरो मातुलुंगः केसरी[42] फलपूरकः ॥ ७१ ॥
बीजपूरफलं रुच्यं रसेऽम्लं दीपनं लघु ।
रक्तपित्तकर कंठजिह्वाग्रशोधनं परम् ॥ ७२ ॥
त्वचोऽस्य तिक्तगुर्व्वम्लं कृमिवातकफापहम् ।
तन्मांसं बृंहणं शीतं गुरु पित्तसमीरजित् ॥ ७३ ॥
[43] केसरं लघु संग्राहि शूलगुल्मोदरापहम् ।
बीजमुष्ण कृमिश्लेष्मवातजिद्गर्भदं गुरु ॥ ७४ ॥
तत्पुष्पं शीतलं ग्राहि रक्तपित्तहरं लघु ।

*Bīja pūraka*

*Bīja pūra*, *mātuluṅga*, *kesarī* and *phala pūraka*—these are synonymous.

The fruit of *bīja pūra* is appetiser. It is sour in taste. It stimulates digestion and is light. It causes *rakta pitta* (a disease characterised by bleeding from different parts of the body) It cleanses throat and tip of the tongue.

The skin of the fruit of *bīja pūraka* is bitter, heavy and sour. It cures *kṛmī* (intestinal parasites). It alleviates *vāta* and *kapha*.

The pulp (*māṁsa*) of *bija pūraka* is *bṛṁhaṇa* (nourishing), cooling and heavy. It alleviates *pitta* and *vāyu*.

Its *kesara* (pistil) is light and constipative. It cures *śūla* (colic pain), *gulma* (phantom tumour) and *udara* (obstinate diseases of abdomen including ascitis).

Its flower is cooling and constipative. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body) and it is light.

**मधुकर्कटिका**

मधुकर्कटिका स्वादुलुंगी घंटालिका घटा ॥ ७५ ॥
मधुकर्कटिका शीता रक्तपित्तहरा गुरुः ।

*Madhu karkaṭikā*

*Madhu karkaṭikā, svādu, lungī, ghaṇṭālikā* and *ghaṭā*—these are synonymous.

*Madhu karkaṭikā* is cooling. It cures *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is heavy.

**नारंगी**

44

नारंगको नागरंगो गोरक्षो योगसाधकः ॥ ७६ ॥
नारंगमम्लं मधुरं रुच्यं वातहरं सरम् ।
स्वाद्वम्लमपरं हृद्यं दुर्जरं वातनाशनम् ॥ ७७ ॥

*Nāraṅgī*

*Nāraṅgaka, nāgaraṅga, gorakṣa* and *yoga sādhaka*—these are synonymous.

*Nāraṅga* is sour and sweet in taste. It is appetiser. It alleviates *vāta*. It is laxative.

Another variety of it which is also sweet and sour, is *hṛdya* (cardiac tonic) and *durjara* (difficult for digestion). It alleviates *vāta*.

**जंबीरक**

जंबीरको दंतशठो जंभीलो जंभलो मतः ।
जंबीरमुष्णं श्लक्ष्णं गुरुष्णं कफवातजित् ॥ ७८ ॥
आस्यवैरस्य—हृत्पीडावह्निमांद्यक्रमीन्जयेत् ।

*Jaṁbīraka*

*Jaṁbīraka, danta śaṭha, jambhīla* and *jambhala*—these are synonymous.

*Jambīra* is hot and it cures *śūla* (colic pain). It is heavy and hot. It alleviates *kapha* and *vāta*. It cures *āsya vairasya* (distaste in the mouth), *hṛt pīḍā* (pain in cardiac region), *agni māndya* (suppression of the power of digestion) and *kṛmi* (intestinal parasites).

**अम्लवेतस**

अम्लोऽम्लवेतसः चुक्रो[45] वेतसः[46] स्वरभेदकः[47] ॥ ७९ ॥
अम्लवेतसमत्युष्णं भेदनं लघु दीपनम् ।
हृद्रोगशूलगुल्मघ्नं पित्तास्रकफदूषणम्[48] ॥ ८० ॥

*Amla vetasa*

*Amla, amla vetasa, cukra, vetasa* and *svara bhedaka*—these are synonymous.

*Amla vetasa* is exceedingly hot, purgative, light and digestive stimulant. It cures *hṛd roga* (heart disease), *śūla* (colic pain) and *gulma* (phantom tumour). It vitiates *pitta*, blood and *kapha*.

**साराम्लक**

साराम्लकः सारफलो रसाल· सारपादपः ।
साराम्लमम्लं वातघ्नं गुरु पित्तकफप्रदम् ॥ ८१ ॥

*Sārāmlaka*

*Sārāmlaka, sāra phala, rasāla* and *sāra pādapa*—these are synonymous.

*Sārāmla* is sour. It alleviates *vāyu*. It is heavy and it aggravates *pitta* and *kapha*.

**निम्बुक**

नम्बुकं निम्बूकं राजनिम्बूकमपरं स्मृतम् ।

निबुकं पाचनं हृद्यं तीक्ष्णोष्णं कफवातजित् ॥ ८२ ॥

निबुकमम्लं वातघ्नं पाचनं दीपन लघु ।

राजनिबूफलं स्वादुर्गुरुपित्तसमीरजित् ॥ ८३ ॥

निंबुकं कृमिसमूहनाशनं तीक्ष्णमाममुदरग्रहापहम् ।

वातपित्तकफशूलनाशनं[49] नष्टधातुरुचिशोधन परम् ॥ ८४ ॥

त्रिदोषसद्यज्वरपीडितानां दोषश्चिताना विषमज्वराणाम् ।

मलक्षये बद्धगुदे हितं च विषूचिकानां[50] मुनयो वदन्ति ॥ ८५ ॥

*Nimbuka*

*Nimbuka* and *nibūka*—these are the synonyms of *nimbu.*

It has another variety which is called *rāja nimbūka.*

*Nibuka* is *pācana* (carminative), *hṛdya* (cardiac tonic), sharp and hot. It alleviates *kapha* and *vāta.*

*Nimbuka* is sour, *vātaghna* (alleviater of *vāta*), *pācana* (carminative), *dīpana* (digestive stimulant) and light.

The fruit of *rāja nimbu* is sweet and heavy. It alleviates *pitta* and *vāyu.*

*Nimbuka* destroys all types of *kṛmi* (parasites). It is sharp in action. It cures *āma* (product of improper digestion and metabolism), *udara* (obstinate abdominal disorders including ascitis) and *graha* (planetary afflictions). It cures the *vātika, paittika* and *ślaiṣmika* types of *śūla* (colic pain). It replenishes and cleanses the vitiated *dhātus.* It is useful for patients suffering from acute (*sadya*) fever caused by the vitiation of all the three *doṣas* and *viṣama jvara* (irregular fever) caused by the accumulation of vitiated *doṣas.* It is also useful when there is diminution of waste products (*mala*) and when there is obstruction in the anus. It cures *visūcikā* (choleric diarrhoea).

**कर्मरंग**

कर्म्मरंग रामफलं भव्यं पिच्छिलबीजकम् ।

कर्म्मरंगं हिमं ग्राहि स्वाद्वम्लं कफपित्तजित् ॥ ८६ ॥

*Karma raṅga*

*Karma raṅga, rāma phala, bhavya,* and *picchila bījaka*—these are synonymous.

*Karma raṅga,* is cooling, constipative, sweet and sour. It cures *kapha* and *pitta.*

**अम्लिका**

अम्लिका चुक्रिका चिंचा तित्तिडी शुक्ति चंडिका ।
अम्लिकामा गुरुर्वातहरा पित्तकफास्रकृत् ॥ ८७ ॥
पक्वा तद्वत्सरा रुच्या वह्निवस्तिविशुद्धिकृत् ।
शुष्का हृद्या श्रमभ्रांतितृष्णाक्लमहरा लघुः ॥ ८८ ॥

*Amlikā*

*Amlikā, cukrikā, ciñcā, tittiḍī, śukti* and *caṇḍikā*—these are synonymous.

Unripe *amlikā* is heavy. It alleviates *vāta* and vitiates *pitta, kapha* and blood.

Ripe *amlikā* is laxative and appetiser. It is a digestive stimulant and it cleanses the urinary bladder.

Dried *amlikā* is *hṛdya* (cardiac tonic). It cures *śrama* (exhaustion), *bhrānti* (giddiness), *tṛṣṇā* (morbid thirst) and *klama* (mental fatigue). It is light.

**तित्तिडीक**

तित्तिडीकं तु वृक्षाम्लमम्लशाकोम्लपादपः ।
तित्तिडीकं समीरघ्नमाममुष्णं परं गुरु ॥ ८९ ॥
तत्फलं लघु संग्राहि ग्रहणीकफवातजित् ।

*Tittiḍīka*

*Tittiḍīka, vṛkṣāmla, amla śāka* and *amla pādapa*—these are synonymous.

Unripe *tittiḍīka* alleviates *vāyu*. It is *uṣṇa* (hot) and exceedingly heavy.

Its fruit is light and constipative. It cures *grahaṇī* (sprue syndrome), *kapha* and *vāta*.

**करमर्द**

करमर्दः सुषेणस्याद्वन्याकृष्णफलापरा ॥ ९० ॥
करमर्दं गुरूष्णाम्लं रक्तपित्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥ ९१ ॥
शुष्कं पक्ववदस्यामंपक्वमप्यार्द्रमामवत् ।

*Karamarda*

*Karamarda, suṣeṇa, vanyā* and *kṛṣṇa phalā*—these are synonymous.

*Karamarda* is heavy, hot and sour. It produces *rakta pitta* (a disease characterised by bleeding from different parts of the body) and *kapha*.

Ripe *karamarda* is sweet, appetiser and light. It alleviates *pitta* and *vāyu*.

Dried *karamarda* is like ripe *karamarda* in its properties.

Unripe but dried *karamarda* is like green unripe *karamarda* in property.

**कपित्थ**

कपित्थको दधिफलः कपित्थः सुरभिच्छदः ॥ ९२ ॥
कपित्थमामं संग्राहि लघु दोषत्रयापहम् ।
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ॥ ९३ ॥

स्वाद्वम्लं तु वरं कण्ठशोधनं ग्राहि दुर्जरम् ।

*Kapittha*

*Kapitthaka, dadhi phala, kapittha* and *surabhi chada*—these are synonymous.

Unripe variety of *kapittha* is constipative and light. It alleviates all the three *doṣas*.

Ripe *kapittha* is heavy. It cures *tṛṣā* (morbid thirst), *hikkā* (hiccup) and vitiated *vāta* as well as *pitta*. It is sweet and sour. It cleanses the throat. It is constipative and it is difficult of digestion.

**कपित्थपत्री**

कपित्थपत्री फणिजा कुलजा निंबपत्रिका ॥ ६४ ॥

कपित्थपत्री तीक्ष्णोष्णा कफमेहविषापहा ।

*Kapittha patrī*

*Kapittha patrī, phaṇijā, kulajā* and *nimba patrikā*—these are synonymous.

*Kapittha patrī* is sharp and hot. It alleviates *kapha, meha* (obstinate urinary disorders including diabetes) and poisoning.

**आम्रातक**

51

आम्रातकश्चाम्रतटः पल्लीशो द्रुफलः कपिः ॥ ६५ ॥

आम्रातमाम वातघ्नं गुरूष्णं रुचिकृत्सरम् ।

पक्वं स्वादु हिमं वृष्यं मरुत्पित्तकफास्रजित् ॥६६॥

*Āmrātaka*

*Āmrātaka, āmra taṭa, pallīśa, druphala* and *kapi*—these are synonymous.

Unripe *āmrāta* alleviates *vāta*. It is heavy, hot, appetiser and laxative.

Ripe *āmrātaka* is sweet, cooling and *vṛṣya* (aphrodisiac).

It alleviates *vāyu*, *pitta*, *kapha* and blood.

राजाम्र

52

राजाम्रष्टक आम्रातः कामाह्वो राजपुत्रकः ।

राजाम्रं मधुरं शीतं ग्राहि पित्तकफापहम् ॥ ९७ ॥

*Rājāmra*

*Rājāmra ṣṭaka*, *āmrāta*, *kāmāhva*, and *rāja putraka*—these are synonymous.

*Rājāmra* is sweet, cooling and constipative. It alleviates both *pitta* and *kapha*.

चतुरम्ल, पंचाम्ल

वृक्षाम्लसुषेणचिंचाकपित्थैश्चतुराम्लकम् ।

अम्लवेतसवृक्षाम्लदाडिमी बदरैः क्वचित् ॥ ९८ ॥

बीजपूरचुतैरेतैः पंचाम्लमुदितं बुधैः ।

*Caturamla, Pañcāmla*

*Vṛkṣāmla*, *suṣeṇa*, *ciñcā* and *kapittha*—these four taken together are known as *caturamla*.

According to some, *amla vetasa*, *vṛkṣāmla*, *dāḍimī* and *bcdara*—these four taken together are called *caturamlaka*.

Added with *bījapūra* or *cuta*, they are called *pañcāmla*.

कोशाम्र

कोशाम्रको घनस्कंधो जंतुवृक्षः सुकोशकः ॥ ९९ ॥

कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः ।

तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ॥१००॥

मज्जा पित्तसमीरघ्नः स्वादुर्बल्योऽग्निदीपनः ।

*Kośāmra*

*Kośāmra, ghana skandha, jantu vṛkṣa* and *sukośaka*—these are synonymous.

*Kośāmra* cures *kuṣṭha* (obstinate skin diseases including leprosy), *śotha* (oedema), *rakta pitta* (a disease characterised by bleeding from different parts of the body), *vraṇa* (ulcer) and vitiated *kapha.*

Its fruit is constipative, alleviater of *vāta*, sour, hot and heavy. It aggravates *pitta*

Its fruit pulp alleviates *pitta* and *vāyu*. It is sweet and strength promoting. It stimulates the power of digestion.

सुपारी

क्रमुकं क्रमिकं पूगं पूगीफलमुदाहृतम् ॥ १०१ ॥

पूगं गुरु हिमं रुक्ष कषायं कफपित्तजित् ।

53

मोहनं दीपनं रुच्यं आस्यवैरस्यनाशनम् ॥ १०२ ॥

आर्द्रं तद्गुर्वभिष्यंदि वह्निदृष्टिहरं परम् ।

स्विन्नं त्रिदोषहृत्सर्व्वं तद्भेदात् तद्वदादिशेत्॥१०३॥

*Supārī*

*Kramuka, kṛmika, pūga* and *pūgī phala*—these are synonymous.

*Pūga* is heavy, cooling, ununctuous and astringent. It alleviates *kapha* and *pitta*. It is *mohana* (intoxicating), *dīpana* (digestive stimulant), and *rucya* (appetiser) It cures *āsya vairasya* (distaste in mouth)

Wet *pūga* is heavy and *abhiṣyandi* (which obstructs the channels of circulation). It suppresses the power of digestion (*vahni*) and reduces eye sight (*dṛṣṭi*) in excess.

The boiled *pūga* alleviates all the three *doṣas*.

It has many varieties and all of them have similar properties.

**तांबूल**

54

तांबूल वल्ली तांबूली नागिनी नागवल्लरी ।

तांबूल विशद रुच्यं तीक्ष्णोष्ण तुवर सरम् ।। १०४ ।।

तिक्तं क्षारोषणं काम्यं रक्तपित्तहृरं लघु ।

55

बल्यं श्लेष्मास्यदौर्गंध्यं मेहवातश्रमापहम् ।। १०५ ।।

*Tāmbūla*

*Tāmbūla, vallī, tāmbūlī nāginī* and *nāga vallarī*—these are synonymous.

*Tāmbūla* is *viśada* (non slimy), appetiser, sharp, hot, pungent, laxative, bitter, *kṣāra* (alkaline) and *uṣaṇa* (saline and alkaline). It is *kāmya* (stimulant of passion). It alleviates *rakta pitta* (a disease characterised by bleeding from different parts of the body). It is light. It promotes strength. It cures vitiated *kapha, āsya daurgandhya* (foul smell from mouth), *meha* (obstinate urinary disorders including diabetes), vitiated *vāta* and *śrama* (exhaustion).

**लवली**

घनस्कंधं महत्प्रांशु प्रपुन्नाटः समंछदः ।

सुगधमूला लवली पांडुकोमलवल्कला ।। १०६ ।।

लवल्याः फलमुद्दिष्ट समं ज्योत्स्नाफल तथा ।

लवलीफलमस्राशोंवातपित्तहृरं लघु ।। १०७ ।।

*Lavalī*

*Ghana skandha, mahat prāṁśu, prapunnāṭa, samaṁ chada, sugandha mūlā, lavalī, pāṇḍu komala valkalā*—these are synonymous.

The fruit of *lavalī* is like that of *jyotsnā* in property.

The fruit of *lavalī* cures vitiated blood, *arśas* (piles), vitiated *vāta* and *pitta*. It is light.

फलतुल्यं गुणं सर्व्वं मज्जानमपि निर्द्दिशेत् ।
फलं हिमाग्निदुर्व्वातव्यालकीटादिदूषितम् ।। १०८ ।।
अकालजातं नाश्नीयात् पाकातीतमभूषितम् ।

56

आमं दोषकरं प्रायः फलं बिल्वं विनाऽखिलम् ।।१०९।।

*General description of fruits*

The pulp of the fruit has the property of the fruit itself.

Fruits which are afflicted by snow, fire, storm, wild animals, and insects and which are unseasonal should not be eaten. Similarly, excessively ripe fruits should not be eaten

All fruits in general produce *āma doṣa* (a product of improper digestion and metabolism). The fruit of *bilva* is an exception to this general rule.

## NOTES AND REFERENCES

1. This is the 95th chapter of *Ayurveda Saukhyaṁ* in ***Toḍarānanda***, and the opening invocation reads as below :

   हरिप्रिया प्रीतिमती प्रियेण प्रियान्विते टोडरमल्लभूपे ।
   भूयात्सदा श्रीहरिणा सपुत्रे यशोधिके ब्राह्मणधर्म्ममित्रे ।

2. 'हारहुरा' इति पंचमपुस्तके पाठः ।
3. 'दोषत्रयाहृत्' इति प्रथमपुस्तके पाठः ।
4. 'रोचनो' इति षष्ठपुस्तके पाठः ।
5. 'तद्वद्विशेषाद् वातनाशनम्' इति षष्ठपुस्तके पाठः ।

6. 'कंटका' इति पंचमपुस्तके पाठः ।
7 'कक्कंरी' इति षष्ठपुस्तके पाठः ।
8. 'खर्जूरीका' इति षष्ठपुस्तके पाठ. ।
9. 'लिंवसी' इति षष्ठपुस्तके पाठः ।
10 'पीनछदा' इति पंचमपुस्तके पाठ ।
'यत्वचा' इति षष्ठपुस्तके पाठः ।
11. 'काशपाला' इति षष्ठपुस्तके पाठः ।
'कोशपाला' इति प्रथमपुस्तके पाठः ।
12. 'हस्तिकोल: इति षष्ठपुस्तके पाठः ।
13. 'वहुलं' इति षष्ठपुस्तके पाठः ।
14. 'कुलं' इति षष्ठपुस्तके पाठः ।
15. 'सग्राही' इति पंचमपुस्तके पाठः ।
16. 'कफपित्तहरं' इति षष्ठपुस्तके पाठः ।
17. 'त रं' इति षष्ठपुस्तके पाठः ।
18. 'शीतलम्' इति प्रथमपुस्तके पाठः ।
19. 'मुनिर्तिदुकः' इति षष्ठपुस्तके पाठः ।
20. 'शाली' इति षष्ठपुस्तके पाठः ।
21. 'पियालो' इति षष्ठपुस्तके पाठः ।
22. 'क्षुधापहं' इति षष्ठपुस्तके पाठः ।
23. 'परुषोऽशोधनः' इति षष्ठपुस्तके पाठः ।
24. 'स्फुर्यः' इति पंचमपुस्तके पाठः ।
25. 'विशतिदुकमप्येवं' इति षष्ठपुस्तके पाठः ।
26. 'चारण' इति षष्ठपुस्तके पाठः ।
27. 'कटकी' इति पंचमपुस्तके पाठः ।
'कंटंपि' इति षष्ठपुस्तके पाठः
28. 'फलस्त्वांसपो' इति प्रथमपुस्तके पाठः ।

29. 'लकुचोग्रंथिमत्फला:' इति पंचमपुस्तके पाठ: ।
30. 'स्वादुतर:' इति पंचमपुस्तके पाठ: ।
31. 'वदरं' इति प्रथमपुस्तके पाठ: ।
32. 'चिकोचकं' इति प्रथमपुस्तके पाठ: ।
33. 'पिष्टं' इति षष्ठपुस्तके पाठ ।
34. 'अलूकमल्लूभल्लूकम्' इति प्रथमपुस्तके पाठ: ।
35. 'रसत:' इति प्रथमपुस्तके पाठ: ।
36. 'अक्षोडं' इति प्रथमपुस्तके पाठ: ।
37. 'तूतं' इति पंचमपुस्तके पाठ: ।
38. 'तूदं' इति पंचमपुस्तके पाठ: ।
39. 'भूदं' इति षष्ठपुस्तके पाठ: ।
'तूतं' इति पंचमपुस्तके पाठ: ।
40. 'केशराभ:' इति पचमपुस्तके पाठ: ।
41. 'समुद्रजै:' इति षष्ठपुस्तके पाठ: ।
42. 'केशरी' इति पंचमपुस्तके पाठ: ।
43. 'केशरं' इति पंचमपुस्तके पाठ: ।
44. 'गोरक्षोयोगसारक:' इति षष्ठपुस्तके पाठ: ।
45. 'शुक्रो' इति प्रथमपुस्तके पाठ: ।
46. 'चेतन:' इति प्रथमपुस्तके पाठ: ।
47. 'शतभेदक:' इति प्रथमपुस्तके पाठ: ।
48. 'पित्तास्रकफदीपनम्' इति प्रथमपुस्तके पाठ: ।
49. 'निहंतिनष्टधातुरुचिशोधनम्' इति प्रथमपुस्तके पाठ: ।
50. 'विसूचिकानां' इति प्रथमपुस्तके पाठ: ।
51. 'आम्रतकश्चाम्रवट:' इति पंचमपुस्तके पाठ: ।
'आम्रातकश्चाम्रतद:' इति षष्ठपुस्तके पाठ: ।
52. 'राजपत्रक:' इति प्रथमपुस्तके पाठ: ।

53 'मेहनं' इति षष्ठपुस्तके पाठः ।

54. 'नागवल्लकी' इति षष्ठपुस्तके पाठः ।

55. 'मलवातश्रमापहम्' इति प्रथमपुस्तके पाठः ।

56. This is the end of 95th chapter of *Ayurveda Saukhyaṁ* in *Toḍarānanda* and the colophon reads as below :

इति श्रीमहाराजाधिराजटोडरमल्लविरचिते टोडरानंदे आयुर्वेदसौख्ये निघंटौ फलवर्गनाम एकोननवतितमोहर्षः (?) ॥

# CHAPTER 37

[1]
**कूष्मांड**

[2] कूष्मांडकी पुष्पफला सोमका च महाफला ।
कर्कारुरपरा लघ्वी स्वादु [3] भूराजकर्कटी ॥ १ ॥

*Kūṣmāṇḍa*

*Kuṣmāṇḍakī, puṣpa phalā, somakā* and *mahā phalā*—these are the synonyms of *kuṣmāṇḍaka*

It has a smaller variety which is called *karkāru.* The sweet variety of *kuṣmāṇḍakī* is called *bhūrāja karkaṭī.*

**कालिंग**

कालिंगं कृष्णबीजं स्यात् [4] कालिंदं फलवर्तुलम् ।

*Kāliṅga*

*Kāliṅga, kṛṣṇa bīja, kālinda* and *phala varttula*—these are synonymous.

**तुंबी**

तुंबी मिष्टा महातुंबी [5] राजालाबुरलाबुनी ॥ २ ॥

*Tumbī*

*Tumbī, miṣṭā, mahā tumbī, rājālābu, alāvunī*—these are synonymous.

**कटुतुंबी**

कटुतुंबी पिंडफला राजपुत्री[6] च दुग्धिनी ।

*Kaṭu tumbī*

*Kaṭu tumbī, piṇḍa phalā, rāja putrī* and *dugdhinī*—these are synonymous.

**कर्कटी**

कर्कटी लोमसी[7] व्याल[8] पत्रैर्वारु बृहत्फला ॥ ३ ॥

*Karkaṭī*

*Karkaṭi, lomasī, vyāla, patrairvāru* and *bṛhat phalā*—these are synonymous

**त्रपुस**

त्रपुसी[9] कंटकिलता सुधावासो परंकिट[10]: ।
छर्द्यायनी[11] मूलफला[12] स्यात्तिक्ता हस्तिपर्णिनी ॥ ४ ॥

*Trapusa*

*Trapusī, kaṇṭaki latā, sudhāvāsa, paraṅkiṭa, chardyāyanī, mūla phalā, tiktā* and *hasti parṇinī*—these are synonymous.

**चिर्भटी**

चिर्भिटं धेनुदुग्धं तत् ज्ञेयं गोरक्षकर्कटी ।

*Cirbhaṭī*

*Cirbhiṭa, dhenu dugdha* and *gorakṣa karkaṭi*—these are synonymous.

**वालुक**

वालुकं कांडुकं वालु तत् शीतं मधुरं[13] गुरु ॥ ५ ॥

शीर्णवृन्तं चित्रफलं विचित्रं पीतवर्णकम् ।

*Vāluka*

*Vāluka, kānduka, vālu, śīrṇa vṛnta, citra phala, vicitra* and *pīta varṇaka*—these are synonymous.

*Vāluka* is cooling, sweet and heavy.

**कोशातकी**

कोशातकी कृतछिद्रा जालिनी कृतवेधना ॥ ६ ॥

मृदंगफलिनी क्षोडा घोंटाली कर्कशछदा ।

*Kośātakī*

*Kośātakī, kṛta chidrā, jālinī, kṛta vedhanā, mṛdaṅga phalinī, kṣoḍā, ghoṇṭālī* and *karkaśa chadā*—these are synonymous.

**राजकोशातकी**

राजकोशातकी मिष्टा महाजालि: प्रपीतक: ॥ ७ ॥

*Rāja kośātakī*

*Rāja kośātakī, miṣṭā, mahājāli* and *prapītaka*—these are synonymous.

**महाकोशातकी**

महाकोशातकी त्वन्या हस्तिघोषा महाफला ।

*Mahā kośātakī*

Another variety of *kośātakī* is called *mahā kośātakī.* Its synonyms are *hasti ghoṣā* and *mahā phalā.*

**वृंताकी**

वृंताकी वर्त्तिका वृंता भंटाकी भटिका मता ॥ ८ ॥

अपर: श्वेतवार्त्ताकि: कुक्कुटाण्डफलोपमा ।

तस्माद्धीनगुणं किञ्चिदर्शशां च हित: स्मृत: ॥ ९ ॥

*Vṛntākī*

*Vṛntākī, varttikā, vṛntā, bhaṇṭākī* and *bhaṇṭikā*—these are the synonyms of *vṛntākī.*

A variety of it is called *śveta vārtāka* and it looks like an egg of the hen. It is slightly inferior in quality and it is useful for *arśas* (piles).

**बिंबी**

बिंबी रक्तफला गोल्हा तुंडी दंतच्छदोपमा ।

*Bimbī*

*Bimbī, rakta phalā, golhā, tuṇḍī* and *dantachadopamā*—these are synonymous.

**कारवेल्लक**

कारवेल्लं कठिल्लं स्यादुग्रकांडं सुकांडकम् ।। १० ।।

करवेल्ली वारिवल्ली बृहद्वल्यपरा स्मृता ।

*Kāravellaka*

*Kāravella, kaṭhilla, ugra kāṇḍa,* and *sukāṇḍaka*—these are the synonyms of *kāravellaka.*

It has a variety which is called *kara vellī, vāri vallī* and *bṛhat vallī.*

**कर्कोटक**

[14] तद्वत्कर्कोटकं कुष्ठकिलासारुचिनाशनम् ।। ११ ।।

*Karkoṭaka*

*Karkoṭaka* cures *kuṣṭha* (obstinate skin disease including leprosy), *kilāsa* (leucoderma) and *aruci* (anorexia).

**वंध्याकर्क्कोटकी, डेंडिका**

वंध्याकर्क्कोटकी देवी नागारिर्विषकंटका[15] ।

डेंडिका विषमुष्टिः स्याद्विषमुष्टि समुष्टिका ।।१२।।

*Vandhyā karkoṭakī, Dendika*

*Vandhyā karkoṭakī, devī, nāgāri* and *viṣa kaṇṭakā*—these are the synonyms of *vandhyā karkoṭakī.*

*Deṇḍikā, viṣamuṣṭi* and *sumuṣṭikā*—these are the synonyms of *ḍeṇḍikā.*

**कोलसिंबी**

[16]कोलसिंबी कृष्णफला षट्का [17]सूकरपालिका ।

*Kola simbī*

*Kola simbī, kṛṣṇa phalā, ṣaṭkā* and *sūkara pālikā*—these are synonymous.

**डिंडिसा**

डिंडिसो रोमसफलो [18]तिंडिसो [19]मुनिनिर्मितः ॥ १३ ॥

*Diṇḍisā*

*Diṇḍisa, romasa phala, tiṇḍisa* and *muni nirmita*—these are synonymous.

**सिंबि**

[20]सिंबि. कुसिंबिः कुत्सास्रसिंबी पुस्तकसिंबिका ।

*Simbi*

*Simbi, kusimbi, kutsāsra simbī* and *pustaka simbika*—these are synonymous.

**वास्तूक**

वास्तूकः क्षारपत्रः स्यात् शाकवीरः प्रसादकः ॥१४॥

*Vāstūka*

*Vastūka, kṣāra patra, śāka vīra* and *prasādaka*—these are synonymous.

**जीवंतक**

जीवंतकः शाकवीरः रक्तनालः [21]प्रनालकः ।

*Jīvantaka*

*Jīvantaka, śāka vīra, rakạ nāla* and *pranālaka*—these are synonymous.

**चिल्ली**

चिल्ली महद्दला रक्ता चिल्लिका गौडवास्तुकः[22] ॥१५॥

*Cillī*

*Cillī, mahaddalā, raktā, cillikā* and *gauḍa vāstuka*—these are synonymous.

**कालशाक**

कालशाक कालिका स्याच्चुचुका चंचुको मतः ।

*Kāla śāka*

*Kāla śāka, kālikā, cucukā* and *cañcuka*—these are synonymous.

**तंदुलीयक**

तंदुलीयो मेघनादः[23] कांडीरस्तंदुलीयकः[24] ॥ १६ ॥

विषघ्नः कंदरोन्यः स्यान्मारिषो मार्षकस्तथा ।

*Tandulīyaka*

*Tandulīya, megha nāda, kāṇḍīra, tandulīyaka, viṣaghna* and *kandara*—these are the synonyms of *tandulīyaka.*

It has another variety which is known as *māriṣa* and *mārṣaka.*

**फोगो**

फोगो मरूद्भवः शुंगी सूक्ष्मपुष्पः[25] शशादन. ॥ १७ ॥

*Phogo*

*Phogo, marūdbhava, śuṅgī, sūkṣma puṣpa* and *śaśādana*—these are synonymous.

**पटोल**

पटोलः पांडुको जाली कूलकः कर्कशच्छदः ।

राजीफलः पांडुफलः राजमानमृतफलः ॥ १८ ॥

तिक्तोत्तमा बीजगर्भापरा राजपटोलिका ।

*Paṭola*

*Paṭola, pāṇḍuka, jālī, kūlaka, karkaśa chada, rājī phala, pāṇḍu phala, rājamān, amṛta phala, tiktottamā* and *bīja garbhā*—these are the synonyms of *paṭola*.

It has another variety which is called *rāja paṭolikā*.

**चिच्चिड**

चिच्चिडो स्मीरकूलान्यः श्वेतराजी[26] बृहत्फलः[27] ॥१९॥

*Ciccinḍa*

*Ciccinḍa* and *smīra kūla*—these are the synonyms of *ciccinḍa*.

Another variety of it is known as *śveta rājī* and *bṛhat phala*.

**पालंक्या**

पालंक्यावास्तुकाकारा क्षारिका वीरतच्छदा ।

*Pālankyā*

*Pālaṅkyā, vāstukākārā, kṣārikā* and *vīrata chadā*—these are synonymous.

**उपोदिका**

पोतक्युपोदिका प्रोक्ता मत्स्यकाली सुतुंगिका[28] ॥२०॥

*Upodikā*

*Potakī, upodikā, matsya kālī* and *sutuṅgikā*—these are synonymous.

**लोणिक**

लोणिकोष्ट्रा बृहत्कोटी कुटिरस्तु कुटिंजरः ।
गण्डरुकी[29] स्यात्[30] गण्डरु[31] फंजी फंजीतकस्तथा ॥ २१ ॥

*Loṇika*

*Loṇika, uṣṭrā, bṛhat koṭī, kuṭira, kuṭiñjara, gaṇḍarukī, gaṇḍaru, phañjī* and *phañjītaka*—these are synonymous.

**सुनिषन्नक**

सुनिषणः स्वस्तिकः स्याद्वरा वस्तिकपर्णिकः ।

*Sunisannaka*

*Sunisana*, *svastika*, *varā*, *vastika parnika*—these are synonymous.

**सिरवार**

32
सिरवारः कुरंडीस्यान्नाडीतुन्नालिका मता ॥ २२ ॥

*Sira vāra*

*Sira vāra*, *kurandī*, *nādītun* and *nālikā*—these are synonymous.

**सर्षपशाक**

सार्षपं सर्षपोद्भूतं कौसुंभ तु कुसुंभजम् ।

*Sarsapa śāka*

*Sārsapa*, *sarsapodbhūta*, *kausumbha* and *kusumbhaja*—these are synonymous.

**चणकशाक**

33
चाणकं शाकमुद्दिष्टं दुर्जरं कफवातजित् ॥ २३ ॥

*Canaka śāka*

*Canaka śāka* is difficult of digestion. It alleviates *kapha* and *vāta*.

**कलायशाक**

कलायशाक भेदि स्याल्लघुपित्तकफापहम् ।

*Kalāya śāka*

*Kalāya śāka* is purgative. It is light and it alleviates *pitta* and *kapha*.

**चांगेरी**

34
चांगेरी त्वम्लिका चुक्रा छत्राम्लीका चतुःछदा ॥२४॥

*Cāṅgerī*

*Cāṅgerī, amlıkā, cukrā, chatrāmlīkā* and *catuḥ chadā*—these are synonymous.

**कासमर्द, गृञ्जन**

35

कासमर्दः कर्कशः स्यात् गृंजनो गजरस्तथा ।

*Kāsa marda & Gṛñjana*

*Kāsa marda* and *karkaśa*—these are synonymous.

*Gṛñjana* and *gajara*—these are synonymous.

**लशुन**

मूलकं हस्तिकदः तद्बालमूलकपोतिका ॥ २५ ॥

*Mūlaka*

*Mūlaka* and *hasti kanda*—these are the synonyms of *mūlaka*.

The tender variety of *mūlaka* is called *bāla mūlaka* and *potikā*.

**करीरक**

36

करीरको गूढपत्रो क्रकचो ग्रंथिलो मतः ।

*Karīraka*

*Karīraka, gūḍha patra, krakaca* and *granthila*—these are synonymous.

**शिग्रु**

शिग्रु सौभाजनः कृष्णगंधः स्याद्बहुलच्छदः ॥ २६ ॥

रक्तोऽन्यो मधुशिग्रुस्तु श्वेतोऽन्यो हरितच्छदः ।

तद्बीजं श्वेतमरिच तीक्ष्णोष्ण चक्षुषे हितम् ॥ २७ ॥

तत्पुष्प मधुरं ग्राहि वातलं कफशोथजित् ।

*Śigru*

*Śigru, saubhāñjana, kṛṣṇa gandha* and *bahula chada*—these are the synonyms of *śigru.*

It has a red variety which is called *madhu sigru* and the white variety of it is called *harita chada.*

Its seed is called *śveta marica* which is sharp, hot and useful for eye.

The flower of *sigru* is sweet and constipative. It aggravates *vāyu* and cures vitiated *kapha* and oedema.

**लशुन**

37 38
लशुनः स्यादुग्रगंधो यवनेष्टो रसोनकः ॥ २८ ॥

गृंजनोऽन्योमहाकंदो जर्ज्जरो दीर्घपत्रकः ।

*Laśuna*

*Laśuna, ugra gandha, yavaneṣṭa* and *rasonaka*—these are synonymous.

Another variety of it is called *gṛñjana, mahā kanda, jarjjara* and *dīrgha patraka.*

**पलांडु**

पलांडुर्यवनेष्टश्च दुर्गंधो मुखदूषकः ॥ २९ ॥

*Palāṇḍu*

*Palāṇḍu, yavaneṣṭa, durgandha* and *mukha dūsaka*—these are synonymous.

**क्षीरपलांडु**

पलाडुकः क्षीरपलाडुरुक्तः सक्षीरवान् क्षौद्ररसो यदि स्यात् ।

*Kṣīra palāṇḍu*

*Palānduka* having a milky juice which tastes like honey is called *kṣīra palāṇḍu.*

**गृंजन**

गृंजन: पित्तलो ग्राही तीक्ष्णोष्णो रोगनाशन: ।।३०।।
गंधाकृतिरसैस्तुल्य: सूक्ष्मनालपलांडुवत् ।
स्वल्प: मूलकसंकाश:[39] कंदो गृंजनमुच्यते ।। ३१ ।।
ग्रंथिपर्ण:[40] समाकार: पत्रै: कैश्चिन्मनीषिभि: ।

*Gṛñjana*

*Gṛñjana* aggravates *pitta.* It is constipative, sharp and hot. It cures diseases (?). In smell, shape and taste, it is like *sūkṣma nāla palāṇḍu.*

Some scholars hold a plant like small radish as *gṛñjana.* Some others, however, call another plant having leaves like those of *granthi parna* as *gṛñjana.*

**सूरण**

सूरण कंदल: कंदो गुदामयहर: पर: ।। ३२ ।।
वज्रकंद: सुरेंद्र स्याद्वन्योऽन्यश्चित्रदंडक: ।

*Sūraṇa*

*Sūraṇa, kandala, kanda, gudāmaya hara, vajra kanda* and *surendra*—these are the synonyms of *sūraṇa.*

Another wild variety of it is called *citra daṇḍa.*

**अस्थि संहार**

अस्थिशृंखलिको[41] वज्री ग्रंथिमान[42]स्थिसंहृता ।। ३३ ।।

*Asthi saṁhāra*

*Asthi śṛnkhalika, vajrī, granthimān* and *asthi saṁhṛtā*—these are synonymous.

**वाराही**

वाराही माधवी गृष्टिस्तत्कंद: सौकर: कीट: ।

*Vārāhī*

*Vārāhī, mādhavi* and *gṛṣṭi*—these are the synonyms of *vārāhī.*

Its *rhizome* (root ?) is called *śaukara* and *kīṭa.*

**मूशली**

43

मुशली तालपत्री स्यात्बलिनी तालमूलिका ।। ३४ ।।

*Mūśalī*

*Muśalī, tālapatri, balını* and *tāla mūlikā* —these are synonymous

**केयु**

केयुका फलुकी पीलुकेयुका दलशालिनी ।

*Keyu*

*Keyukā, phaluka, pīlu keyukā* and *dala śālinī*—these are synonymous.

**भूछत्र**

भूछत्रं पृथिवीकंदः शिलींध्र कंदकं मतम् ।। ३५ ।।

*Bhūchatra*

*Bhūchatra, pṛthivī kanda, śılındhra* and *kandaka*—these are synonymous.

**मानकंद**

स्थूलकंदो ग्रामकंदो मानकोऽन्यो महच्छद.

*Māna kanda*

*Sthūla kanda, grāma kanda* and *mānaka*– these are the synonyms of *māna kanda.*

It has another variety having bigger leaves.

**कसेरु**

44

कसेरुकं स्वल्पकंदं बृहद्राजकसेरुकम् ।। ३६ ।।

*Kaseru*

*Kaseruka* and *svalpa kanda*—these are the synonyms of *kaseru.*

It has a bigger variety which is called *rāja kaseruka.*

शृङ्गाटक

श्रृंगाटो जलकंद: स्यात्त्रिकोणस्त्रिकटस्त्रिक: ।

*Śṛngāṭaka*

*Śṛngāṭa, jala kanda, trikoṇa, trikaṭa* and *trika*—these are synonymous.

पिंडालु

पिंडालुक[45] कच्छगधं मध्वालु स्यात्तु रोमशम् ।। ३७ ।।
शखालु गङ्खसंकाश काष्ठालु स्वल्पकोष्ठकम् ।
हस्तालुकं महाकाष्ठ रक्तालु रक्तकंदकम् ।। ३८ ।।
अतिजीर्णमकालोत्थं रूक्षशीतमभूमिजम् ।
जठरं कोमल वातिशीतं व्यालादिदूषितम् ।
शुष्कं शाकं च सकल नाश्नीयान्मूलकं[46] विना ।।३९।।

*Piṇḍālu*

*Piṇḍālu, kacha gandha, madhvālu, romaśa, śankhālu, śankha saṁkāśa, kāṣṭhālu, svalpa koṣṭhaka, hastāluka, mahā kāṣṭha, raktālu* and *rakta kandaka*—these are synonymous.

All leafy vegetables which are *atijīrṇa* (very old), *akālottha* (unseasonal), *rūkṣa* (ununctuous), *śīta* (cold), *abhūmija* (not grown on ground), *jaṭhara* (preserved since long), *komala* (soft), *atiśīta* (excessively cold), *vyālādi dūṣita* (eaten by animals insects etc ) and *śuṣka* (dry) should not be used. *Mūlaka* is an exception to this rule.

## NOTES AND REFERENCES

1. This is the 96th chapter in *Ayurveda Saukhyaṁ* in *Toḍarānanda* and the opening invocation reads as below :

   यो हृद्रमोरामसुहृद्विभर्त्ता विश्वस्यकर्त्तानृपतौ सुखानाम् ।

   सुखायभूयाद्भुविटोडरेंद्रे भूदेव सद्धर्म्मिसुहृज्जनानाम् ।

2. 'कुष्माडकी' इति षष्ठपुस्तके पाठः ।
3. 'रूराजकर्क्कटी' इति प्रथमपुस्तके पाठः ।
4. 'कालिगं' इति पंचमपुस्तके पाठः ।
5. 'वुरसाम्बुनी' इति पंचमपुस्तके पाठ. ।
   'पुरुलाविनी' इति षष्ठपुस्तके पाठः ।
6. 'तुबी' इति षष्ठपुस्तके पाठः ।
7. 'लोमशा' इति पंचमपुस्तके पाठः ।
8. 'वालय' इति पंचमपुस्तके पाठ· ।
9. 'त्रपुस' इति पंचमपुस्तके पाठः ।
10. 'पलकिटा' इति षष्ठपुस्तके पाठः ।
    'परकटुः' इति पचमपुस्तके पाठः ।
11. 'छर्द्यादिनी' इति षष्ठपुस्तके पाठ· ।
12. 'मूत्रफला' इति प्रथमपुस्तके पाठः ।
13. 'श्लेष्मल' इति षष्ठपुस्तके पाठः ।
14. 'तद्वत्कुवटिकम् इति षष्ठपुस्तके पाठ. ।
15. 'व्त्रिषकटिका' इति प्रथमपुस्तके पाठः ।
16. 'कोलशिंवी' इति षष्ठपुस्तके पाठ. ।
17. 'सूकरपादिका' इति पचमपुस्तके पाठः ।
18. 'तिदिशो' इति पंचमपुस्तके पाठः ।
19. मुनिनिर्मिता' इति पंचमपुस्तके पाठः ।
20. सिवी.' इति पंचमपुस्तके पाठः ।
21. 'प्रणालकः' इति षष्ठपुस्तके पाठः ।

22. 'गौर' इति पंचमपुस्तके पाठः ।
23. 'महानादः' इति षष्ठपुस्तके पाठः ।
24. 'कांडीयस्तंदुलीयकः' इति षष्ठपुस्तके पाठः ।
25. 'सूक्ष्मपत्रः' इति पचमपुस्तके पाठः ।
26. 'श्चतगंधो' इति षष्ठपुस्तके पाठः ।
27. 'महाफला' इति षष्ठपुस्तके पाठः ।
28. 'सुरंगिका' इति पंचमपुस्तके पाठः ।
29-31. हृ॒ं हृ॒रुः स्याछुहृ हुकः' इति प्रथमपुस्तके पाठः ।
32. 'कुरंडीस्यान्नारीतुन्नालिका' इति षष्ठपुस्तके पाठः ।
33. 'चानाक' इति षष्ठपुस्तके पाठः ।
34. 'क्षुद्रा' इति षष्ठपुस्तके पाठः ।
35. 'काशद्कः' इति पंचमपुस्तके पाठः ।
36. 'सस्थिलो' इति षष्ठपुस्तके पाठ. ।
37. 'लसुन.' इति प्रथमपुस्तके पाठः ।
38. 'जवनेष्टो' इति प्रथमपुस्तके पाठ. ।
39. 'शंकाशंक' इति षष्ठपुस्तके पाठ. ।
'सकासः' इति पंचमपुस्तके पाठः ।
40. 'वर्णः' इति प्रथमपुस्तके पाठः ।
41. 'अस्थिश्रृंस्वरिका' इति षष्ठपुस्तके पाठः ।
42. 'ग्रंथिमानस्थिवृहण.' इति षष्ठपुस्तके पाठः ।
43. 'स्यावल्लि' इति षष्ठपुस्तके पाठः ।
44. 'बृहद्राजकशेरुकम्' इति पंचमपुस्तके पाठः ।
45. 'कत्थगन्ध' इति षष्ठपुस्तके पाठः ।

This is the end of 96th chapter of *Ayurveda Saukhyaṁ* not in *Todarānanda* and the colophon reads as below :

इति श्रीमहाराजाधिराजटोडरमल्लविरचिते टोडरानंदे आयुर्वेदसौख्ये निघंटौ शाकवर्गे नवतितमो हर्षः (?) ।

# CHAPTER 38

**जल**

पानीयं जीवन नीरं कीलालममृत जलम् ।

आपोंभस्तोयमुदकं पाथोंबुसलिलं पय: ॥ १ ॥

*Jala*

*Pānīya, jīvana, nīra, kīlāla, amṛta, jala, āpa, ambha, toya, udaka, pātha, ambu, salila* and *payas*—these are synonymous.

**दुग्ध**

दुग्धं प्रस्रवणं क्षीरं सौम्य संजीवन पय: ।

*Dugdha*

*Dugdha, prasravana, kṣīra, saumya, sañjīvana* and *payas*—these are synonymous.

**दधि**

दधि स्त्यानंपय: सम्यक्स्त्यानमीषत्तु मदकम् ॥ २ ॥

*Dadhi*

*Dadhī* and *styānaṁ payas*—these are the synonyms of well

fermented *dadhi.* If it is slightly fermented then it is called *mandaka.*

**तक्र**

दंडाहत कालसेयं गोरसं च विलोडितम् ।
सरसं निर्ज्जल घोल मथित सरवर्जितम् ॥ ३ ॥
समोदकं श्वेतमथमुदश्वित् ह्यर्द्धवारिकम् ।
पादोदकं भवेत्तक्रमूर्द्धभोन्योवभाषिते ॥ ४ ॥

*Takra*

*Daṇḍāhata, kālaseya, gorasa, viloḍita, sarasa, nirjala, ghola, mathita* and *sara varjita*—these are synonymous

*Dadhi* mixed with equal quantity of water is known as *śveta.*

*Dadhi* mixed with half of water is called *udaśvit.*

*Dadhi* mixed with one fourth of water is called *takra.*

**नवनीत**

हैयंगवीन सरजं नवनीतमनुमंथजम् ।

*Navanīta*

*Hayaṁgavīna, saraja, navanīta* and *anumanthaja*—these are synonymous.

**घृत**

घृतमाज्य हविः सर्पिराज्यारममृताह्वयम् ॥ ५ ॥

*Ghṛta*

*Ghṛta, ājya, havis, sarpis, ājyāra* and *amṛtāhvaya*—these are synonymous.

**मद्य**

मद्यं हारा[2] सुरा मदा[3] मदिरा वरुणात्मजा ।
सुधा गंधोत्तमा कल्पा देवसृष्टा च वारुणी ॥ ६ ॥

*Madya*

*Madya, hārā, surā, mandā, madirā, varuṇātmajā, sudhā, gandhottamā, kalpā, devaśṛṣṭā* and *vāruṇī*—these are synonymous.

इक्षु

इक्षुर्म्महारसो वेणुर्निःसृतो गुडपत्रकः

तृणराजो मधुतृणो गंडीरी मृत्युपुष्पकः ॥ ७ ॥

*Ikṣu*

*Ikṣu, mahārasa, veṇu niḥsṛta, guḍa patraka, tṛna rāja, madhu tṛṇa, gaṇḍīrī* and *mṛtyu puṣpaka*—these are synonymous.

इक्षुविकार

4

सिता मत्स्याण्डिका पल्ली मीनांडी घल्लकस्तथा ।

अन्या सितोपला शुद्धा सिकता छत्रिकामला ॥ ८ ॥

खंडमथ खडसिता माधवी मधुशर्क्करा ।

फाणितं क्षुद्रगुडको गुडस्त्विक्षुरसोद्भवः ॥ ९ ॥

*Ikṣu vikāra*

*Sitā, matsyāṇḍikā, pallī, mināṇḍī* and *ghallaka*—these are the synonyms of *matsyāṇḍikā*.

Another variety of it is called *sitopalā, śuddhā, sikatā, chatrikā* and *amalā*.

*Khaṇḍa* and *sitā*—these are the synonyms of *khaṇḍa*.

*Mādhavī* is called *madhu śarkarā. Phāṇita, kṣudra guḍaka* and *guḍa*—these are prepared from sugar cane juice.

मधु

मधु पुष्पासवः पुष्परसो माक्षिकमीरितम् ।

माक्षिकं पैत्तिकं क्षौद्रं भ्रामर मध्वविस्तरात् ॥१०॥

माक्षिकं तैलसंकाशं पैत्तिकं घृतवर्णकम् ।

क्षौद्रं कपिलवर्णं स्याद्भ्रामरं स्फटिकोपमम् ॥ ११ ॥

*Madhu*

*Madhu, puṣpāsava, puspa rasa,* and *mākṣika*—these are the synonyms of *madhu.*

*Mākṣika, paittika, kṣaudra* and *bhrāmara*—these are in brief the different varieties of *madhu.*

*Mākṣika* is like oil. *Paittika* has the colour of ghee. *Kṣaudra* is reddish brown in colour and *bhrāmara* is like a crystal.

**मधूच्छिष्ट**

मदनं मधुजं सिक्थं मधूच्छिष्टं मधूषितम् ।

*Madhūcchiṣṭa*

*Madana, madhuja, siktha, madhūcchiṣṭa* and *madhūṣita*—these are synonymous.

**धान्यवर्ग**

शालयो रक्तशल्याद्या व्रीहय. षष्टिकादयः ॥ १२ ॥

मुद्गादिर्द्विदलं सौचकंग्वादि तृणधान्यकम् ।

क्षुद्रधान्यं कुधान्यं तत्स्थूलधान्य यवादिकम् ॥ १३ ॥

रक्तशालिर्लोहितः स्याद्गरुडः शकुनाहृतः ।

सुगंधिको महाशालिकमलस्तु कलामको ॥ १४ ॥

*Group of dhānya*

*Rakta śāli* etc., belong to *śāli* group. *saṣṭika* etc., belong to *brihı* group. *Mudga* etc., belong to *dvidala* (dicotyleden) group, *Sauca kaṅgu* etc., belong to *tṛṇa dhānya* group. *Kṣudra dhānya* ıs called *kudhānya. Yava* etc., are called *sthūla dhānya. Rakta śālı* is called *lohita, garuḍa* is called *śakunāhṛta, sugandhika* is called *mahā śālı* and *kalama* is called *kalāmaka.*

क्षीरी

क्षीरेयं परमान्नं स्यात्पायसं क्षीरतंडुलैः ।
क्षीरिका दुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरु ॥ १५ ॥
विष्टंभिनी हरेत्पित्तं रक्तपित्ताग्निमारुतान् ।

*Kṣīrī*

*Kṣīreya, paramānna* and *pāyasa*—these are synonyms of *kṣīrī* which is prepared of milk and rice.

*Kṣīrikā* is difficult of digestion and strength promoting. It provides nourishment to tissue elements. It is heavy and constipative. It alleviates *pitta, rakta pitta* (a disease characterised by bleeding from different parts of the body), *agni* (digestive power) and *vāyu.*

रागषाडव

गुडादिपक्वक्वथितमाममाम्रफलं पुनः ॥ १६ ॥
स्नेहैला नागरैर्युक्तं ज्ञातव्यो रागषाडवः ।
सिताहचकसिंधूत्थैः सवृक्षाम्लपरुषकैः ॥ १७ ॥
जंबूफलरसैर्युक्तो रागो राजिकया कृतः ।
षाडवा मधुरोष्णादिरससंयोगसंभवाः ॥ १८ ॥
दीपना बृंहणा रुच्या हृद्या स्तृष्णाश्रमापहाः ।

*Rāga ṣāḍava*

A preparation of green fruits of *āmra* fermented after boiling with *guda* etc.. and added with *sneha* (oil), *elā*, and *nāgara* is called *rāga ṣāḍava,*

A preparation of the juice of the fruit of *jambu* mixed with *sitā, rucaka, sindhuttha, vṛkṣāmla, paruṣaka* and *rājikā* is called *rāga.*

Various types of *ṣāḍavas*, prepared by the juices which are

sweet & hot, are stimulant of digestion, nourishing and appetiser It is a cardiac tonic. It alleviates thirst & fatigue.

**खंडाम्र, खंडामलक**

आम्रामलकलेह्याद्याः हृद्याः पुष्टिबलप्रदाः ॥ १९ ॥

तर्पणा रोचनास्निग्धा मधुरा गुरवस्तथा ।

*Khaṇḍāmra and Khaṇḍāmalaka*

*Lehyas* prepared of *āmra* and *āmalaka* are cardiac tonic, promoter of plumpness and strength, nourishing, appetiser, unctuous, sweet and heavy.

**शिखरिणि**

ससितं दधिमध्वाज्यमरिचैलादिसंस्कृतम् ॥ २० ॥

मथितं कान्तकामिन्या कर्पूरपरिपाचितम् ।

रसाला शिखरिण्युक्ता मार्जिता मार्जिका बुधैः ॥२१॥

रसाला शुक्रला बल्या रोचनी वातपित्तजित् ।

स्निग्धा गुरुः प्रतिश्यायं विशेषेण विनाशयेत् ॥ २२ ॥

*Śikhariṇi*

Sugar and *dadhi* mixed with *madhu, ājya* and *marica,* churned by a beautiful lady and mixed with *karpūra* is called *rasālā, śikhariṇi, mārjitā and mārjikā.*

*Rasālā* is *spermatopoetic,* strength promoting and appetiser. It alleviates aggravated *vāta* and *pitta.* It is unctuous and heavy. It specially cures *pratiśyāya* (cold).

**पानक**

द्राक्षाश्रीकपरूषादि जलखंडादिमिश्रितम् ।

मारिचार्द्रककर्पूरचातुर्जातादिसंस्कृतम् ॥ २३ ॥

पानकं द्विविधं तत्स्यादम्लानम्लविभेदतः ।

द्राक्षा खजूरकाश्मर्य समधूकपरुषकं : ॥ २४ ॥
पंचसाराभिधानं च चंद्रपूर्णाभिवासितम् ।
पानकं मूत्रलं हृद्य प्रीणनं तृट्श्रमापहम् ॥ २५ ॥
यथाद्रव्यं गुणं तत्तु गुरुलघ्वादिनिर्दिशेत् ।
पंचसाराभिधं पित्ततृष्णादाहश्रमापहम् ॥ २६ ॥
माध्वीक श्रमदाहास्रपित्तक्लमतृषापहम् ।
परूषकानां लोकानां(?)हृद्य विष्टंभि पाचनम् ॥ २७ ॥
अम्लीकाया: सरं तृष्णाकृमिदाहश्रमापहम् ।

*Pānaka*

The potion prepared of *drākṣā*, *śrīka*, *paruṣa* etc., mixed with water and *khaṇḍa* (a type of sugar) and impregnated with *marica*, *ārdraka*, *karpūra*, *caturjātaka* (*tvak*, *elā*, *patra* and *nāga kesara*) etc., is called *pānaka*.

*Pānaka* is of two types—one is sour and the other is not sour.

The *pānaka* prepared of *drākṣā*, *kharjūra*, *kāśmarya*, *madhūka* and *paruṣaka* and mixed with *karpūra* is called *pañca sāra*.

*Pānaka* is diuretic, cardiac tonic and nourishing. It cures morbid thirst and exhaustion.

The heaviness and lightness of *pānaka* should be determined according to the property of its ingerdients.

*Pañca sāra* type of *pānaka* cures aggravated *pitta*, morbid thirst, burning syndrome and exhaustion.

*Mādhvika* type of *pānaka* cures exhaustion, burning syndrome, *asra pitta* (a disease characterised by bleeding from different parts of the body), *klama* (mental fatigue) and morbid thirst.

The *pānaka* prepared of *paruṣaka* and *loka* (?) is cardiac tonic, constipative and carminative.

The *pānaka* prepared of *amlikā* is laxative and it cures morbid thirst, intestinal warm infestation, burning syndrome and exhaustion

**सट्टक**

सुस्नेहं दधि निर्म्मथ्य पटे शर्क्करयान्वितम् ॥ २८ ॥
सव्योषं दाडिमाजाजिसट्टकोऽयमुदाहृतः ।
सट्टको रोचनो स्वर्यः पित्तानिलहरो गुरुः ॥ २९ ॥
दीपनस्तर्प्पणो बल्यः श्रमक्लमतृषापहः ।

*Saṭṭaka*

On a piece of cloth, *dadhi* with lot of fat and sugar should be triturated well. To this *vyoṣa* (*śunṭhī, pippalī* and *marica*), *dāḍima* and *ajāji* should be added. This is called *saṭṭaka.*

*Saṭṭaka* is appetiser and promoter of good voice. It alleviates *pitta* and *vāyu.* It is heavy, digestive stimulant, nourshing and strength promoting. It cures exhaustion, mental fatigue and morbid thirst.

**मण्डक**

कुकूल कर्परभृष्टा कदांगारविपाच्चिता ॥ ३० ॥
मांडकाद्या यथापूर्व्वं गुरवो वृंहणा मता ।
6
मंडकः मिश्रितः सूक्ष्मो कर्प्परादिषु पाच्चित. ॥ ३१ ॥
स एव किंचित्स्थूलस्तु बुधैः पूपालिका मता ।
7
अंगारकर्क्करी सैव विज्ञेयागारपाचिता ॥ ३२ ॥
अत्युष्णो मंडकः पथ्यः शीतः स गुरुरुच्यते ।
अंगारमंडक ग्राही लघु दोषत्रयापहः ॥ ३३ ॥

*Maṇḍaka*

*Maṇḍaka* is prepared over *kukula* (iron frying pan) or *kharpara* (earthen pan) in low charcoal heat. The former type (prepared over iron pan) is heavier and more nourishing than the latter (prepared over earthen pan).

*Maṇḍaka* which is fried over an earthen pan should be thin. The thicker one is called *pūpālikā.*

The *maṇḍaka* prepared over charcoal is called *aṅgāra karkarī.*

*Maṇḍaka* is very wholesome when it is very hot. The cold *maṇḍaka* is heavy.

*Aṅgāra maṇḍaka* is constipative and light. It alleviates all the three *doṣas.*

**पोलिका**

पोलिका कफकृद्बल्या पित्तला वातनुद्गुरु ।
अंगारकर्क्करी[8] बल्या बृंहणी शुक्रला लघुः ॥ ३४ ॥
दीपनी कफहृद्रोगपीनसश्वासकासजित्[9] ।

*Polikā*

*Polikā* aggravates *kapha.* It promotes strength. It aggravates *pitta* and alleviates *vāyu.*

*Aṅgāra karkarī* promotes strength, corpulence and semen. It is light and stimulant of digestion. It alleviates *kapha,* heart disease, *pīnasa* (chronic cold), asthma and cough.

**शालिपिष्ट**

शालिपिष्टकृताः भक्ष्याः नातिबल्याः विदाहिनः ॥३५॥
अवृष्या गुरवश्चोष्णाः[10] कफपित्तप्रकोपनाः[11] ।

*Śāli piṣṭa*

Eatables prepared of the paste of *śāli* do not promote strength adequately and they produce burning sensation. They

are not aphrodisiac. They are heavy and hot. They aggravate *kapha* and *pitta*.

**गोधूमभक्ष**

गोधूमविहिताः भक्ष्याः बल्याः पित्तानिलापहाः ॥१६॥

*Godhūma bhakṣya*

Eatables prepared of wheat promote strength and they alleviate *pitta* as well as *vāyu*.

**वैदलभक्ष**

वैदला वातला भक्ष्या गुरवस्तु सरा हिमाः ।

*Vaidala bhakṣya*

Eatables prepared of *vaidala* (pulses) aggravate *vāyu*. They are heavy, laxative and cooling.

**माषभक्ष्य**

12

माषपिष्टकृता भक्ष्याः बल्याः पित्तकफप्रदाः ॥ १७ ॥

*Māṣa bhakṣya*

Eatables prepared of the paste of *māṣa* promote strength. They aggravate *pitta* and *kapha*.

**अन्यभक्ष**

विचार्यान्निगुणान् भक्ष्यानन्यानपि विनिर्दिशेत् ।

*Other bhakṣyas in general*

Properties of other eatables should be determined by the properties of their ingredients.

**गुडयुक्तभक्ष्य**

गौडिका गुरवो भक्ष्याः वातघ्नाः कफशुक्रलाः ॥ १८ ॥

*Guḍa yukta bhakṣya*

Eatables prepared by mixing *guḍa* alleviates *vāyu*. They produce more of *kapha* and *semen*.

**घृतपक्व भक्ष्य**

12

घृतपाचितभक्ष्यास्तु बल्याः पित्तानिलापहाः ।

*Ghṛta pakva bhakṣya*

Eatables fried with ghee promote strength. They alleviate *pitta* and *vāyu.*

**तैलपक्व भक्ष्य**

तैलजाः दृक्समीरघ्नास्तृष्णाः पित्तास्रदूषणाः ॥ ३९ ॥

*Taila pakva bhakṣya*

Eatables fried with oil reduce eye sight and *vāyu.* They are hot. They vitiate *pitta* and *rakta.*

**दुग्धभक्ष्य**

दुग्धालोडितगोधूमशालिपिष्टादिनिर्मिताः ।

वातपित्तहराभक्ष्याः हृद्याः शुक्रबलप्रदाः ॥ ४० ॥

*Dugdha bhakyṣa*

Eatables prepared by boiling the paste of *godhūma, śāli* etc., in milk alleviate *vāyu* and *pitta.* They are cardiac tonics and they promote *semen* as well as strength,

**घृतपूर**

क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितम् ।

विस्तार्य सर्पिषा पक्त्वा ततः सिताविमिश्रितम् ॥४१॥

घृतपुरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः ।

संमितः मर्दितः क्षीरनालिकेररसादिभिः ॥ ४२ ॥

अवगाह्य घृते पक्त्वा घृतपूरो परिस्मृतः ।

घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहा ॥ ४३ ॥

सद्यःप्राणप्रदो बल्यो क्षतजित् बृंहणः परः ।

*Ghṛta pūra*

The well filtered flour of wheat should be kneaded with milk and boiled with ghee. Thereafter, sugar should be added to it. Then *karpūra* and *marica* should be mixed. This is called *ghṛta pūra.*

Refined wheat flour should be mixed with milk and juice of *nārikera.* The dough should then be boiled in ghee. This is also called *ghṛta pūra.*

*Ghṛta pūra* is heavy, aphrodisiac and cardiac tonic. It alleviates *pitta* and *vāyu.* It is instantaneously life-giving.

It promotes strength and alleviates *kṣata* (consumption). It is extremely nourishing.

**संयाव**

संमिता सर्प्पिषा भृष्टं सितामरिचमिश्रितम् ।। ४४ ।।
एलालवंगकर्प्पूरचूर्णादि - परिसंस्कृतम् ।
क्षिप्त्वान्यसम्मिता[13]लम्बपुटेषु च घृते पचेत् ।। ४५ ।।
खडे न्यसेत्ततः पक्वे सयावोऽयमुदाहृतः ।
सम्मिता मधुदुग्धेनमर्दयित्वा सुशोभनम् ।। ४६ ।।
पचेद् घृतोत्तरे खंडे न्यसेत्पक्वं नवे घटे ।
ततो मरिचचूर्णेन खंडचूर्णेन चूर्णितम् ।। ४७ ।।
कुर्यात्कर्प्पूरसंयुक्तं [14]संयोवममृतोपमम् ।

*Saṁyāva*

Refined wheat flour should be fried with ghee and mixed with sugar and *marica.* It should then be impregnated with the powder of *elā, lavaṅga* and *karpūra.* This should be pressed with the help of some unprocessed wheat flour over a wooden plate (*ālamba puṭa*) and then fried in ghee. Thereafter, it should be boiled in sugar syrup. This preparation is called ***saṁyāva.***

Refined wheat flour should be kneaded with honey and milk. It should then be fried in ghee and sugar syrup consecutively. This should be kept in a new jar and sprinkled with the powder of *marica*, sugar and camphor. This is called *saṁyāva* which is like *ambrosia*.

**मधुशीर्षक**

मर्द्दयित्वा सुसमितामपूपास्तनवः[15] कृता ॥ ४८ ॥
मातुलुंगत्वचाखंडपक्वमार्द्रकपूरितम् ।
विधाय पूपकं वृत्तं गंधाढ्यं केशरान्वितम् ॥ ४९ ॥
पक्त्वा सर्प्पिषि खण्डे च गाहितो मधुशीर्षक. ।

*Madhu śīrṣaka*

Thin *apūpas* should be prepared by kneading the refined wheat flour. These should be filled up with a mixture of boiled pieces of the skin of the fruit of *matuluṅga* and *ardraka*. In these rounded *apūpas*, fragrant things like *keśara* should be added and these should be boiled in ghee and sugar (syrup) consecutively. This preparation is called *madhu śīrṣaka*.

**मधुपूपक**

समितां गुडतोयेन मेलयित्वा सुगालितम् ॥ ५० ॥
घृते विस्तार्य विपचेत् सुघृतं मधुपूपकः ।

*Madhu pūpaka*

Refined wheat flour should be mixed with *guḍa toya* and filtered. This should he kneaded with ghee and then boiled in good quantity of ghee. This is called *madhu pūpaka*.

**दधिपूपक**

शालिपिष्टयुतं दध्ना मर्द्दयित्वा घृते पचेत् ॥ ५१ ॥
वेष्टयेत्पक्वखंडेन सुवृत्ता दधिपूपका ।
संयावा मधुशीर्षाद्याः पूपकाः दधिपूपकाः ॥ ५२ ॥

गुरवो बृंहणाः हृद्याः वृष्याः पित्तानिलापहाः ।
एते संस्कारभेदेन विविधास्तेऽपि तद्गुणाः ॥५३॥

*Dadhi pūpaka*

Paste of *śāli* should be kneaded with *dadhi* and fried in ghee. Rounded pieces of this dough should be smeared with sugar syrup. These are called *dadhi pūpaka*.

*Saṁyāva, madhu śīrṣa* etc., *pūpaka* and *dadhi pūpaka* are heavy, nourishing, cardiac tonic and aphrodisiac. They alleviate *pitta* and *vāyu*.

There are different types of these preparations and their properties vary depending upon their method of processing.

**विष्यन्दन**

दधि क्षीरे समे पक्त्वा अर्धभागावशेषयेत् ।
आवपेद्रक्तशालीनां तंडुलस्तिलसंयुताम् ॥ ५४ ॥
पियालपनसाब्जानां बीज मुष्टिं समापयेत् ।
क्षीरतुल्यघृतं चैव शर्करामरिचान्विता ॥ ५५ ॥
सिद्धस्त्रिकटुकोपेतः कर्प्पूरेणाधिवासितः ।
एष विष्यदनो नाम देवलोकेऽपि दुर्लभः ॥ ५६ ॥
यस्मात्पक्वेऽपि घृतेन स्कदते सर्व्वतोमुखम् ।
तस्मात्सूपविधानज्ञैः विष्यदन इति स्मृतः ॥ ५७ ॥
विष्यंदो बृंहणो हृद्यः पित्तानिलहरो गुरुः ।

*Viṣyandana*

Curd and milk should be taken in equal quantity and boiled till half remains. To this, the rice of red variety of *śāli* and *tila* should be added. One *muṣṭi* of the seeds of each of *piyāla, panasa* and *abja* should then be mixed with it. Ghee should then be taken in the same quantity as that of milk and

added to it with sugar and *marica*. After boiling, *trikaṭu* (*śuṇṭhi*, *pippalī* and *marica*) should be added along with fragrant things like *karpūra*. This preparation is called *viṣyandana* and it is rare even in the heaven.

When boiled in ghee, it gets condensed (*skandana*) from all sides for which it is called *viṣyandana* by the experts in the science of cooking.

*Viṣyandana* is *bṛmhaṇa* (nourishing) and cardiac tonic. It alleviates *pitta* and *vāyu*, and it is heavy.

**लप्सिका**

समितां भर्जयेत्तप्ते घृते सितां ततो न्यसेत् ।। ५८ ।।

चारमज्जादिसंयुक्ता पयसा[16] योजयेत्तदा ।

एलैलादियुता तज्ज्ञैर्लक्षिका ललिता मता ।। ५९ ।।

[17] लप्सिका बृंहणी वृष्या वातपित्तहरा गुरुः ।

*Lapsikā*

In the hot ghee refined wheat flour should be added. To this sugar should be added thereafter. Milk boiled with the fruit pulp of *cāra* should then be added. It should then be mixed with *elā*. This is known as *lapsikā* or *lalitā*.

*Lapsikā* is nourishing and aphrodisiac. It alleviates *vāyu* and *pitta*. It is heavy.

**फेनिका**

फेनिका पुटिनी शुभ्रा वातपित्तहरा लघुः ।। ६० ।।

लक्षणं फेनिकादीनां सूपकारैः विचारयेत् ।

*Phenikā* etc.

*Phenikā*, *puṭinī* and *śubhrā*—these preparations alleviate *vāta* and *pitta*. They are light.

Their methods of preparation may be ascertained from expert cooks.

मोदक

मोदकाः लड्डुकाः प्रोक्तास्ते चानेकविधाः मताः॥६१॥

दधि क्षीरनष्टदुग्धं समिता माषपिष्टिका ।

